तांबूलं दर्भसंयुक्तं बृहती फलसंयुतम्।
गंधैः पुष्पैस्तथा धूपैः दीपैरर्घ्यैश्च पूजयेत्॥ 372
च ..... प्रजपयोहि एका दश्यां परं नहि॥
अरयंगं तु ततः कृत्वा स्नानं चैव यथाक्रमं॥ 373
शुक्लवस्त्रेण संवेष्ट्य शुक्लयज्ञोपवीतकं॥
पादप्रक्षालनं कृत्वा आलयं तु प्रवेशयेत्॥ 374
भूसुरान् भोजनं कृत्वा तांबूलं तदनंतरं॥
P.2.23) आचार्य भ्रमणं कृत्वा वस्त्रहेमांगुलीयकैः॥ 375
हेमयज्ञोपवीतश्च पञ्चांग युत भूषणं॥
नित्य नैमित्तिके चैव काम्ये चैव तु कारयेत्॥ 376
कर्मारंभस्य तत्काले पुण्याहं चैव बुद्धिमान्।
भूसुरान् हस्तमेकैकं देशिकं दर्भद्वयं ददेत्॥ 377
तत्काल एव संकल्प्य यावत्कर्म समाचरेत्।
दर्भमेकं च द्वयं कृत्वा द्वादशांगुलमुन्नतम्॥ 378
आचार्य दक्षिणे हस्ते अनामिकेन तु बंधयेत्।
प्राणायामं च कर्तव्यं वामहस्ते सुयोजयेत्॥ 379
दक्षिणे चैव जानूर्ध्वे हस्तद्वयं सुयोजयेत्।
सुरान् देशिके चैव संकल्पं तु विशेषतः॥ 380
यावत्कर्म करिष्यामि दर्भौ द्वाहे तदुत्तरे।
एवं क्रमेण इत्यंतं संकल्पमिति बुद्धिमान्॥ 381
अ) भूसुरान् देशिको पश्चात् पुण्याहमिति वाचकः।
भवद्भिरनुज्ञातस्य पुण्याहं वाचयिष्यते॥ 382
अस्मिन् मध्ये तु यत्कर्म तत्कर्म देशिकः शृणु।
भूसुरान् वाच्यतां श्रुत्वा ओमापो देशिकः शृणु॥ 383
~~मनस्स्वमाप्यीयत~~ शिवापस्त्वं द्विजाप्रोक्तं गंधाश्च देशिकः शृणु।
देशिको गंधदत्तेन भूसुरान् हस्त संग्रहेत्॥ 384
सुगमा भूसुरान् श्रुत्वा सुमनस देशिकः शृणु।
भूसुरान् सौमनस्यमस्तु अक्षता वाच्य वाचकः॥ 385

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आचार्यक्षत पुष्पदत्तेच द्विज संग्रहेत् ।
अक्षतं चारिष्टंच उभस्तु भूसुरा वाचकेष्विह ॥ 386
अन्वाहार्यास्तु सौत्वाहार्यास्तु तद्विजाः ।
दक्षिणं देशिकाः श्रुत्वा यत्ना दक्षिणमा द्देत् ॥ 387
ओं स्वस्ति दक्षिणा पांतु भूसुरान् वाचयेत्ततः ।
बहु देवमस्त्वाचार्यो इत्यादेव हो भूसुराः ॥ 388
पश्चादभय वाच्यस्तु अनुमदं तु द्विजः स्वरेणु ।
मनस्समाधीयता चार्य समाहित मनसाद्विजं ॥ 389
p.2.24) प्रसीदं तु भवताचार्यं प्रसन्नास्म द्विजोच्यते ।
शांतिरस्त्वादि याचार्यं स्वस्तिकर्मे शिवांतिका ॥ 390
आयमाचार्य वाच्यान्न अन्ये वाच द्विजा तन्ना ।
उभौ च वाचकं पश्चात् पुण्याहं भवतो ब्रुव ॥ 391
उआचार्येति वाचस्त्रि पुण्याहं त्रि द्विजोच्यते ।
पश्चादुभौ तन्ना प्रोक्तौ श्रुति प्रामाण्यमेवच ॥ 392
स्वस्ति मध्ये तु यत्कर्म तत्कर्माचार्यवाचकं ।
त्रि स्वस्ति भवताचार्यं स्वस्ति त्रीणिच भूसुराः ॥ 393
ततः श्रुत्वा उभौ त्रीणि ऋद्धि भवंतु देशिकः ।
भूसुरान् ऋद्धिता त्रीणि समा वाच उभौ तन्ना ॥ 394
एवं क्रमेण पुण्याहं कारये देशिकोत्तमः ।
भूसुरान्दक्षिणा प्रोक्ता आचार्यं षड्गुणं भवेत् ॥ 395
आचार्य मनसा तृप्तिः देवसान्निध्यकारणं ।
चलनं मनसा चैव देव सान्निध्य निष्फलम् ॥ 396
पूर्वाह्णे अभिषेकं तु ब्रह्मवर्गस्य वर्धनम् ।
मध्याह्ने अभिषेकं तु क्षत्रियस्य तु वर्धनम् ॥ 397
सायाह्ने अभिषेकं तु वैश्यानां वर्धनं क्रमात् ।
अर्धरात्रौ तन्ना प्रोक्तं शूद्रवर्गस्य वर्धनं ॥ 398
भूसुरान् स्नापयेत्कुर्यात्पुत्रपौत्रादि वर्धनं ।
क्षत्रियो स्नापयेत्कुर्यात् धनधान्य समृद्धिदं ॥ 399
पुण्याह फलमेवोक्तं सर्वजाति स्तथैवच ।
आदिशैवेन कर्तव्यं पुण्याहं वाचयेत्ततः ॥ 400
गोचर्ममात्रविपुलं कुशाग्रै पाणि शोधनं ।
माषमन्नजले ग्राह्यं देहशुद्धिस्तथैव च ॥ 401

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुण्याहविधि प्रोक्तः पञ्चगव्य विधिं शृणु।
इति कारणे प्रतिष्ठातंत्रे पुण्याहविधि पटलः॥ 402
श्री तनु नालेश्वर पूजा योग्यता कृति बिश्रुता
देवशिखामणि लिखितस्य पुण्याहविधिः॥ 403

सप्तगुरु ध्यानम् =

P. 2-25) विनायकं पूर्वदिग्भागे श्रीदेव्युत्तरमेवच।
ऐशान्यादि पश्चिमांतं तु गुरून् सप्त प्रपूजयेत्॥ 404
ओं भां महालक्ष्म्यै नमः सदाशिवमनंतश्च-
श्रीकण्ठं पुनरंबिकां। गुहं विष्णुं च धातारं =॥ 405
गुरून् सप्त स्मरन् यजेत्॥
कुन्देन्दु निर्मलो देवः पञ्चवक्त्रमिता तनुः॥ 406
दशबाहुः प्रसन्नास्यः पञ्चवक्त्रः सदाशिवः।
सदाशिवं तत्स्वरूपं सिंहासनं प्रकल्पयेत्॥ 407
ओं हां सदाशिव गुरवे नमः।
रक्तवर्णं त्रिणेत्रं च सव्य भागे करद्वये। 408
वरदं त्रिशूलंच इतरे डमरुकाभयम्॥
ओं हां अनंतगुरवे नमः।
काल कण्ठं चतुर्बाहुं कर्पूरं वर्णधारिणं॥ 409
वरदं डमरुकं सव्ये अभयं परशुनामके।
ओं हां श्रीकण्ठगुरवे नमः।
अंबिकायासनं सिंहं करण्डमकुटशिरः॥ 410
सव्ये शूलं च वामे तु मुण्डमालां च धारिणं।
ओं हां अंबिका गुरवे नमः॥ 411
पद्मासनं त्रिणेत्रं च सव्ये वरदपुस्तकम्।
वामे जपाक्षमाला च रक्तं अभयवर्णकम्॥ 412
ओं हां गुहाय गुरवे नमः॥
मेघवर्णं महाविष्णुं सव्ये शंखं वरप्रदम्।
वामे चक्राभयं चैव श्री भूम्यभयपार्श्वकं॥ 413
ओं हां विष्णुगुरवे नमः।
रक्तवर्णं जटाजूटं सव्यवाम चतुर्भुजे॥ 414
स्रुगादि जपमालां च कुण्डिका स्रुवमेवच।
ओं हां ब्रह्मगुरवे नमः।
एवं सप्तगुरुरूपान् पूजयेद्दक्षिणाननान्॥ 415
ओं सप्तगुरुभ्यो नमः। इति वा।
सामान्यार्घ्यं नमस्कारं मुद्रां चैव प्रदापयेत्॥ 416

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मकुटे। पादे तु उरसि चैव मकुटे हृदये तथा।
मूर्ध्नि चतुश्शाखायां तु कवचे हस्तयोस्तथा॥ 417
P.L.26) अष्टस्थानं तथा चैव आसन शिवमूर्तयः।
शिवं हृदयमंत्रं च शिखामंत्रं शिखामनुः॥ 418
कवचं हस्तमंत्रेण अष्टपुत्रं तु योजयेत्।
च) पंकजार्कपलाशं च नन्द्यावर्तञ्च पाटली॥ 419
करवीरं च पङ्कं च नीलोत्पलमथाष्टकम्।
तत्रैव। चातुर्मास्यादि पर्यन्तं सप्तमासांतमेव च॥ 420
वपनं नैव कुर्वीत उत्सवादि विशेषतः।
ऊर्ध्वं शैवेन कर्तव्यं नित्यनैमित्तिकेऽपि च॥ 421
गर्भिणीर एष्ट मासाद्य गर्भवान् कर्म वर्जयेत्।
चे) गर्भितेन प्रकर्मेण प्रायश्चित्तं तु कारयेत्॥ 422
आचार्या~~विधिः~~भिषेक विधिः॥
उत्तमं मेरुकुंभं तु मध्यमं पञ्चकुंभकं। 423
अधमं नवम कुंभं तु इत्येते कुंभलक्षणम्।
आदिशैवाभिषेकं तु तच्छ्रेष्ठं मेरुकुंभकम्॥ 424
अधिकारं च संप्राप्य तच्छ्रेष्ठं मेरुकुंभकम्।
शिवद्विजाभिषेकं तु एककुंभं समाचरेत्॥ 425
शैवानामभिषेकस्स्यात् पञ्चकुंभस्य संग्रहम्।
दीक्षायामभिषेकं तु शैवमार्गेण बुद्धिमान्॥ 426
दीक्षसंबंधं॥ कृते सपिण्डीकरणे च पित्रोर्न-
ब्रह्मचर्यं परिरक्षणीयं। प्रवर्तने च महत्-॥ 427
फलं स्यात् त्रिवर्तने च स्खलने न दोषः॥
इति विज्ञानोत्तरे॥ अन्यस्थानार्जितं पापं-॥ 428
पुण्यस्थाने विनश्यति। पुण्यस्थानार्जितं
पापं शिवस्थाने विनश्यति। शिवस्थानार्जितं- 429
पापं गुरुस्थाने विनश्यति। गुरुस्थानार्जितं-
पापं गुरुस्थाने विनश्यति। पूर्वाह्णे सित- 430
पुष्पं तु मध्याह्ने रक्तपुष्पकं। सायाह्ने मल्लिका-
जाति अर्धयामे तु सर्वशः। बिंबे विशेष उक्तः॥ 431
गर्भदीक्षावतो नित्या पूजाचोक्तमनीषिभिः।
प्रसवांतमुत्सवादि सप्तमासात् परं न हि॥ 432
बिल्वः कपित्थो निर्गुण्डी वारणस्सरणस्तथा।
एते वै पञ्चबिल्वानि अर्चयेत्तु महादरात्॥ 433

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुष्पच्छेदैस्तु वा पूजा राक्षसानां विवर्धनी।
पत्रच्छेदैस्तु संपूजा राक्षसानां विनाशिनी॥ 434
निश्चिते दिवसे प्राप्ते उत्सवे सङ्कटे यदि।
ध्वजमारोप्य तीर्थान्ते उत्सवं विधिना कुरु॥ 435
सप्तविंशति नक्षत्रे तीर्थान्तेप्युत्सवं परं।
सर्वमासेषु कर्तव्यं आर्द्रान्ते वा विशेषतः॥ 436
विसर्जयित्वा निर्माल्यं लिंगपीठं च वारुणैः।
शोधनं क्षालनं चैव लिंगशुद्धिः प्रकीर्तितः॥ 437

=

P.L.28) अत्र वक्ष्ये विशेषेण संप्रोक्षणविधिं परं।
आयुः श्री कीर्ति पुष्टिश्च धनधान्य विवर्धनं॥ 438
प्राग्भागे भिन्न च्छिन्नैव पतितोपांग हीनके।
प्रासादाद्धि वैषम्यात् दुर्जनं स्पर्शनं तथा॥ 439
अन्तर्हीनेषु चोरेषु पुनस्संधान कर्मणि।
प्रभा हीनांग विच्छिन्ने सांगोपांग विहीनके॥ 440
अंगहीनमिति प्रोक्तं चतुर्विध मुच्यते।
अंगप्रत्यंग सांगं च उपांगं चतुरो भवेत्॥ 441
शिरो वक्त्रं च हृदयं अंगं चेति प्रकीर्तितं।
वक्षः कर्णौ स्तनौ बाहु नाभिगुह्योदरस्तथा॥ 442
ऊरुजानुद्वयं चैव प्रत्यंगं चेति प्रकीर्तितं।
नेत्रनासात्रकर्णौ च पाणिपादौ तलांगुलिः॥ 443
जटामकुटसंयुक्तं सांगं चेति प्रकीर्तितम्।
वस्त्रोपवीतमाला च आयुधाभरणं तथा॥ 444
गंगाचंद्रमपस्मारं नागकूर्मं तथैव च।
प्रभाहीन समायुक्तं पद्मबंधं तथैव च॥ 445
आसनाभरणं चैव उपांगं चेति कीर्तितं।
शिल्पिस्पर्शेषु कार्येषु पूजाहीने तथा भवेत्॥ 446
तस्कर स्पर्शने वापि चोरोच्छापनके तथा।
प्रमादाद्भूमिपतिते उत्सवे पतिते तथा॥ 447
पूजाहीने तथा मासे स्नपनं शांति होमकं।
पूजामासोर्ध हीने तु पूजायां तु महामुने॥ 448
प्रोक्षणं संप्रकर्तव्यं जलाधिवासनं विना।
उत्सवाद्यूर्ध्व हीने तु कुर्यात्संप्रोक्षणं तथा॥ 449

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वमासेषु कर्तव्यं संप्रोक्षणविधिर्भवेत्।
तिथिवारं च नक्षत्रं निरुपेक्षं तु कारयेत्॥ 450
रत्नन्यासादि शयनं कुर्यात्सर्वकर्मणि।
पूजाहीनात्तु वर्षोर्ध्वं प्रतिष्ठायां प्रोक्षणं॥ 451
रत्नन्यासाक्षिमोक्षं च जलाधिवसनं विना।
अन्यानि सर्वकार्याणि पूर्वोक्त लक्षणैरुत॥ 452
(p.L.29) मासे प्रोष्ठपदे चैव आषाढे मार्गशीर्षके।
पूजयित्वा विशेषेण शेषाणां प्रोक्षणेऽपि च॥ 453
पूर्वपक्षे तु पुण्यर्क्षे यजमानानुकूलके।
(र्पयेत्) अंकुरार्पयेत् पूर्वं प्रोक्षणं च विशेषतः॥ 454
प्रासादस्याग्रके वापि याम्ये वा पावके तथा।
ऐशान्ये पश्चिमे वापि मण्डपं तु युगाग्रकं॥ 455
नव सप्त पञ्च हस्तं वा उत्तमो मध्यमाधमाः।
षोडशस्तंभ संयुक्तं युगद्वार समन्वितम्॥ 456
पूर्वोक्त लक्षणैर्युक्तं चतुस्तोरण भूषितं।
मण्डपं नवभागं तु मध्ये वेदिं प्रकल्पयेत्॥ 457
रत्निमात्रोच्छ्रयं कुर्यात् षोडशांगुलमेव च।
गोमयालेपनं कृत्वा दर्पणोदरसंनिभः॥ 458
कुण्डानि परितः कुर्यात् माकुषे तु पदे क्रमात्।
नवाग्निर्वाथ पञ्चाग्नि एकाग्निर्वा विशेषतः॥ 459
तद्दिशासु चतुरश्राणि विदिशासु स्वब्जकुण्डकं
शक्रशांकरयोर्मध्ये वृत्तं प्रायानकं कुरु॥ 460
पञ्चाग्न्यायतनं चेत्तु अब्जकुण्डं तु वर्जयेत्।
प्रत्येकं व्याहृति हुत्वा आज्येन तत्र कल्पयेत्॥ 461
पूर्णाहुति ततो हुत्वा मूर्तिमंत्रेण हूयते।
जयादिरभ्याधानं च राष्ट्रभृच्च क्रमाच्चरेत्॥ 462
स्विष्टमग्नेति मंत्रेण जुहुयात्तदनन्तरे।
वास्तुहोमं ततः कृत्वा समनीय पदेषु च॥ 463
गंध पुष्पं च धूपं च दीपमर्घ्यं हृदाचरेत्।
वेदीस्थदेवता हृत्य स्नानवेद्यां तु विन्यसेत्॥ 464
सद्योजातेन मंत्रेण आवाहनं प्रकल्पयेत्।
वामदेवेन संस्थानं अघोरेण तु सन्निधिः॥ 465

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पाद्यमाचमनं चार्घ्यं एतन्मंत्रेण दापयेत्।
अष्टत्रिंशत्कलायोगं महेशं बीजहृन्न्यसेत्॥ 466
प्राणप्रकृतियोगं तु ध्यात्वा रूपं तु चिन्तयेत्।
p.2-30) वेदिका कुंभमुद्धृत्य ईशाने चाभिषेचयेत्॥ 467
गौरीं शिरोर्पणं कुर्यात् स्थापयेत्तु शिवांभसा।
विद्येश कुंभमुद्धृत्य स्वस्वमंत्राभिषेचयेत्॥ 468
प्रोक्षण्यां तु स्नपनं यथावृत्तानुसारतः।
गन्धपुष्पं च धूपं च दीपं चैव हृदा बुधः॥ 469
फलशौविशमुद्धृत्य शिवलोके महीयते।
इति कारणे प्रतिष्ठा तंत्रे प्रोक्षणविधिपटलः॥ 470

श्री तनुनाथेश्वराय नमः

हरिः ओं शुभमस्तु जीर्णोद्धारं काश्यपे = 471
p.2-31
जीर्णोद्धारविधिं वक्ष्ये स्थानहीनानि कालके।
सागरे नदिवासेन चोररोगभयावहे॥ 472
स्त्वा) केचिदाचार्य हस्ते तु स्थित्वा देशं विधीयते।
चत्वारिंशतिश्चैव शतहस्तं तु कारयेत्॥ 473
विंशत्त्रिंशति त्रिदण्डैः चत्वारिंशति दण्डकं।
पञ्चादशाधिका विंशत् त्रिंश श्रेष्ठोस्तु वर्धनात्॥ 474
उत्तरापूर्व वृद्धिस्स्यात् कर्तव्य पुराविधिः।
कर्तापि वृद्धिं कुर्यात् श्रीसौभाग्यकरं परं॥ 475
पूर्वतो वृद्धिं चैव दीपराजगुणं भवेत्।
दक्षिणे वृद्धिं कुर्यात् यमदेशं प्रयाति च॥ 476
पश्चिमे वृद्धिं चैव पदारित्रैं करोति सः।
ईशाने वृद्धिं चैव आयुरारोग्यवर्धनं। 477
कर्तव्यं तु) अन्यकोणेषु कर्तव्यं महद्भये ~~पूर्वे च उत्तरे~~।
पूर्वे चोत्तरे देशे शुभदं मुनिवाचकैः॥ 478
लिंगे बेरे च पीठे तु पीठवैकल्य कल्पयेत्।
अम्बाग्निप्रदेशे तु वल्मीके मध्यगं भवेत्॥ 479
चोरवायग्नि बाधानां परचक्रस्य साधके।
मूषिका सर्पगोरक्षि दन्तस्य हानिवानिवत्॥ 480
एतन्दूष्यन्तथा काले प्रायश्चित्तं भवक्रिया।
मूषिके मध्युलिङ्सर्पं पाने प्रायश्चितकं भवेत्॥ 481

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुण्याह मुख्य विप्रस्य होमं कृत्वा द्विजोत्तमः।
दस्य) प्रासाद्य इदं प्रोक्तं प्रतिमां वै कल्प्य कल्पयेत्॥ 482
प्रतिमां पूजयेन्नारः शूलस्थापन भोजनं।
शूलिनी हस्त जंघायां डाह्य दंतस्तु हानिकं॥ 483
कर्णकीसं तु रासिस्यात् भाव्यं पश्चात् - - -।
शिलाशूलं तथा कृत्वा पूर्ववत्परिकल्पयेत्॥ 483
p.2.32) पूर्वमंगल विहीनस्यात् प्रधानांगस्य पूर्ववत्।
पूर्वशास्त्रमिदं कृत्यं कृत्यमन्यत्रवत् क्रमात्॥ 484
पीठहीनं तथा दूष्यं पश्चात्पीठं तु कर्म च।
पीठहीनं तु बेरस्य इदं पश्चात्कृतं बुधः॥ 485
पूर्वबेरं प्रतिष्ठाप्य सर्वसंपत्करायच।
बेरहीनं तु पीठांतं द्विविधं स्यात्पुरोविधं॥ 486
प्रायश्चित्त प्रकर्तव्यं लिंगानां तु विधि प्रति।
लिंगे वा स्फोटने छेदे पतिते चलितेऽथवा॥ 487
स्फोटने ग्रामनाशं स्यात् स्फुटिते दुर्भिक्ष हेतवे।
चलिते स्थाननाशं स्यात् परचक्रभयावहे॥ 488
स्वायंभुवादि लिंगानां दूषणं न प्रकारयेत्।
यत्नात्तु भूतं कर्म हर्म्यमण्डप गोपुरं॥ 489
प्राकारादीन्यवस्थानं अतिलिंगवशाद्विदुः।
सागरे नदीपार्श्वे तु पर्वताग्रे तु देशवत्॥ 490
स्वायंभुवस्य विधिवत् तद्दोषस्य विधीयते।
प्रतिमालिंगपीठं तु दूष्यभिन्नं परिग्रहम्॥ 491
बोधकामार्थकं चैव प्रायश्चित्तमलंकृतं।
पूर्ववत्पीठहीनं तु बुद्धिमान् स्थापितं ध्रुवः॥ 492
मधुना मूषिके सर्वे चलिते पतितेऽथवा।
नैऋते पतिते चैव चलिते पतिते बुध्य॥ 493
प्रायश्चित्तं प्रकर्तव्यं ब्राह्मणैर्वेदपारगैः।
सर्ववाद्यैश्च घोषैस्तु स्थपत्याचार्ययोगतः॥ 494
पूर्वकर्म समाप्तानं सर्वद्रव्यैस्तु वाबुधः।
प्रासादस्य विहीनेन त्याज्यं पश्चात्पुरोविधिः॥ 495

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हसनं सोमकाले तु शुभं होरामुहूर्तके।
शुभपक्षे शुभर्क्षे तु स्थारयोगकृतं बुधः॥ 496
जीर्णोद्धारमिदं कृत्यं बुद्धिमानपि तं प्रभुं।
प्रासादकृति पूर्वं तु चतुरश्रं वृत्तमायतम्॥ 497
पृ) चैव) षट् पुटं चैवविस्तारं हस्तिपृष्ठाकृति पुरा।
P.2.33) नागरं द्राविडं सौम्यं वेसरं गौरिमद्भवेत्॥ 498
चतुरश्रं नागरं हर्म्यं अष्टाश्रं द्राविडं भवेत्।
वेसरं चक्रवृत्तं तु ग्रीवोर्ध्वं विनिपद्यते॥ 499
औमाख्यं तु शिखावृत्तं मंदिरं गौरिमं भवेत्।
पूर्ववत् प्रासादविस्तार पूर्वं नरेऽभ्र हस्तकं॥ 500
एकभूमि यला पूर्वं पश्चादेकतलं प्रभुः।
अन्यथ्यस्तु विशालं तु हर्म्यमेकतलं वशात्॥ 501
अधिष्ठानं स्तंबकुंभ .... शिखरं परम्।
पूर्वमंगविहीनं स्यात् पूषणं तत्र देशवत्॥ 502
देशयोगविशालं तु हर्म्याकारं तु पूर्ववत्।
पूर्वन्नागरं हर्म्यं स्यात् पूर्वन्नागरमुत्तमं॥ 503
वृत्तं .... हर्म्यं स्यात्पश्चात् गौरिममुत्तमं।
एवं कृत्यमिदं शास्त्रं तावद्युञ्जीत बुद्धिमान्॥ 504
ब्रह्मादीनां तु देवानां देवीनामालयं भवेत्।
भूषणं ..... ते भाषितं पण्डितैः परे॥ 505
शास्त्रयुक्तवशात्कृत्यं शास्त्रयुक्त्यमकृत्यतः।
अलक्षणकरं कर्म कुलक्षयकरं भवेत्॥ 506
स्थानानां च शुभं मोहाल्लोकभर्तुर्विनश्यति।
दोषान् दृष्ट्वा तत्काले कर्तापद् निरीक्षितं॥ 507
प्रासादस्योत्तरे पूर्वे परभागेषु मण्डपे।
सुमुहूर्ते सुनक्षत्रे पूर्ववत्स्थपतिना सह॥ 508
तत्काले पूर्वकेयाग्नि बाणयातुनवा भवेत्।
कर्तव्यं दिवसं प्रोक्तं अंकुरार्पण पूर्ववत्॥ 509
तावत्कर्म तला कृत्यं क्रमात्सर्वेषु धामसु।
ततः) वक्ष्यते, संप्रोक्षणं कृत्वा प्रतिष्ठां कारयेद्बुधः॥ 510
यस्मिन् देशे प्रकाशे तु तत्रैवाभिमुखं भवेत्।
स्वस्थाने भवनं कल्प्य बेरयुक्तं तु योजयेत्॥ 511

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पौराणिकेव पौर्षके क्षेत्रे तु सुहृदः क्रमात्।
p. 2. ग्रामाशमनमते हर्म्ये यजमानं चलो भवेत्॥ 512
तस्माद्देशमदेशं वा संस्थाप्य परमेश्वरम्।
यजमाने च यावापि तत्र स्थाने विशेषतः॥ 513
पुनस्संस्थापयेन्मंत्री विधिना पूर्वचोदितं।
स्थाप्य बेरं शुचौ देशे भवनं कारयेत्ततः॥ 514
प्रतिष्ठाकर्मकार्येण पूर्वमेवं क्रमेण तु।
हर्म्ये च गोपुरे द्वारे भित्तिप्राकारमेव च॥ 515

इति काश्यपे जीर्णोद्धारविधिपटलः।
श्री तन्दुनालेश्वराय नमः॥ 516

उपानादि गलवर्गन्तु सर्वावयवसंयुतं।
शिरश्शिखाविहीनं चेत् आलयं प्राणवर्जितं॥ 517
ततश्च बेरं शूलं वा स्थापनं न च कारयेत्।
कारयेच्च तदारण्यमाभिचारकमुच्यते॥ 518
ग) तद्ग्रामि च कर्ता च विनाशमचिराद्ध्रुवम्।
तस्मात्सर्वप्रयत्नेन शिखरं सम्यगाचरेत्॥ 519
समाहविधिनाचैव इष्टिका पञ्चविन्यसेत्।
स्थूपि शूलं प्रतिष्ठाप्य जीवसूक्तेन मंत्रवित्॥ 520
क्षे) पश्चाद्बेरं तु शूलं वा स्थापनं सम्यगाचरेत्।
तस्यैव स्थापने हीने दोषान् वक्ष्ये यथाक्रमं॥ 521
ततः संवत्सरे हीने राक्षसस्थानमुच्यते।
द्व्यब्दे यक्षाधिवासस्तु त्र्यब्दे तु भूतसंयुतं॥ 522
चतुरब्दे पिशाचानां पञ्चाब्दे दानवालयम्।
षष्ठवर्षे त्वतीते तु वसेयुः ब्रह्मराक्षसाः॥ 523
तस्य प्रवेशमात्रेण राजा राष्ट्रं विनश्यति।
तद्ग्रामवासिनां पुंसां ब्राह्मं तेजो विनश्यति॥ 524
अन्नहानि विवादश्च स्वयमेव समुद्भवेत्।
तत्र क्रुद्धो भवेद्देवो विनाशं चापि कारयेत्॥ 525
स्वचक्रं परचक्रं वा दुर्भिक्षेण विनश्यति।
एवं दोषं समालोक्य निष्कृतिं च समाचरेत्॥ 526

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p.2.35) उपन्यासोक्तमार्गेण शिवधामसमाचरेत्।
तस्मात्सर्वप्रयत्नेन पश्चात्स्थापनमाचरेत्॥ 527
इति योगजे जीर्णोद्धारविधिपटलः॥
श्री तनुनालेश्वराय नमः॥ 528
अनन्तवक्ष्ये विशेषेण जीर्णोद्धारविधिक्रमं।
सर्वपापहरं पुण्यं शुभदं पापनाशनम्॥ 529
प्रमादाज्जीर्णहीने तु वर्जयेत्तु विशेषतः।
उपानस्थूपिपर्यन्तं जीर्णहीनं तु वर्जयेत्॥ 530
पूर्वं तु कृष्णं वर्णं स्यात् द्वितीयं श्वेतवर्णकं।
पूर्वपीठं समादाय वर्जयेद्ग्रामनाशनम्॥ 531
पीठजीर्णे तु हीनं स्यात्तत्पीठं लिंगमानकं।
लिंगपीठसमं कुर्याद्द्वितीयमेकवर्णकम्॥ 532
सं) कर्णिकं श्वेतलिंगं वर्णं स्यात्सानुग्राह्यं समाचरेत्।
पूर्वस्थानं समादाय लिंगे स्थानं समाचरेत्॥ 533
श्वेतलिंगं समाश्रित्य ब्राह्मणक्षत्रियो भवेत्।
वैश्यशूद्रौ च वर्णानां कृष्णलिंगं समाचरेत्॥ 534
कृष्णं श्वेतं तथा रूपं द्वितीये त्वेकरूपकम्।
श्वेतं स्थापितसंयुक्तं ब्राह्मणक्षत्रियस्तथा॥ 535
कृष्णलिंगं समाश्रित्य शोभनं शूद्रमेव च।
स्थापनीनां कुस्थापनं तु शास्त्रकर्म इहोच्यते॥ 536
ज्ञानशक्त्यात्मके लिंगे क्रियाशक्तिश्च पीठिका।
पीठसंधानके वक्त्र आचार्यशिल्पिभिस्सह॥ 537
जीर्णोद्धारं समाश्रित्य शिल्पिकर्म इहोच्यते।
शिलापरीक्षासंयुक्तं पर्वताग्रं समाचरेत्॥ 538
लिंगं कृष्णं न वर्णं स्यात् पीठं वा कृष्णवर्णकं।
एकरूपाविधिः प्रोक्तः जीर्णोद्धारं प्रकल्पयेत्॥ 539
स्वयंभुवे बेरलिंगानां तच्चक्रीनां विशेषतः।
स्वायंभुवे दैविके तु जीर्णोद्धारणकं विना॥ 540
p.2-36 पूर्वन्तु पूजयेल्लिंगं शल्यं शकलं शल्यमेव वा।
शल्किकाकारकं कुर्याद्गोलकापट्टबंधनम्॥ 541
गोलकाकारबंधं च प्रतिष्ठाक्रममिहोच्यते।
विधिवत्पूजयेत्सम्यक् सर्वालंकारभूषितं॥ 542
अन्यथा लिंगसंप्राप्तिरासुरं राक्षसं भवेत्।
प्रमादाज्जीर्णितं प्रोक्तं तद्ग्रामं तु विनश्यति॥ 543

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दारुजं भित्तिचित्रेण मंत्ररूपमिहोच्यते।
स्थापनं वर्जयेत्तु (यस्तु) राजाराष्ट्रं विनश्यति॥ 544
स्थाननाशं समाश्रित्य तद्ग्रामं तु विनश्यति।
प्रासादं वर्जयित्वा तु पूजानिष्फलमाप्नुयात्॥ 555
सर्वसंपूजितं मासं पुनस्संस्थानमाचरेत्।
सर्वसिद्धिकरं पुण्यं सर्वरोगविनाशनम्॥ 556
सर्वशत्रुक्षयकरं तद्ग्रामं शांतिकं भवेत्।
अन्यस्थाने तु लिंगानां स्थापनं तु समंततः॥ 557
श्रेष्ठं हि स्थापनं प्रोक्तं मंत्रकर्म इहोच्यते।
श्वेतं तज्जीर्णहीनेन कृष्णेन स्थापनं भवेत्॥ 558
प्रमादं जीर्णयित्वा तु राजा राष्ट्रं विनश्यति।
देवता पूजयेत्तत्र शिवलोके महीयते॥ 559
इत्युपभेद कारणे प्रतिष्ठातंत्रे जीर्णोद्धार-
विधि पटलः॥ 560 //

अंशुना विधिना पश्ये जीर्णोद्धारविधिक्रमं।
सर्वपापहरं पुण्यं सर्वसिद्धिकरं शुभम्॥ 561
नृपशत्रुक्षयकरं शीघ्रं राज्ये दुर्भिक्षनाशनं।
गोपुरे मण्डपे चैव परिवारालये तथा॥ 562
मालिके मण्डपे चैव प्रांगणे चान्यमण्डपे।
यत्काले यज्जीर्णं तु तत्कालोद्धारणं कुरु॥ 563
गोपुरे मण्डपे चैव मालिके प्रांगणे तथा।
संकोच क्रममार्गेण विमानेषु सुयोजयेत्॥ 564
ब्राह्मणं मध्यकुंभे तु इन्द्रादीनष्टकुंभके।
न) परिवारालये जीर्णे बालस्थानं कारयेत्॥ 565
यदि संकोचमार्गेण मूलबेरे सुयोजयेत्।
p.2.37) उक्तं चेदन्यकर्माणि तत्कर्माणि विनाचरेत्॥ 566
कारयेद्यदि मोहेन राजा राष्ट्रं विनश्यति।
शांतिस्तदर्थं कर्तव्यो तद्दोषविनिवृत्तये॥ 567
पूर्वोक्त विधिमार्गेण कारयेद्देशिकोत्तमः।
द्वारमण्डपजीर्णं चेत् संकोचं पूर्ववत्कुरु॥ 568
पुण्याहं पंचगव्यं च स्नपनं वासरं कृतम्।
नासाग्रं चैव कर्णाग्रं गात्राभरणमेव च॥ 569
हीनं चेद्यवमात्रं वा अंगुलं च द्वयंगुलं।
सोत्कृष्टेन सुवर्णेन अस्त्रबीजैस्तु बंधयेत्॥ 570

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भ्रूरेखा च चक्षुरेखा च ओष्ठाग्रं चिबुकं तथा।
कण्ठं वाऽथ ललाटं वा शैलादि प्रतिमासु च ॥ 571
सूक्ष्मशास्त्रेण मतिमान् समं कृत्वा सलक्षणं।
प्रोक्षण क्रम मार्गेण कारयेद्धरमुत्तमम् ॥ 572
अलक्षणं च जीर्णं च नस्थितं शंकराज्ञया।
स्वायंभुव विमानस्य भेदमस्ति न संशयः॥ 573
एक द्रव्येण निर्माणं स्वायंभुवमिति स्मृतं।
यत्काले जीर्णमेवं चेत् तद्धामकृद्विशेषतः॥ 574
तद्द्रव्येण समं कृत्वा हीनाधिक्यं न कारयेत्।
कारयेद्यदि मोहेन राजा राष्ट्रं विनश्यति॥ 575
शोभार्थमुन्नतार्थं च अन्तर प्रस्तरं कृतम्।
अनावर्तक्रमेणैव कारयेद्देशिकोत्तमः॥ 576
य) पञ्जरास्तु तत्काले सारदारुकन् प्रशस्यते।
तबकं चंदनं चैव मधूकं खदिरं तथा॥ 577
निंबमौदुंबरं शीघ्रं वेणुतालं च संग्रहेत्।
गर्भगेहं तु पञ्चांगं कृत्वा काले विचक्षणः॥ 578
व्यासन्तु युगभागांत दुत्सेधं कल्पयेत्समं।
ताराधं चैकपादं स्यात्त्वर्धयेत् पञ्जरोगतः॥ 579
घटाभिषेकंपूर्णे तु पञ्जरं विन्यसेद्बुधः॥
तत्तत्कालेषु कर्तव्यं उत्सवं तु महोत्सवं॥ 580
P.2·38) नित्यार्चनादि पूजां च सामं तत्र सलक्षणं।
इत्युत्तरस्वायंभुवे जीर्णोद्धारविधि पटलः। 581
श्री तनुनालेश्वराय नमः।

अतः परं प्रवक्ष्यामि जीर्णोद्धार विधिक्रमं॥ 582
भवने मण्डपे चैव लिंगबेरे तु पिण्डिके।
प्राकारे गोपुरे चैव अन्येषु पिण्डिकेषु च॥ 583
स्वायंभुवादि लिंगेषु जीर्णोद्धारं न कारयेत्।
अज्ञानान्मोहतो वापि राजाराष्ट्रं विनश्यति॥ 584
प्रतिष्ठा क्रममार्गेण प्रतिष्ठां कारयेद्बुधः।
अखण्डं चे द्विमानत्वात् बहुखण्डं यशोबेरं॥ 585
एक द्रव्येण निर्माणं धामस्वायंभुवे स्मृतं।
तस्यैव जीर्णिते काले तमेवं बंधयेद्दृढम्॥ 586
अन्यद्रव्यकृतं चेत्तु राजाराष्ट्रं विनश्यति।
जलं संप्रोक्षणं कृत्वा शास्त्रोक्तविधिमार्गतः॥ 587

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुरुषेषु च एकांग हीनकं यदि वा भसु।
तद्द्रव्येण समं कृत्वा संप्रोक्षणमथाचरेत्॥ 588
सर्वांगानां क्षयं दृष्ट्वा प्रासादस्य विशेषतः।
तद्द्रव्येणैव कुर्याच्च पूर्वोक्तविधिना सह॥ 589
प्रवरद्रव्येण कं कुर्यात् यथा वित्तानुसारतः।
लक्षणस्य विधानस्तु व(प)रद्रव्येण यत्कृतम्॥ 590
तस्मात्सर्वप्रयत्नेन हीनं चैव न कारयेत्।
प्रतिष्ठाविधिमार्गेण प्रतिष्ठां कारयेद्बुधः॥ 591
मृण्मयं दारुजं वापि लोहजं वा शिलामयं।
स्थापितं पूजितं बेरं जीर्णं वा हीनमेव वा॥ 592
गजं छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत्।
पूजयेद्यदि मोहेन राजा राष्ट्रं विनश्यति॥ 593
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा।
P. 2. 39) प्रक्षिप्य मृच्छिरच्चमय प्रतिमां कारयेन्नवं॥ 594
मृन्मयं चेन्मया कुर्यात् दारुजे दारुणा कुरु।
लोहजं यदि लोहेन शिलायां शैलजं यदि॥ 595
यदि कुर्याद्विशेषेण बलिभिर्द्विमिश्रितः।
मृण्मयाद्दारुजं श्रेष्ठं दारुजाच्छैलजं वरं॥ 596
शैलजाल्लोहजं श्रेष्ठं लोहजाद्रत्नजं कृतं॥
सर्वेषामपि बेराणां हेमजं बेरमुत्तमम्।॥ 597
उक्ततालप्रमाणेन कारयेद्बुधोत्तमः॥
सर्वबेरं प्रमाणेन कुर्यात्तदृढ कारयेत्॥ 598
मानोत्कृष्टं प्रकर्तव्यं अपकृष्टं न कारयेत्।
कृत्वैवं विधिवद्बेरं पुनस्थापनमाचरेत्॥ 599
पञ्चांगानां क्षयं दृष्ट्वा शिलया बंधयेद्दृढं।
शैलजेषु उपांगेषु एकद्वये चेद्धीनकं यदि॥ 600
एकांगुलप्रमाणेन हीनाधिक्यं न दोषकृत्।
क्रमेणांगसमं कुर्यात् सकलांगे तदाचरेत्॥ 601
तत्तल्लक्षणमार्गेण कुर्यात्स्वायंभुवादिके।
पौरुषेषु च लिंगेषु शैलजे शैलजे भवेत्॥ 602

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

Page no 87 - 88 repeated 3 times

जानागमोद्धारादि जीर्णोद्धारादिप्रकरणं (No. 20058

अन्यथा तु न कर्तव्यं राजा राष्ट्रं विनश्यति।
पौरुषस्यैव लिंगस्य पैण्डिकस्य च जीर्णिते ॥ 603
तत्काले चोद्धृतं पीठं समुद्रे निक्षिपेद्बुधः।
तस्य प्रक्षिप्तमानेन तत्प्रमाणाधिकं तु वा ॥ 604
कुर्याल्लिंगानुरूपं तु पीठं सम्यक्सलक्षणं।
पीठसंधानविधानेन कुर्यात्पीठं विचक्षणः ॥ 605
अष्टबन्धन विधिं कुर्यात् शास्त्रदृष्टेन कर्मणा।
स्वायंभुवादि लिंगेषु अग्निदाहं न कारयेत ॥ 606
योगक्रम विधानेन योनिमध्ये विनिक्षिपेत!
पुनस्थापनमार्गेण कुर्याद्वै देशिकोत्तमः ॥ 607
मण्डपे जीर्णिते काले पूर्वोक्तविधिना कुरु।
प्राकारे निर्मिते तत्र संधानं पूर्ववत्क्रमात्। 608
अखण्डकरणीयं चेत् अखिलं चैत्तयोद्धरेत!
प्रथमेष्टिकयान्यासे शैलजे शैलजं न्यसेत् ॥ 609
पुरातनं तु तत्कृत्वा प्राकारं न समं यदि।
P. L. 401 मुखादन्यस्तु सर्वेषु सर्वं कुर्याद्विधानतः ॥ 610
पुरातनं ~~कृत्वा~~ कालान् सलक्षणयुतं यदि।
तन्मानेन प्रकर्तव्यं सकलानपि सर्वतः ॥ 611
इष्टिका जीर्णिते देशे पुनस्संधानमाचरेत्।
श्रद्धया शैलजाभिश्चेन्मानाधिक्यं तथा भवेत् ॥ 612
एवमेव प्रकारेण गोपुरादीनि कारयेत्!
द्वारादिषु जीर्णेषु अन्यान्येवं संग्रहासनात् ॥ 613
स्थपतिश्च विशेषेण सूक्ष्मशास्त्रेण शुद्धकं।
(तक) पश्चाज्जीर्णेव संग्राह्य नवभिस्तुरुभिः क्रमात् ॥ 614
पश्चात्तत्तत् प्रदेशेषु योजयेत्स्थपनं तथा।
एवं विधिप्रमाणेन अशक्तश्चैव कारयेत ॥ 615
कृते च मालिकायां तु जीर्णकाले ततो त्वरेत्।
न संक्रमं प्रकुर्यात्तु यथालाभं तु संग्रहेत् ॥ 616
बाणलिंगस्य जीर्णे तु त्र्यंगुलादधिकं यथा।
उद्धारक्रममन्येव समुद्रे तु प्रक्षिपेद्बुधः ॥ 617
पौराणिकस्य लिंगस्य यथमात्राधिकम्।
सूक्ष्मशास्त्रेण मतिमान् कर्मकुर्यात्क्रमेण तु ॥ 618

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्चात्संप्रोक्षणं कुर्याच्छास्त्र दृष्टेन कर्मणा।
येन केन प्रकारेण न निर्दिष्टं न तिच यत्॥ 619
एतत्पौराणिकं कर्म पारंपर्येण तत्क्रमात्।
तस्य लिंगस्य जीर्णेन खण्डस्फोटादिके सति॥ 620
तस्यैव पुरतस्संयक् मिश्रलिंगं प्रतिष्ठयेत्।
यवांतरप्रमाणेन हीनं वापि न दोषकृत्॥ 621
तस्याप्यधिकहीनश्चेत्पूजाकर्म विना भवेत्।
पुनस्थापनमार्गेण कुर्यात्संवत्सरं पुनः॥ 622
पुरातनेति शास्त्राणां कल्पनं यत्पुराणकम्।
(p. 2-41) एतत्पौराणिकं नाम लिंगे ध्यान्नि प्रयोजयेत्॥ 623
पौराणिकस्य . . . . तौ यजेत्।
एतद्रव्यकृतं कर्म तत्पुराणे न विद्यते॥ 624
अष्टादश पुराणेषु लिंगं पौराणिकं स्मृतं।
मूलशास्त्रविधानेन कुर्यात्पौराणिकं विधिं॥ 625
महाबेरेषु यल्लिंगं जीर्णितं यदि संभवेत्।
तदंगात् पुनः कुर्यात् संधानं तस्य वस्तुना॥ 626
उत्तमांगविहीनेतु तद्रूपं चाग्निना दहेत्।
पुनस्स लक्षणं कुर्यात् तद्रूपं च विशेषतः॥ 627
अष्टाविंशति भेदैश्च समानं शिल्पशास्त्रतः।
जीर्णोद्धारविधिः प्रोक्तः बालस्थान विधिं शृणु॥ 628
इति बिंबागमे जीर्णोद्धार विधि पटलः। //

अधुना विधिना चैव जीर्णोद्धार विधिं शृणु॥ 629
लिंगस्य प्रतिमायां च पिण्डिकायां तथैव च।
विमानस्य च जीर्णस्य नवीकरण कर्म च॥ 630
अन्येषामपि जीर्णानां वल्मयचाविष्टशादिषु।
जीर्णमुद्धृत्य संसृज्य . . . तितिषुत्यकत्वत्रयाविधि॥ 631
गतागतं च कृत्वा तु स्थानादित्यमण्डलात्।
आमिषग्रहणार्थाय चरे तैत्तर्य पक्षिवत्॥ 632
मन्त्रकार्पित रागाश्च सदा कांक्षंति देवताः।
ततोर्कमण्डलं प्राप्य शापयेतान्न संशयः॥ 633
तस्मात्क्षिप्रं प्रकर्तव्यं नवीकरणमेव च।
मूलालय प्रमाणेन कर्तव्यं तरुणालयम्॥ 634

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अर्धं वा च त्रिपादं वा तरुणोक्तविधानतः।
मूलालये यथाद्वारं प्रतिद्वारं विशेषतः॥ 635
बालालयस्य द्वारस्स्यात् पूर्ववत्पूजनं नयेत्।
चतुर्द्वारयुते यत्तु तथा द्वारादि पूजनम्॥ 636
प्रतीच्यां च यथा द्वारं तत्रेशं पुरुषं स्मरन्।
तस्मात्सर्वप्रयत्नेन नित्यपूजादि पूजनं॥ 637
ततो मूलालये प्राप्य पूर्वमेव क्रमेण तु।
एवं बालालयं प्रोक्तं बाललिंगस्य कथ्यते॥ 638
यथा- लोकवृक्षेण बाललिंगं प्रकल्पयेत्।
मूललिंगस्य पूजांशं त्रिभागैकांश निर्मितं॥ 639
तथाहसममेव स्यात्सुवृत्तं सूत्रवर्तितम्।
P. 2. 42) स्थूललिंगस्य तद्द्वारं तल्लिंगे योजयेत॥ 640
पीठाग्रे . . . . बे वा यथा गुप्ति यथा रुचि।
विमाने स्थापने काले यथापूर्वं नियोजयेत्॥ 641
मानुषादिषु लिंगेषु विमानेष्वेवमाचरेत्।
सकलादिषु जीर्णेषु मूललिंगे सुयोजयेत्॥ 642
मानुषादिषु लिंगेषु सकले वा सुयोजयेत्।
एवमादीनि कार्याणि तत्तत्काले समाचरेत्॥ 643
एवमुद्धारणं प्रोक्तं शेषं पूर्ववदेव हि।
मूलालय प्रवेशान्ते दारुलिंगं च दाहयेत्॥ 644
अथवा सम्य- वं तु जले वापि स्थलेऽपि वा।
शान्तिहोमं ततः कृत्वा शान्त्यंते दिन संख्यया॥ 645
इत्युत्तरस्वायंभुवे जीर्णोद्धारविधिपटलः।

सर्वांगानां क्षयं दृष्ट्वा प्रासादस्य विशेषतः॥ 646
तद्द्रव्येणैव कुर्यात्तु पूर्वोक्त विधिना सह।
वरद्रव्येण कुर्याद्वा यथा वित्तानुसारतः॥ 647
सलक्षणस्य धाम्नस्तु वरद्रव्येण संस्कृतं।
तस्मात्सर्वप्रयत्नेन हीनञ्चैव न कारयेत्॥ 648
प्रतिष्ठाविधिमार्गेण प्रतिष्ठां कारयेद् बुधः।
मृण्मयं वा दारुजं श्रेष्ठं लोहजं वा शिलामयं॥ 649
स्थापितं पूजितं बेरं जीर्णं वा भिन्नमेव वा।
छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत्॥ 650

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रजयेद्यदि मोहेन राजा राज्यं विनश्यति।
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा॥ 651
प्रक्षिप्य मृद्भिराच्छाद्य प्रतिमां कारयेन्नवम्।
मृण्मयं च मृदा कुर्याद्दारुजे दारुणा कुरु॥ 652
लोहजं यदि लोहेन शिलया शैलजं यदि।
यदि कुर्याद्विशेषेण बलवृद्धिस्ततस्ततः॥ 653
मृण्मयाद्दारुजं श्रेष्ठं दारुजाच्छैलजं वरम्।
शैलजाल्लोहजं श्रेष्ठं लोहजाद्रत्नजं शुभं॥ 654
सर्वेषामपि वस्तूनां हैमजं बेरमुत्तमं।
उक्तताल प्रमाणेन कारयेद्बेरमुत्तमम्॥ 655
सर्वं बेरप्रमाणेन कुर्याद्धामं कारयेत्॥
मानोत्कृष्टं प्रकर्तव्यं अपकृष्टं न कारयेत्॥ 656
कृत्वैवं विधिना बेरं पुनस्थापनमारभेत्॥
स्वायंभुवस्य लिंगस्य पिण्डिकस्य च कीर्तिते॥ 657
इष्टिका यास्तु जीर्णे तु पुनस्संधानमाचरेत्॥
पञ्चांगानां क्षयं दृष्ट्वा शिलायां वर्धयेद्दृढम्॥ 658
शैलजेष्वप्युपांशेषु एकश्चेद्धीनकं यदि।
एकांगुल प्रमाणेन हीनाधिक्यं न दोषकृत्॥ 659
तमेवांगं समं कुर्यात् सकलांगे तथोद्धरेत्।
तत्तल्लक्षणमार्गेण कुर्यात्स्वायंभुवादिके॥ 660
पौरुषेषु च लिंगेषु शैलजे शैलजं भवेत्।
अन्यथा तु - - - - राजा राष्ट्रं विनश्यति॥ 661
पौरुषस्य च लिंगस्य पिण्डिकस्य च जीर्णिते।
तत्कालोद्धृतं पीठं समुद्रे निक्षिपेद्बुधः॥ 662
तस्य लक्षणमानेन तत्प्रमाणाधिकं तु वा।
कुर्याल्लिंगानुरूपं च पीठं सम्यक्सलक्षणं॥ 663
पीठबंध विधानेन कुर्यात्पीठं विचक्षणः।
अष्टबंध विधानेन कुर्यात्पीठं विचक्षणः॥ 664
अष्टबंधं विधिं कुर्यात् शास्त्रदृष्टेन कर्मणा।
p. L. 43) स्वायंभुवं च लिंगेषु अग्निदाहं न कारयेत्॥ 665
योनिकर्म विधानेन योनि मध्ये विनिक्षिपेत्।
पुनस्थापनमार्गेण कुर्याद्वै देशिकोत्तमः॥ 666

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बाणलिंगस्य जीर्णे तु त्रियं स्फाटिकं तु वा।
उद्धारक्रममार्गेण समुद्रे निक्षिपेद्बुधः॥ 667
अन्य द्वा बाणलिंगं वा स्थापयेद्विधिना बुधः।
पौराणकस्य लिंगस्य यज्ञमानं क्षयं यदि॥ 668
.. शास्त्रेण मतिमान् कर्म कुर्यात्क्रमेण तु।
पश्चात्सं प्रोक्षणं कुर्याच्छास्त्र दृष्टेन कर्मणा॥ 669
इति सूक्ष्मशास्त्रे जीर्णोद्धारपटलः ---। //

कामिके॥ स्फुटिते खण्डिते भिन्ने नाशिते शनिनाग्निना॥ 670
उन्मत्तैश्चैव चोरैश्च नाशिते शत्रुभिस्तथा।
सरित्स्रोतकरीभ्यां वा म्लेच्छैर्वापि जीर्णिते॥ 671
क्षेत्रजीर्णे यथा क्षेत्री कृत्वा न प्रतिपद्यते।
तथा जीर्णानि वस्त्राणि सद्यो मुञ्चति देवताः॥ 672
तं दृष्ट्वा भूतवेताल पिशाचा ब्रह्मराक्षसाः।
प्रेता - - - - - .. न्यत्वा दाश्रयंति न संशयः॥ 673
राष्ट्र ग्रामनृपाणां च स्थपकस्य मंत्रिणः।
कुर्वन्त्यतिशयं ह्यग्र दुर्भिक्षं मरणं ध्रुवम्॥ 674
अर्चितं चेन्निहंत्याशु निहन्त्याशु न पूजितं।
तस्मादुद्धारणं चाशु विधि दृष्टेन कर्मणा॥ 675
तस्मात्सर्वप्रयत्नेन जीर्णोद्धारं समाचरेत्।
बेर विषये भ्रू रेखा पक्ष्मरेखा च नासिका॥ 676
एतेषां च क्षयं दृष्ट्वा प्रतिमां परिवर्जयेत्।
तद्बेरं तु परिग्राह्य समुद्रे तु विनिक्षिपेत्॥ 677
लिंगं वा प्रतिमां हर्म्यं मण्डपं गोपुरं तु वा।
प्राकार परिवारं वा ये जीर्णास्ते सलक्षणाः॥ 678
तेन द्रव्येण चोत्कृष्टैः पूर्ववत्परिकल्पयेत्।
प्रतिष्ठा विधिमार्गेण प्रतिष्ठां कारयेद्बुधः॥ 679
इति सुप्रभेदे क्रियापादे जीर्णोद्धारपटलः।

काश्यपे॥ भ्रू रेखा पक्ष्मरेखा वा आस्य रेखा विलिंगके॥ 680
सन्त्यज्य सहसा बेरं स्थापयेत्पूर्ववन्नवं।
बेरे) लोहजे मण्डपे बेरे हस्तनास्यांघ्रि भूषणे॥ 681
कर्णदन्त विहीने तु तत्तद्द्रव्यैः दृढीकृतम्।
उत्तमांगविहीने तु त्यक्त्वा पूजयेन्नरम्॥ 682
इति काश्यपे जीर्णोद्धारपटलः।
लोहजं शैलजं लिंगं दारुजं मृण्मयं तु वा॥ 683

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कारयेत्तु विशेषेण लक्षणोक्तेन देशिकः।
शमी बिल्व मधूकैश्च अश्वत्थोदुंबुरैस्तथा॥ 684
बाललिंगं प्रकर्तव्यं मृण्मयश्चेत्सुपक्वकम्।
इति मयमते जीर्णोद्धारपटलः॥
भ्रूरेखा पक्ष्मरेखा चास्यरेखा च नासिका॥ 685
सर्वांगानां क्षयं दृष्ट्वा प्रतिमां विसर्जयेत्।
लोहजानां तु सर्वेषां अंगहीने तु संभवे॥ 686
तद्देहं पुनः कार्यम् मुखहीनं न कारयेत्।
नाभिहृदयमहीने तु संधानं न समाचरेत्॥ 687
मृण्मये वस्त्रहीने चेत् पुनः कृत्वा समारभेत्।
भिन्नं भिन्नं पुनः ग्राह्यं जीर्णं चेत्तु नवीकृतम्॥ 688
प्रतिमाशूलहीनं तु जीर्णोद्धारं तु कारयेत्।
इति रौरवे जीर्णोद्धारपटलः — ॥ 689
शैलजं ध्रुवबेरं यत् अंगहीनं भवेद्यदि।
तद्बेरं च समादाय समुद्रे प्रक्षिपेत्तथा॥ 690
(p.2.44) शिलामयं गृहीत्वान्यं शिलाग्रहणमागतः।
स्नापयित्वा विशेषेण पूर्ववत्कारयेद्बुधः॥ 691
तत्रैव मृण्मयं दारुजं वापि लोहजं तु शिलामयं।
स्थापितं पूजितं बेरं समुद्धृत्य जलेऽपि स्थानेऽपि वा॥ 692
छिन्नं वाप्यग्निदग्धं वा दृष्ट्वा बेरं न पूजयेत्।
पूजयेद्यदि मोहेन राजाराष्ट्रं विनश्यति॥ 693
तस्माद्बेरं समुद्धृत्य जले वापि स्थलेऽपि वा।
प्रक्षिप्यात्र समाच्छाद्य प्रतिमां स्थापयेन्नवम्॥ 694
मृण्मयं चेन्मृदा कुर्यात् दारुजं चेद्दारुणा कुरु।
लोहजं यदि लोहेन शिलायाः शैलजं कुरु॥ 695
? इति मयमते जीर्णोद्धारपटलः।
अथ वक्ष्ये विशेषेण जीर्णोद्धारविधिक्रमः॥ 696
स्वायंभुवं दैविकं च दिव्यमार्षमानुषम्।
राक्षसं बाणलिंगं च सद्यस्थलिंगमुच्यते॥ 697
स्वायंभुवादि जीर्णस्य लक्षणं वक्ष्यतेऽधुना।
छिन्ने च स्फुटिते च भग्ने भिन्ने च खण्डिते तथा॥ 698
नाशिते चलिते चैव उन्मत्ते चोरकेऽपि।
त्रिभागवर्तिते भिन्ने शेषशैलं शिलोद्धृतं॥ 699

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वैणवं कुरवदाकारः पातालाकृतिमेव च।
लिंगे स्वायंभुवादौ तु उद्धारश्चोत्तर क्रिया॥ 700
पट्टबंधैस्ततः कृत्वा प्रायश्चित्तं तु कारयेत्।
स्वायंभुव विशेषेण सर्वदोषो न विद्यते॥ 701
तद्दोषशमनार्थाय प्रायश्चित्तं विशेषतः।
स्वायंभुवमिति प्रोक्तं आर्षकं लिंगमुच्यते॥ 702
पतितैः पातकैः दुष्टैः चण्डालैः स्पर्शने तथा।
लिंगे च खण्डिते चैव स्फुटिते चलिते तथा॥ 703
प्रमादैर्बुद्धि वैषम्यात् द्रव्येणाबंधयेत्ततः।
माषं माषद्वयं चैव तिलं तिलद्वयं तथा॥ 704
निर्दोषमिति विख्यातं आर्षिकं वर्जयेद्बुधः।
प्रायश्चित्तं विशेषेण कारये देशिकोत्तमः॥ 705
आर्षकं लिंगमित्युक्तं दिव्यलिंगमतश्शृणु।
भिन्ने च खण्डिते चैव स्फुटिते भग्नकेऽपि च॥ 706
मूले मध्ये तथाग्रे तु छिन्ने वापि विवर्जयेत्।
र्णे) सर्वैरंगैर्विजीर्णं [illegible] र्णं, ... ॥ 707
कर्णादि सर्वं चैकत्र गोमुखायास्तथैव च।
वर्जयेत्तु प्रयत्नेन क्षयाखण्डं च पिण्डिका॥ 708
दिव्यलिंगमिति प्रोक्तं मानुषं च ततः शृणु।
भिन्ने च खण्डिते चैव स्फाटिते भग्नकेऽपि वा॥ 709
तिलकद्वयमेवं च आढकद्वयमेव वा।
निर्दोषमिति विख्यातं आर्षिकं वर्जयेद्बुधः॥ 710
रेखामात्रं केशरेखां तस्यां ते लिंगपार्श्वयोः।
जीर्णा कर्णादि सर्वं चेत् गोमुखायास्तथैव च॥ 711
वर्जयेत्तु ततो मन्त्री छित्वा खण्डश्च पिण्डिका।
मानुषं लिंगमित्युक्तं राक्षसं च ततः शृणु॥ 712
भिन्ने च खण्डिते चैव स्फुटिते भग्नकेऽपि च।
प्रमादाद्बुद्धि वैषम्याद्द्रव्याणां बंधयेत्ततः॥ 713
यवं यवद्वयं वापि तिलं वा माषमेव वा।
निर्दोषमिति विख्यातं आर्षिकं वर्जयेत्ततः॥ 714
नारंगाच्छिद्रमात्रं चोत्तरे लिंगपीठयोः।
जीर्णं कर्णादि सर्वं चेद्गोमुखास्तथैव च॥ 715
p. 2. 45) वर्जयेत्तु ततो मंत्री छित्वा खण्डं च पिण्डिका।
लिंगं च लिंगजीर्णं चेत् पीठं पीठं च वर्जयेत्॥ 716

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

उक्तशास्त्रप्रकारेण कल्पयेत्कल्पवित्तमः।
स्वयंस्वायंभुव लिंगादि पीठं स्वायंभुवं यदि॥ 717
जीर्णोद्धारं न कर्तव्यं तच्छक्तेरेवमेव च।
संध्यान योग्यं कर्तव्यं अन्यथा बंधयेद्गुरुः॥ 718
इति सहस्रागमे जीर्णोद्धार पटलः।
अतः परं प्रवक्ष्यामि जीर्णोद्धारविधिक्रमं॥ 719
सर्वपापहरं पुण्यं देहीनां हितकारणम्।
मध्ये बंधस्य जीर्णे च पीठस्य घृतवारिणा॥ 720
माषं माषद्वयं चैव तिलं तिलद्वयं तथा।
निर्दोषमिति विख्यातं अधिकं वर्जयेद्बुधः॥ 721
रेखामात्रकरे वा तु तस्यांते लिंगपार्श्वयोः।
जीर्णं यदि च खण्डे वा गोमुखायास्तथैव च॥ 722
वर्जयेत्तु ततो मंत्री द्विधा खण्डं च पिण्डिका।
कुंभे ततः समावाह्य देवं देवीं समन्ततः॥ 723
देहे लिंगे समायोज्य वर्जयेत्तु समुद्रके।
~~कृत्वा योजयेल्लिंग~~
स्वर्णादि पिण्डिकां कृत्वा योजयेल्लिंगमुत्तमं॥ 724
ततः कुंभे समावाह्य देवं देवीं समन्ततः।
योजयेत्तु परादेहे यद्वा लिंगे सुयोजयेत्॥ 725
यत्पिण्डिकायां च लिंगं च यत्काले वर्जितं यदि।
बाणं यद्वान्य रुद्राक्षं विन्यसेल्लिंगवत्क्रमात्॥ 726
अष्टबंधं च जीर्णं च पीठस्य घृतवारिणा।
शिबं शिबद्वयं चैव तिलकं च तथैव च॥ 727
न दोषमिति विख्यातं अधिकं वर्जयेत्सुधीः।
नारिंग दाडिमात्रं च तस्यांते लिंगपार्श्वयोः॥ 728
जीर्णं यदि च कर्णे वा गोमुखायास्तथैव च।
वर्जयेत्तु ततो मंत्री द्विधा खण्डं च पण्डिका॥ 729
कुंभे तत्तत्समावाह्य देवं देवीं समन्ततः।
योजयेत्तु पुरा देहे पश्चाल्लिंगे सुयोजयेत्॥ 730
यत्पिण्डिकायां लिंगं च यत्काले वर्जितं यदि।
बाणं यद्वान्यरुद्राक्षं विन्यसेल्लिंगवत्क्रमात्॥ 731
गौडबंधस्य जीर्णं स्यात् पीठस्य घृतवारिणा।
तिलकद्वयमेवं च आढकद्वयमेव वा॥ 732
निर्दोषमिति विख्यातं अधिकं वर्जयेद्बुधः।
तांबूलनाडीमात्रं च तस्यांते लिंगपार्श्वयोः॥ 733

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जीर्णं त्र यदि खण्डे वा गोमुखायास्तथैव च।
वर्जयेत्तु ततो मंत्री छिद्राखण्डं च पिण्डिका ॥ 734
(न) कुंभे तत्रा समावाह्य देवं देवीं समन्त्रतः।
देहे लिंगे समायोज्य वर्जयेत्तु समुद्रके ॥ 735
यल्लिंगस्य च यत्काले वर्जितं यदि पिण्डिका।
स्वर्णादि पिण्डिकां कृत्वा योजयेल्लिंगमुत्तमं ॥ 736
कुंभे समावाह्य देवन्देवीं समन्त्रतः।
योजयेत्तु पुरा देवौ पश्चात्तु पश्चाल्लिंगे सुयोजयेत् ॥ 737
यत्पिण्डिकायां लिंगं च यत्काले वर्जिते यदि।
बाणानां चेत्तु रुद्राक्षं विन्यसेल्लिंगवत्क्रमात् ॥ 738
बाणलिंगस्य जीर्णं चेत् पीठस्य छत्रवारिणा।
तिन्त्रिणीफल बीजं च - - - - त्रयमेव च ॥ 739
तावच्छेद - बीजं च अंगुलं वाद्वियंगुलम्।
निर्दोषमिति विख्यातं आधिकं वर्जयेद्बुधः ॥ 740
- त पुत्रस्य - - - मात्रं लिंगस्य पार्श्वयोः।
जीर्णं यदि च खण्डे वा गोमुखायाः तथैव च ॥ 741
वर्जयेत्तु ततो मंत्री हस्त - - - - - - - ।
P.2-46) - - समावाह्य देवं देवीं समंत्रतः ॥ 742
योजयेत्तु पुरा देहं - - - - गे सुयोजयेत्।
यत्कुण्डिकायां लिंगं च यत्काले वर्जिते यदि ॥ 743
बाणानां चैव रुद्राक्षं विन्यसेल्लिंगवत्क्रमात्।
लिंगं च लिंग जीर्णं चेत् पीठं च वर्जयेत् ॥ 744
इति सहस्रागमे आत्मार्थलिंग जीर्णोद्धारपटलः -।

अतः परं प्रवक्ष्यामि जीर्णोद्धार विधिक्रमम् ॥ 745
सर्व पापहरं पुण्यं राजराष्ट्रसमृद्धिदम् ॥
शैलजं मृण्मयं चैव लोहजं दारुजं तथा ॥ 746
महांगस्यांग प्रत्यंग उपांगश्च चतुर्विधम् ॥
अंगुलांतरमादीनि पश्चाज्जीवास्सुशोभनाः ॥ 747
करौ चोरु तथा जंघे महांगमिति वक्ष्यते।
चक्षुनाडिक वाचोष्ठे जिह्वा दशनमालकम् ॥ 748
स्तनानि चुबुकादीनि भ्रू कृत्वा नासापुटद्वयं।
कटितश्च ललाटं च कर्णावूरुस्तथैव च ॥ 749
श्रोत्रादीनि चिबुकादीनि गण्डप्रांगानि वक्ष्यते।
दन्ता नखाश्च रोमाणि केशरूपाणि मूर्धानि ॥ 750

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दन्ता नखाश्च रोमाणि केशरूपाणि मूर्धनि।
केशविशेषमूलं च उपांगानीति वक्ष्यते॥ 751
केशरूप नखादी च जटामौलेन्दुशेखरे।
पादुका वाहनं स्रक् विलेपन वाहनं तथा॥ 752
नखकेसर भस्मानि मकुटं भूषणांबरम्।
च) शंखं चक्रं शिरश्चक्रं हरिणांदंक शूलकम्॥ 753
अक्षमालाग्निकश्चैव पाशपश्चायुधानपि।
पीठं प्रभावच्छत्रं तु प्रत्यंगानि च कथ्यते॥ 754
माषं माषद्वयं चैव त्रयाढकमथापि वा।
अंगुलं त्र्यंगुलं वापि महांगे जीर्णितं यदि॥ 755
निर्दोषमिति विख्यातं आधिकं वर्जयेद्बुधः।
तिलं यवद्वयं माषं कूश्माण्डं बीजमेव तु॥ 756
अंगुलं अंगुलार्धं वा उपांगे जीर्णितं यदि।
कुर्याधिकं च शिबं च दशांगुल मथापि वा॥ 757
द्वादशांगुलकं वापि प्रत्यंगे जीर्णितं यदि।
निर्दोषमिति विख्यातं आधिकं वर्जयेद्बुधः॥ 758
जीर्णमेवं विधं प्रोक्तं संधानं तु ततः शृणु।
तद्रव्येण सुबंधैश्च अदृश्यं सम्यगाचरेत्॥ 759
अस्ति लोकापवादस्तु दृश्य संधानमेव हि।
तस्मात्तद्दारशक्तीच मुच्यते न तु संशयः॥ 760
शैलज स्स कल्कश्चोक्तं अनावर्तं चरेत्ततः॥
मृण्मयं धातुसंभूतं लोहं शैलजवत्स्मृतः॥ 761
महांगा उपांगेषु प्रत्ययेषु यथाक्रमम्।
लोहज प्रतिमादीनां यत्काले जीर्णमेव च॥ 762
संधानं कारयेद्धीमान् प्रत्यंगोपांग अंगके।
वद्दये द्बलभंगे च तुंगभंगं विना पुनः॥ 763
गतो मंत्री विशेषेण संप्रोक्षण मथापि वा॥(चरेत्)
आचार्यं पूजयेत्पश्चा द्वस्त्र हेमांगुलीयकैः॥ 764
कटकै कुण्डलैश्चैव कटिसूत्रैर्विशेषतः॥
भक्तानां परिवाराणां यथाशक्ति च दक्षिणा॥ 765
इति बिंबागमे जीर्णोद्धार पटलः। //
लिंगं स्था.. णमतीपतेजसभिति माषादि हस्तांत - 766

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p. 2.47 . . . . ।

ति) अनलोपमथानिभं भृंगाङ्गुलि काचभम् ॥ 767
नीलं वा प्रतिबिंबवद्धरितमं तद्वर्णपीठं -
ककुतुल्यं गोस्तन कुक्कुटाण्डसदृशं स्निग्धं- ॥ 768
-- पूजयेत्।
जीर्णे बेरे परित्यागे यदुक्तं वा समाचरेत्।
शिरः कर्णौ उरः कुक्षि बाह्यकर्णौ · · वै विदुः॥ 769
दन्ता नखाश्च रोमाणि केश रूपाणि मूर्धनि।
उप · · · च चोक्तानि तदङ्गे पुनरुद्भवः॥ 770
मकुटं भूषणं वस्त्रं शिरश्चक्रं तथैव च।
आयामं च शिखावापि पादवस्त्रं च पीठिका॥ 771
प्रभाव त्र यश्चेतानि प्रत्यंगानि च कथ्यते।
शैलं च ध्रुवबेरायदंगहीनं भवेद्यदि॥ 772
तद्बेरं च समादाय समुद्रे प्रक्षिपेत्ततः।
शिलामन्यं गृहीत्वा तु शिलासंस्थापनं यदि॥ 773
स्थापयित्वा उपांगं तु पूर्ववत्कारयेद्बुधः।
इत्येतदेक देहानां बिंबानां परिकीर्तितः॥ 774
अन्योन्यैकं कृतानां तु वज्रवद्बंधयेत्ततः।
किंचिदपीठं विहीनं तु निर्दोषमुपजायते॥ 775
ईषदंगक्षयं कुर्यात् · · यस्य स्वर्णकर्षणम्।
बृहदंगं समुद्धृत्य पीठबिंबं तु तत्क्षिपेत्॥ 776
कृत्वा वा हीन पीठन्तु तत्रांगं स्थापयेत्पुनः।
अनेन बिंब भग्नेन पीठे सति नवं कृतम्॥ 777
प्रतिमांग विहीने च तद्देशान्तं भविष्यति।
वस्त्राभरणपीठं वा प्रभायामप्यथापि च॥ 778
पदं तु यदि हीनं तु पुनस्संधानमाचरेत्।
उपांगेषु च हीनं तु शिल्पिनान्येन वा पुनः॥ 779
प्रतिमानामंग हीने यावत्कुर्यात् क्षिप्र क्षणः।
उत्तमांग विहीनं चेत् त्यक्त्वा बिंबं प्रयत्नतः॥ 780
अशुभमन्यथा कृत्स्नं संस्कृतं चेन्न कारयेत्।
अंगोपांग विहीने तु पुनस्संधानमिष्यते॥ 781

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकांगं द्वयंगं वा त्रियंगं वांग हीनकम्।
प्रावयित्वा सकृल्लिंग्यं संपूर्णं सर्वतोऽन्नं॥ 782
अंगहीने तथा बिंबे संस्कृत्येवं तु पूर्ववत्।
संस्थाप्य विधिना पश्चात् प्रायश्चित्तं तथा भवेत्॥ 783
इति ललितागमे जीर्णोद्धार पटलः। //
अथातः प्रवक्ष्यामि जीर्णोद्धार विधिक्रमः॥ 784
जीर्णदेहं यथा देहि व्यक्त्वान्यं प्रतिपद्यते।
तथापि जीर्णं चलितं बिंबं मुंचन्ति देवताः॥ 785
एवमादीनि सर्वाणि राक्षसाश्च विशंति हि।
राक्षसाश्चासुराश्चापि पिशाचा ब्रह्मराक्षसाः॥ 786
तस्मात्सर्वप्रयत्नेन जीर्णोद्धारं तु कारयेत्।
प्रासादे प्रतिमं लिंगं प्राकारं मण्डपं तथा॥ 787
गोपुरं परिवारं च जीर्णकाले ततोद्धरेत्।
स्थूप नासी च शाला च कपोतं कूटपञ्जरम्॥ 788
पादाधिष्ठान संयुक्तं यद्धीनं तु वर्जयेत्।
विमानं पूर्ववत्कृत्वा प्रोक्षणं विधिना कुरु॥ 789
तेष्वंगानि विहीनं च अं कृत्वा पूर्ववत्स्वयं।
अ--यानामिदं प्रोक्तं प्रतिमानां ततः शृणु॥ 790
भ्रू रेखा पक्ष्म रेखा वा चक्षुरेखा च नासिका।
सर्वांगानां क्षयं दृष्ट्वा प्रतिमां च विसर्जयेत्॥ 791
लोहजानां तु सर्वेषामंग हीने तु संभवे।
तद्वदंगं पुनः कार्यं मुखहीनं न कारयेत्॥ 792
नाभि मध्यम हीने तु संधानं न समाचरेत्।
p.2) 48 मृण्मये- हीने चेत् पुनः कृत्वा समारभेत्॥ 793
छिन्नं भिन्नं तु नग्नाग्नं जीर्णं चेत्तु नवीकृतं।
प्रतिमं शूलहरं चेति जीर्णोद्धारं तु कारयेत्॥ 794
सूत्राग्राणां तु लिंगे तु रेखाग्राणां तु पीठके।
अन्यांगानां क्षयं दृष्ट्वा पीठं लिंगं विशेषतः॥ 795
उद्धरेज्जीर्णलिंगं तु तस्योद्धारक्रमं शृणु।
मण्डलं वर्तयेद्धीमान् शिवलिंगस्य दक्षिणे॥ 796
संकल्प्यासनमारुह्य पूजां कृत्वा समाचरेत्।
न्यां) मंत्रपूर्वं हविर्दद्यात् तदग्नौ आयतने कृते॥ 797

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दूर्वामिक्षुकृतैर्वापि क्षीरेण तिलतण्डुलैः।
दशात्मना शिवांगैश्च पञ्चब्रह्मषडंगकैः॥ 798
प्रत्येकं शतमर्धं वा होमयेत्पञ्चविंशतिः।
लिंगस्य चलनार्थाय मूलेनैव शताहुतिः॥ 799
दद्यात्पूर्णाहुतिं तत्र सहस्राक्षरमंत्रतः।
तत्कालकालेन संमिश्रं गोवालकृतरज्जुना॥ 800
~~बंधयेल्लिंगं~~ कर्तुर्वशानुरूपं तु वृषभं लक्षणान्वितं।
तरुणं बालवृद्धं च भूषणैर्भूषणार्हकैः॥ 801
रज्जुना बंधयेल्लिंगं तदग्रे वृषभस्य तु।
तद्रज्जुना सबध्वा तु ब्रह्मरूपमनुस्मरन्॥ 802
तल्लिंगमुद्धरेन्मंत्री वृषभेन शिवेन च।
देशिकं पूजयेत्तत्र वस्त्रस्वर्णादिभूषणैः॥ 803
आरोप्य जीर्णबिंबन्तु शिबिकायां रथोपि वा।
शंखकाहलवाद्यैश्च कुर्याच्छन्दैर्महारवैः॥ 804
आनीतैः शिवभक्तैस्तु स्तुतिस्तोत्रसमन्वितं।
समुद्रे प्रक्षिपेल्लिंगं नमकान्तकमन्त्रकैः॥ 805
तटाकादिषु शोष्येषु खातबोर्व्यां वा विनिक्षिपेत्।
दारुजं चेद्दहनार्थं वा जले लिंगं व्यपोह्य च॥ 806
प्रतिलिंगं च पीठं तु कृत्वा पूर्वोक्तलक्षणैः।
स्थापयेद्द्विजिना विद्वान् नृपराष्ट्रहिताय वै॥ 807
जीर्णोद्धारे तु ते सर्वं मण्डपस्थाय शंभवे।
विज्ञापयेत्प्रणम्यादौ शिवमस्त्विति चोद्धरेत्॥ 808
शिवं प्रागवत्समभ्यर्च्य शिवास्त्रेण समर्चयेत्।
तस्य छिद्रापनोदार्थं अघोरास्त्रेण मंत्रवित्॥ 809
आज्येनाष्टं हुत्वा व्याहृत्याहुतिमाचरेत्।
अग्निस्थ शिवमुद्वास्य होमशेषं समाचरेत्॥ 810
सकलानि च जीर्णानि उद्धरेद्देवमेव तु।
वृषं विनार्चनानां तु क्रमाद्देवं समुद्धरेत्॥ 811
मुद्दारुरूपबिंबानि उद्धृत्य वसु निक्षिपेत्।
उद्धृत्य लोहबिंबे तु तद्द्रव्येण पुनर्नवम्॥ 812
कुर्यात्सामान्यमेवं तु विशेषमधुनाशृणु।
द्रव्योत्कृष्टेन कर्तव्यं तत्प्रमाणाधिकं तु वा॥ 813

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इतरं तु न कर्तव्यं कृतं चेत्कर्तृनाशनम्।
प्राकारमण्डपादीनां यज्जीर्णं तत्र तद्विना॥ 814
कृत्वा तत्पूर्ववद्धीमान् सुदृढं हि मनोहरं।
अन्यथा यदि कुर्वीत सर्वदोषावहं नृणाँ॥ 815
सर्वनाशं भवेद्यत्र सर्वं निष्फलमेव हि।
यद्वा मासदिनर्क्षेषु अशुभानि शुभानि च॥ 816
अपरीक्ष्य तदा कार्यं उद्धरे स्थापनं बुधः।
जीर्णोद्धारमिदं प्रोक्तं प्रायश्चित्तविधिं शृणु॥ 817
इति सुप्रभेदे प्रतिष्ठा· · · · ·जीर्णोद्धारपटलः॥

—

जीर्णोद्धारमिदं वक्ष्ये सर्वारिष्टनिवारणं॥ 818
लिंगस्य पिण्डि · · · · · · · · · लयस्य तु।
- रुणालय लिंगस्य परिणाहालयस्य तु॥ 819
प्रा· · · स्यैव चान्येषाँ उद्धारे चोत्तर क्रिया।
स्फु· · · · · - - - - · · · · · · · ना॥ 820
· · स्यैव चोरैर्वा नाशिते शात्रुभिस्तथा।
सरित्स्रोतकराभ्यां वा विजीर्णैर्लोकपर्ययात्॥ 821
· · - - - - - · · · · त्यक्त्वान्यं प्रतिपद्यते।
तस्माज्जीर्णानि वस्तूनि सद्यो मुञ्चन्ति देवताः॥ 822
तद्दृष्ट्वा भूतवेतालैः पिशाचा ब्रह्मराक्षसाः।
· · · · · · · · · · · · · न्ति न संशयः॥ 823
राष्ट्रग्रामनृपाणां च स्थापकस्यैव मंत्रिणः।
(आदिशैवकुलोद्भवः प्रागुक्तलक्षणैस्सह॥ 824
· - - · · - · · · · · · ·पूजितम्।
तस्मादुद्धारणं चाशु विधि दृष्टेन कर्मणा॥) 825
कुर्वन्ति ते भयं ह्युग्रं दुर्भिक्षं मरणं ध्रुवम्।
आर्पितं · - - - · · · - - - पूजितं॥ 826
तस्मादुद्धरणं चाशु विधिदृष्टेन कर्मणा।
आदिशैवकुलोद्भवः प्रागुक्तलक्षणैस्सह॥ 827
- - - - - त्य गंधपुष्पैरलंकृतः।
नववस्त्रधरोष्णीषैः हेमपञ्चांगभूषणः॥ 828
लिंगाग्रे स्थण्डिलं कृत्वा · - · · देशिकः।
अभ्यर्च्य देवदेवेशं गंधपुष्पादिभिः क्रमात्॥ 829

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जीर्णद्वारं तु विज्ञाप्य प्रणम्यानुज्ञ · · · · ।
· · · · · दिकं सर्वं अग्निकार्योक्तमार्गतः ॥ 830
मूलेन जुहुयाद्धीमान् समिध्या ब्रह्मवृक्षजैः ।
घृतं मिमिक्षेति मंत्रेण - - - - · विशेषतः ॥ 831
हृदयेन चरुं हुत्वा लाजं वामेन होमयेत् ।
सर्षपं नेत्रमंत्रेण द्वारिं सद्येन · - - - ॥ 832
· · · · कं जुहुयाद्धीमान् अष्टोत्तरशतं क्रमात् ।
द्रव्यान्ते चैव द्रव्यान्ते व्याहृतीर्जुहुया · - - ॥ 833
· · · · · यानं च राष्ट्र भ्रष्ट क्रमाज्जुनेत् ।
पूर्णाहुतिं ततः कृत्वा स्विष्टमग्नेति मंत्रतः ॥ 834
उद्धारयेत्ततो लिंगं ग · · · · · - - - · ।
वृषभं श्वेतवर्णं च युवानं बलवत्तरम् ॥ 835
सुस्नाप्य खुरशृंगाणि हेमपट्टैश्च वेष्टयेत् ।
मौंजी रज्जुं · - - - - - - · · · माकृतिः ॥ 836
रज्जुं बद्ध्वा वृष ग्रीवे लिंगमूले दृढं क्रमात् ।
उद्धारयेत्ततो लिंगं वृषेण तु हरात्मु · · · ॥ 837
· - - - · · · स्नातु गोचर्मकृत रज्जुना ।
पिण्डिकां खानयेत्तत्र कुन्द्दालया हैमजेन तु ॥ 838
पादशैलादि · - - - · - - लक्षणान्वितं ।
सम्यज्य स्नापनोक्तेन लिंगं · · · · स्नापयेन्नवं ॥ 839
अनुद्धृत्य शिलालिंगं स्ना · · · · · - - - ।
- - - · · · ग्रामं च राजा राष्ट्रं विनश्यति ॥ 840
जीर्ण बेरं समुद्धृत्य शिबिकायां स्थापयित्वा ।
आरोप्य नृत्त · · - - - · · · · र संयुतम् ॥ 841
ततो भक्तजनैस्सार्धं स्तोत्रमंगलवाचकैः ।
समुद्रे निक्षिपेच्चैवं नमस्कृत्वा महा · · · ॥ 842
· - - - · · · · · · · निक्षिपेद्वयना पुनः ।
निक्षिपेन्मृण्मयं तोये क्षिपेदग्नौ तु दारुजम् ॥ 843
आचार्यं पूजयेत्तत्र · - - - - · · · · · क्षिः ।
· · · · · देवाग्निश्च घृतवारि विहीनके ॥ 844

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अन्येषु जीर्णकालेषु उद्धरेत्पिण्डिकां पुनः।
P.2.50) तदग्रे स्थण्डिलं कृत्वा . . . . शुभैः॥ 845
आद्यावन्ते च कर्तव्यं अग्निकार्योक्तमार्गतः।
समिधं सद्यमन्त्रेण हृदयेन घृतं हुनेत्॥ 846
अघोरेण चरुं हुत्वा लाजं वै शिखया हुनेत्।
तिल मस्त्रेण मन्त्रेण सर्षपं कवचेन तु॥ 847
तण्डुलं वामदेवेन प्रत्येकं पञ्चविंशतिः।
वृ) कुन्दालया खानयेद्धीमान् वृषेणोद्धारणं विना॥ 848
पिण्डिका स्थापनोक्तेन स्थापयेन्नवपिण्डिकां।
जीर्णां तस्यैव बिंबस्य उद्धारं त्वधुना शृणु॥ 849
१७) शिरोभ्रुवौ तथा पादौ हीने स्यात्परिवर्जयेत्।
मृण्लोहेन कर्तव्यं तत्प्रमाणेन पूर्ववत्॥ 850
कृत्वा तु स्थापयित्वा तु पूर्ववत्सम्यगर्चयेत्।
भ्रूरेखा पक्ष्मरेखा च आस्यरेखा च नासिका॥ 851
एतेषां च क्षयं दृष्ट्वा प्रतिमां परिवर्जयेत्।
तद्बेरं तु परिगृह्य समुद्रे तु विनिक्षिपेत्॥ 852
मंदिरे चोद्धृते जीर्णे निर्दोषसंस्थिते।
बालहर्म्यं ततः कृत्वा बालस्थानोक्तमार्गतः॥ 853
बाललिंगं ततः कृत्वा स्थापयेत्तरुणालये।
प्रतिमस्य समानस्य वृषेणोद्धारणं विना॥ 854
स्तूप्याद्येष्टिकां च खात्वा त्यक्त्वा विशेषतः।
आद्येष्टकाः क्षिपेत्प्राग्वत् गर्भन्याससमुद्धिदम्॥ 855
यावन्मन्दिरपर्यन्तं तावत्कृत्वा सलक्षणः।
यद्द्रव्येणोद्धृतं हर्म्यं यत्प्रमाणं यदाकृतिः॥ 856
तद्द्रव्येण पुनः कृत्वा तत्प्रमाणं तदाकृतिः।
सर्वावयव संपूर्णं यथाशोभं यथाबलम्॥ 857
दार्विष्टकशिला चैव जीर्णप्रासादकेऽपि च।
कर्मयोग्यास्तु संग्राह्य शेषास्तत्परिवर्जयेत्॥ 858
हीनमानोद्धृते ह्यग्नि शास्त्रोक्तेनाधिकं कुरु।
तस्माद्धीनं च कर्तव्यं उत्कृष्टं शुभदं स्मृतं॥ 859
स्तूपिनासी च शाला च कपोतं कूटपञ्जरम्।
एतद्वैकं यदा हीनं कृत्वा तद्वत् तदा पुनः॥ 860

जीर्णिते बाललिंगे तु उद्धारणं तथा कुरु।
तै:) तस्याग्रे स्थण्डिलं कृत्वा निर्दोषैःसिकतैस्सितैः॥ 861
अग्न्याधानादिकं सर्वं अग्निकार्योक्तमाचरेत्।
समिध्या सद्य मंत्रेण घृतमीशान मंत्रतः॥ 862
हृदयेन चरुं हुत्वा एषामीशो तिलाज्यकम्।
. . . . सर्वमीशेन होमयेत्॥ 863
सिताब्जमस्त्र मंत्रेण बिल्वपत्रं तु वर्मणा।
अष्टोत्तरशतं हुत्वा प्रत्येकं तु विशेषतः॥ 864
द्रव्यान्ते व्याहृतिं हुत्वा जयादीं जुहुयात्ततः।
पूर्णाहुतिं ततः कृत्वा शिरोमंत्रेण देशिकः॥ 865
नवलिंगं प्रकुर्वीत पूर्वोक्तेनैव वस्तुना।
तरुणस्नपनस्योक्त मार्गेणैव समाचरेत्॥ 866
स्नापनपूर्वक)· . . . . ले तु लिंगं हस्तेन चालयेत्।
दक्षिणां तु गुरोर्दत्वा भूसुरान्भोजयेत्ततः॥ 867
p.2.51) परिवारांश्च . . . . . लयस्योक्तवत्कुरु।
एवं कृत्वा पुनः कुर्यात् लक्षणेन विचक्षणः॥ 868
अन्या कृत्या कृतं चेत्तु सर्वदोषसमुद्भवम्।
स्थापितेनोक्त देशे तु तद्विनारंभतंत्रकः॥ 869
उक्तस्थाने प्रकर्तव्यं परिवारादिकान् क्रमात्।
जीर्णेघात्रैव बिंबं तु उन्नरेतु विशेषतः॥ 870
तत्तद्धामाग्रके . . . कृत्वा मूर्ध्नि समर्चयेत्।
स्थापनोक्त क्रमेणैव बिंबं वै स्थापयेन्नवम्॥ 871
प्राकारे जीर्णिते . . . .।
. . वेष्टिकां ततः कृत्वा प्राकारं तु समारभेत्॥ 872
तस्माद्धीनं न कर्तव्यं आधिक्यं कुरु तच्छुभं।
जीर्णे तु गोपुरे तत्र प्रासादस्योक्तवत्कुरु॥ 873
अन्येषां मण्डपादीनां प्रासादस्योक्तमार्गतः।
पूर्वं सामान्यमुद्दिष्टं विशेषमधुना शृणु॥ 874
इष्टिकायाः परं पीठं पीठादाभासकं परम्।
आभासदक्षचित्रं तु अर्धचित्रात्तदारुजम्॥ 875
दारुजान्मृण्मयं श्रेष्ठं तच्छ्रेष्टं शैलजं स्मृतं। 876
शैलजाल्लोहजं श्रेष्ठं लोहजाद्रत्नजं स्मृतम्॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चलत्वाल्लोहरत्नैश्च मूललिंगन्न कारयेत्।
द्रव्यो<कृष्टेन कर्तव्यं विपरीतं न कारयेत॥ 877
एवं यः कुरुते मर्त्यः लभते मौक्तिकं फलम्।
इहैव पुत्रवान् श्रीमान् सोऽन्ते सायुज्यमाप्नुयात॥ 878
यज्जीर्णोद्धारणात्सद्यः सर्वपापविवर्जितः॥
सर्वाभीष्टं लभंते तं भजंते पार्वतिप्रियम्॥ 879
इति कारणे प्रतिष्ठा तंत्रे जीर्णोद्धारविधिपटलः॥

अतः परं प्रवक्ष्यामि जीर्णोद्धार विधिक्रमम्॥ 880
सर्वपापहरं शांतं नृपराष्ट्रसमृद्धिदम्॥
महांगमंगमुपांगं प्रत्यंगं तु चतुर्विधम्॥ 881
महांगं शीर्षमित्युक्तं अंगं गात्रमिति स्मृतम्।
उपांगं पादपाणिस्स्यादित्युक्तमितरं शृणु॥ 882
मकुटं भूषणं हीनं वैश्यानां नाशनं भवेत।
ततः प्रत्यंग हीनं चेच्छूद्राणां नाशनं भवेत॥ 883
महांगं च विहीनं च तद्वारं च विशेषतः।
तद्द्रव्यं श्रावयित्वा तु कारयेन्मूर्तिरूपकं॥ 884
मूर्तिनिर्मितिपूर्वं तु धात्रा होमं तु कारयेत।
घटे बेरं समावाह्य सेतराणि इतरेषु च॥ 885
स्नपनं मूर्तिहोमं च अष्टोत्तरशतं कृतम्।
अंगहीनं तथा कृत्वा एकाशीति क्रमं कृतं॥ 886
ज) उपांगं च विहीनं चेत् कृत्वा संधानमुत्तमम्।
पूर्ववत्कारयेच्छेषं एकोनपञ्चाश-कृतम्॥ 887
प्रत्यंगं च विहीनं चेत् कृत्वा संधानमुत्तमं।
पूर्ववत्कारयेच्छेषं स्नपनं पञ्चपञ्चकम्॥ 888
उक्तकर्माणि सर्वाणि कारयेत्तदनंतरम्।
विपरीतं न कर्तव्यं कृतश्चेत् कर्तृनाशनं॥ 889
तद्दोषशमनार्थाय संप्रोक्षणमथाचरेत।
इति कारणे प्रतिष्ठा तंत्रे जीर्णोद्धारपटलः॥ 890

अतः परं प्रवक्ष्यामि जीर्णोद्धार विधिक्रमं।
सर्वपापहरं पुण्यं सर्वदोषनिकृन्तनम्॥ 891
लिंगे पीठे च जीर्णे च परिवारेषु-त्र च।
राजा राष्ट्रविनाशं स्यात् एकाब्दान्तस्तदर्धकैः॥ 892

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राजा राष्ट्र विनाशं स्याद्वेकाब्दान्तस्तदध्धिके।
यवं यवद्वयं जीर्णं न दोषमिति कथ्यते ॥ 893
संकोचं कारयेद्धीमान् पूर्वोक्तविधिना बुधः।
सूक्ष्मशास्त्रेण मतिमान् समं कृत्वा सुयोजयेत् ॥ 894
यवत्रयाधिकं जीर्णं तत्रैव परिवर्जयेत्।
p.2.52) बालबेरं प्रकल्प्येव समुद्रे प्रक्षिपेत्ततः ॥ 895
पुनरावर्तकं कृत्वा शुद्धस्नपनमाचरेत्।
छेदे नष्टे महीपीठे गावो नश्यन्त्य चैव च ॥ 896
दारुपीठं प्रकल्प्येव तस्य देवं सुयोजयेत्।
तत्पीठं पूर्ववत्कृत्वा स्थापयेत्पूर्ववद्बुधः ॥ 897
जीर्णमीक्षांगुलं चेच्छि ... र्धंगुलमेव वा।
निर्दोषमिति विख्यातं अधिकं चेद्विसर्जयेत् ॥ 898
पीठालंकाररूपाणां तत्रैव परिकीर्तितम्।
गृहीते सूक्ष्मशास्त्रेण कारयेत्पूर्ववत्सुधीः ॥ 899
विपरीतं न कर्तव्यं कृतश्चेत्कर्तृनाशनम्।
तद्दोषशमनं कृत्वा पुनः पूर्ववदाचरेत् ॥ 900
लोहज प्रतिमानां तु जीर्णोद्धारं प्रकथ्यते।
महांगमंगमुपांगं प्रत्यंगं तु चतुर्विधम् ॥ 901
महांगं शीर्षमित्युक्तं अंगं गात्रमिति स्मृतं।
उपांगं पादपाणी स्स्यात् इत्युक्तमितरं श्रृणु ॥ 902
मकुटं भूषणं वस्त्रं शिरवक्त्रं तथैव च।
नखादीन्यायुधादीनि प्रत्यंगमिति कीर्तितं ॥ 903
महांगं तु विहीनं चेत् विप्राणां नाशनं भवेत्।
अङ्गहीनं तथाचेद्वा ~~कृत्वा संधानमुत्तमम्~~ ॥ 904
पूर्ववत्कारयेच्छेषं ~~शमनं पश्चा~~ पश्चकम्।
उक्तकर्माणि सर्वाणि कारयेत्तदनंतरं ॥ 905
विपरीतं न कर्तव्यं कृतश्चेत्कर्तृनाशनम्।
तद्दोषशमनार्थाय संप्रोक्षणमथाचरेत् ॥ 906
इति कारणे प्रतिष्ठा तंत्रे जीर्णोद्धारपटलः।

अतः परं प्रवक्ष्यामि जीर्णोद्धार विधिक्रमं ॥ 907
सर्वपापहरं पुण्यं सर्वदोषनिकृन्तनम्। 908
लिंगे पीठे च जीर्णे च परिवारे

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अङ्गहीनं तथाचेद्वा नृपाणां नाशनं भवेत्।
उपांगहीनं यत्काले वैश्यानां नाशनं भवेत्॥ ९०९
तत: प्रत्यंग हीनं चेत् शूद्राणां नाशनं भवेत्।
महांगं च विहीनं चेत् तद्बेरस्य विशेषत:॥ ९१०
तद्रव्यं द्रावयित्वातु कारयेन्मूर्तिरूपकम्।
मूर्तिनिर्मितपूर्वं तु यात्रा होमं तु कारयेत्॥ ९११
घटे बेरं समावाह्य स्वेतराणीतरेषु च।
स्नपनं मूर्ति होमं च अष्टोत्तरशतं स्मृतं॥ ९१२
पूर्ववत्कारयेच्छेषं एकोनपंचाशत्कृतं।
प्रत्यङ्गं च विहीनं चेत् कृत्वासंधानमेव च॥ ९१३
पूर्ववत्कारयेच्छेषं स्नपनं पञ्चपञ्चकं।
उक्तकर्माणि सर्वाणि कारयेत्तदनंतरम्॥ ९१४
पूर्वप्रमाण मार्गेण महांगादीनि कारयेत्।
हीनाधिक्यक्रमं चेद्धि राजा राष्ट्रं विनश्यति॥ ९१५
तस्मात्सर्वप्रयत्नेन हीनाधिक्यं न कारयेत्।
यद्धीनं चैव यच्छेषं पूर्ववत्कारयेत्सुधी:॥ ९१६
इति योगजाख्ये तन्त्रे जीर्णोद्धारपटल:।

अत: परं प्रवक्ष्यामि जीर्णोद्धारविधिक्रमं॥ ९१७
दोषोपशमनार्थञ्च भोगमोक्षफलप्रदम्।
शिर:कण्ठमुर: कुक्षि बाहू चैव करस्थले॥ ९१८
एतान्यंगानि कथ्यंते उपांगानि प्रवक्ष्यते।
ऊरू च जानुनी चैव जंघे पादांघ्रिकद्वये॥ ९१९
कूर्परौ मणिबंधे च पाणिद्वयमथापि वा।
अधरद्वयमेवं च गण्डे च चिबुके तथा॥ ९२०
नासाग्रं नासिकं चैव ह्यथ नासापुटद्वयं।
कर्णौ स्तनद्वयं नेत्रे उपांगानीति कथ्यते॥ ९२१
मकुटं भूषणं वस्त्रं शिरश्चक्रमथापि वा।
पीठं वापि प्रभां पश्चात् नखरोमाणि यत्र च॥ ९२२
प्रत्यंगानीति कथ्यंते केचित्कार्याणि वक्ष्यते।
अंगोपांगेषु हीनानि राजा राष्ट्रस्य दोषकृत्॥ ९२३

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तद्दोषशमनार्थाय प्रायश्चित्तं समाचरेत्।
यवं यवद्वयं चैव आढकद्वयमाढकम्॥ 924
हीनान्यंगेषु विधिवत् सूक्ष्मशास्त्रेषु बुद्धिमान्।
समं कृत्वैव विधिवत्सं प्रोक्षणमथाचरेत्॥ 925
हीनानीत्यधिकानीति तद्रूपं च विशेषतः।
P. 2-53) श्रावयित्वैव तद्रूपं योजयेन्मूर्तिरूपकं॥ 926
प्रतिष्ठाक्रममार्गेण प्रतिष्ठां कारयेत्ततः।
उपांगानि विहीनानि पुनस्संधानमाचरेत्॥ 927
तद्बेरस्य विशेषं च संप्रोक्षणमथाचरेत्।
प्रत्यङ्गानि विहीनानि शीघ्रं संधानमाचरेत्॥ 928
पुण्याह प्रोक्षणं कार्यं प्रोक्षणं पञ्चगव्यकं।
एतान्युक्तानि लोहस्य बेरस्यैव तु यत्र च॥ 929
अन्यकार्याणि शैलानां मुच्यंते यत्र तत्परं।
उक्तानां मुष्टितानां च पुण्याहं पञ्चगव्यकं॥ 930
अन्येषां चैव चोक्तानां संप्रोक्षणमथाचरेत्।
इति चिन्त्ये जीर्णोद्धार विधि पटलः। 931

अतः परं प्रवक्ष्यामि जीर्णोद्धारविधिक्रमं।
दोषोकशमनार्थं च भोगमोक्ष फलप्रदम्॥ 932
शिरः कण्ठ उरः कुक्षिबाहो श्चैव करिस्थले।
एतान्यंगानि कथ्यंते उपांगानि प्रवक्ष्यते॥ 933
ऊरुं च जानुनी चैव जंघे पादांघ्रिकद्वये।
जानुनी जघने जघनात्पूर्वं तयोर्मध्य द्विपार्श्वयोः॥ 934
कूर्परे मणिबंधोर्ध्वे पाणिद्वयमथापि वा।
ललाटं च भ्रुवौ चैव यत्रैवांगुलयस्ततः॥ 935
अधरद्वयमेवं च गण्डे च चिबुके ततः।
ये) नासाग्र नासिकां चैव ह्यवनासा पुटद्वये॥ 936
कर्णौ स्तनद्वये नेत्रे उपांगमिति कथ्यते।
मकुटं भूषणं वस्त्रं शिरश्चक्रमथापि वा॥ 937
पीठं वापि प्रभां चैव नखरोमाणि यत्र च।
ध्वजं वीरासनानीति शृंगानीति ततः क्रमात्॥ 938

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भ्रूरेखा च कर्णरेखा च तत्र रोमादयो ह्यपि कं।
9) .प्रत्यंगानीति कथ्यंते केचिद्दूर्याणि वक्ष्यते॥ 939
स्व) अंगोपांग विहीनानि राजाराष्ट्र दोषकृत।
तद्दोषशमनार्थाय प्रायश्चित्तं विधीयते॥ 940
यवं यवक्षयं हीनं आढकक्षय मादकं।
हीनांगेषु तद्बेरं आवाह्याग्यचयेद्घटे॥ 941
यत्नेन सूक्ष्मकाष्ठेण यत्नैरेव विचक्षणः।
समं कृत्वैव विधिवत् संप्रोक्षणमथाचरेत्॥ 942
हीनांगान्यधिकानीति घटे बेरं सुयोजयेत्।
छेदयित्वैव तद्रूपं योजयेन्मूर्तिरूपकम्॥ 943
प्रतिष्ठाक्रममार्गेण प्रतिष्ठां कारयेद्बुधः।
उपांगानि विहीनानि तद्बेरं योजयेद्घटे॥ 944
पुनस्संधानकं कृत्वा संप्रोक्षणमथाचरेत्।
प्रत्यंगानि विहीनानि तद्बेरं योजयेद्घटे॥ 945
किंचिच्छेदोक्त विधिवत्संप्रोक्षणमथाचरेत्।
प्रत्यंगान्यधिकानीति तोषितान्यस्तिथानि च॥ 946
प्रत्यंगेषु च हीनानि दूषितानि यथाक्रमात्।
कारयित्वैव नाहीनि पुण्याहं गव्यमाचरेत्॥ 947
कुड्यबं चैव विन्यस्य यजनं कारयेद्यदि।
मूलबेरस्य विधिवत् महाशांति क्रमं कृतं॥ 948
यथासनं प्रभाभिन्नं विन्यस्यैव तु शीघ्रकं।
घटे तद्बेरमावाह्य प्रभां यत्रैव कारयेत्॥ 949
पुण्याहं पञ्चगव्यं च स्नपनं शांतिमाचरेत्।
एतान्युक्तानि लोहस्य बेरस्यैव तु यत्र च॥ 950
अन्योक्तानि च शैलानां वक्ष्यते यत्र तत्परं।
इति योगजारण्ये जीर्णोद्धार पटलः॥ 951

अतः परं प्रवक्ष्यामि जीर्णोद्धारविधिक्रमं।
p.2.54) राजा राष्ट्र विवृद्ध्यर्थं भोगमोक्ष फलप्रदम्॥ 952
स्वयंभुं दैविकं चैव दिव्यमार्षकमानुषम्।
राक्षसं बाणलिंगं च सहाधालिंगमुच्यते॥ 953

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वचक्रपरचक्राभ्यां चोरेण स्फुटिते ततः।
खण्डितं भिन्नमेवञ्च शैथिल्यं चलनं यदि॥ ९५४
सकलानि पञ्चलिंगानां संग्राह्या तत्र वित्तमः।
स्वर्णरजतताम्रैर्वा बन्धयेत्पट्टबंधकैः॥ ९५५
चूर्णितं चेत्तु तत्काले गोळकान्तर्गतं कुरु।
दैविकं चेत्तथा कार्यं गाणवं मानुषं विना॥ ९५६
गाणवस्यैव लिंगस्य मानुषस्य विशेषतः।
मानुषं चेत्समुद्धृत्य समुद्रे प्रक्षिपेत्ततः॥ ९५७
एकादकविहीनं चेत् निर्दोषमिति कथ्यते।
तच्छिद्रं च समं कृत्वा सूक्ष्मशास्त्रेण शिल्पिना॥ ९५८
स्थापन क्रममार्गेण स्थापयेत्तत्र वित्तमः।
व . . . . समुद्रे प्रक्षिपेत्ततः॥ ९५९
शिला संग्रहणं कृत्वा . . . . शेषंगाचरेत्।
हीनं वापि समं वापि तद्बेरस्य विशेषतः॥ ९६०
शिल्पिना सूक्ष्मशास्त्रेण समं कृत्वैव तत्यजेत्।
स्थापनोक्त प्रकारेण स्थापयेत्तत्र वित्तमः॥ ९६१
पिण्डिका . . . . . तथैव परिकीर्तितम्।
वर्जितं योगशक्तिं च शक्तित्रयं विसर्जयेत्॥ ९६२
नव एव स्वप्राधान्यं यत्कालं चै . . . . . ।
. . गानां चैव शक्तीनामन्योन्यं दृश्या . . . .॥ ९६३
लिंगवशाच्छक्तिकार्यं शक्तिवशाल्लिंगमेव च।
लिंगात् प्रासादकं कार्यम् प्रासादाल्लिंगमुच्यते॥ ९६४
एनके . . . . ध्यामबेराणि लेपितम्।
ध्यामबेरादि संस्थाप्य नैवेद्यं हिमतोयकम्॥ ९६५
नवीकृतं ध्यामबेरं बालस्थापनमाचरेत्।
एकाह यजनं हीनं प्र . . . . ॥ ९६६
तद्दिनं पूजहीनं चेत् अंकुरं कलशं कृतम्।
शताष्टकलशं कार्यं शांतिहोमसमन्वितम्॥ ९६७
गळितं गव्यकैश्चैव षट् प्रस्थाज्याभिषेचयेत्।
अन्न शेषं . . . . कृतमेव च॥ ९६८
षट् प्रस्थाज्याभिषेकं चैव दिनं प्रतिदिनं प्रति।
मासादूर्ध्व विहीनं चेत् जलसंप्रोक्षणं कुरु॥ ९६९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति योगजे जीर्णोद्धारपटलः -

. . . . ।
- - - - . . . . . प्रायश्चित्तं विशुद्धये ॥ 970
स्वेष्टलिंगे परिभ्रष्टेन नष्टे दग्धे हृतेऽपि वा।
जीर्णे वा मूषिकाद्यैश्च काकमर्कटचोरकैः ॥ 971
जप्त्वा लक्षमघोरैश्च विधिना कारयेन्नवम्।
प्रतिष्ठाप्य भवेच्छुद्धिः पिण्डिकायां तथैव च ॥ 972
हस्तात्तु पतिते लिंगे जले भवति वा स्थले।
तत्रापि लक्षमावृत्य पुनस्संस्कारमर्हति ॥ 973
तिर्न) कुर्यतामभिनालीढं . . . . कांतिं न हीयते।
प्वंगितं दण्डवच्छायं सेवितं श्वपचादिभिः ॥ 974
पतितं चोरगर्तादौ हृतं राजादिभिर्यदा।
परित्यजेत्तदा लिंगं जप्त्वाघोरसहस्रकं ॥ 975
लिंगान्तरं प्रतिष्ठाप्य विशुद्धिमपि गच्छति।
लक्षं तु शिरमुन्मील्य स्थापयेच्च तदेव हि ॥ 976
प्रमादाच्चलिते लिंगे स्थिरे वाचलसंस्थिते।
पीठे वा पिण्डिकायां वा विद्यालक्षं जपेद्बुधः ॥ 977
लिंगच्छायां गुरोश्छायां लिंगिनां यदि लंघयेत्।
p.2-55) शतत्रयं जपेद्घोरं तथा गोब्राह्मणेषु च ॥ 978
अष्टसूत्र परायेतु शुद्धिं लिंगोक्तपादतः।
लिख्यतेऽन्य विशेषोत्र यो दृष्टः पारमेश्वरे ॥ 979
सूतके तु नवे छिन्ने सहस्रं परिवर्तते।
- - - - - . . के सूत्रे हस्तभ्रंशात्तथा शतं ॥ 980
अक्षमालां कराभ्रष्टां क्षालयेज्जलवारिणा।
गायत्र्या शतजप्तेन पुच्छे . . . . - - - - . . ॥ 981
. - - - कु सूत्रे हस्तभ्रंशात्तथा शतम्।
(अक्षमालां कराभ्रष्टां क्षालयेज्जलवारिणा ॥ 982
पादयोः पतिते तस्मिन् जपेद्घोरसहस्रकं।
मेरोश्च लंघने मंत्री जपेद्घोरसहस्रकम् ॥ 983
- - - - - . . . लिंगोक्ता दृष्टमभागतः।
पूजोपकरणं किंचित् स्पृष्ट्वा पीठादिकं पदा ॥ 984

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शतक्रय मध्योरस्य कामतस्त्वयुतं जपेत्।
अत वक्ष्ये विशेषेण जीर्णोद्धारविधिक्रमम्॥ 985
सर्वपापहरं पुण्यं शुभदं पापनाशनम्।
प्रमादाज्जीर्णहीने तु वर्जयेत्तु विशेषतः॥ 986
उपानास्थूपिपर्यन्तं जीर्णहीने . . . . ।
लिंगपीठेन चलितं सर्वजीर्णेन वर्जयेत्॥ 987
पूर्वन्तु कृष्णवर्णं स्याद्द्वितीयं श्वेतवर्णकम्।
पूर्वपीठं समादाय वर्जयेद्ग्रामनाशनम्॥ 988
पीठभिन्ने तु जीर्णं स्यात्तत्पीठं लिंगमानकं।
लिंगपीठसमं कुर्याद्द्वितीयं एकवर्णकम्॥ 989
लिंगं श्वेतं तु वर्णं स्यात् संग्रामांशं समाचरेत्।
बालस्थानं समादाय लिंगे संधानमाचरेत्॥ 990
श्वेतं लिंगं समाश्रित्य ब्राह्मणं क्षत्रियो भवेत्।
वैश्यशूद्रौ तु वर्णानां कृष्णलिंगं समाचरेत्॥ 991
कृष्णश्वेतं तथारूपं द्वितीयं चैकरूपकम्।
श्वेतं स्थापित संयुक्तं ब्राह्मण क्षत्रियस्तथा॥ 992
कृष्णलिंगं समाश्रित्य स्थापनं शूद्रमेव च।
स्थापनीनां तु स्थपति कुर्याच्छास्त्रमिहोच्यते॥ 993
ज्ञानशक्त्यात्मिके लिंगे क्रियाशक्तिश्च पीठिका।
पीठसंधानके वक्त्रमाचार्यः शिल्पिभिस्सह॥ 994
जीर्णोद्धारं समाश्रित्य - - - - . कमिहोच्यते।
शिल्पि रक्षा समायुक्तं पर्वताग्रे समाचरेत्॥ 995
लिंगं - - न वर्णं स्यात् पीठं वा कृष्णमेव च।
एकरूपविधं प्रोक्तं द्वितीयमपि वर्जयेत्॥ 996
राक्षसं मानुषं प्रोक्तं गाणवं चार्षकं तथा।
मानुषस्थापनं प्रोक्तं जीर्णोद्धारं प्रकल्पयेत्॥ 997
स्वायंभुवं दैविकं च जीर्णोद्धारणकं विना।
पूर्वं तु पूजयेल्लिंगं शकलं शल्यमेव वा॥ 998
शल्किकाकारकं कुर्यात् डोलकैरष्टबन्धनं।
गोलकाकारबन्धं च प्रतिष्ठां गामिहोच्यते॥ 999
विधिवत्पूजयेत्सम्यक् सर्वालंकारशोभितं।
अन्यथा लिंगसंप्राप्तिः आसुरं राक्षसं भवेत्॥ 1000
प्रमादाज्जिर्कृतं प्रोक्तं तद्ग्रामं तु विनश्यति।
प्र) प्रासादं विस्तवर्जयित्वा तु पूजा निष्फलमाप्नुयात्॥ 1001

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वसंपूजितं मासं पुनस्संधानमाचरेत् ।
सर्वसिद्धिकरं पुण्यं सर्वरोगविनाशनम् ॥ 1002
सर्वशत्रुक्षयंकरं तद्ग्रामं शांतिकं भवेत् ।
अन्यस्थाने तु लिंगानां तत्स्थापनवत्ततः ॥ 1003
श्रेष्ठेन स्थापनं प्रोक्तं मन्त्रकर्मिहोच्यते ।
श्वेतवर्णविहीने तु कृष्णस्थापनमाचरेत् ॥ 1004
प्रासादाज्जीवयित्वा तु राजा राष्ट्रं विनश्यति ।
देवता पूजयेत्तत्र शिवलोके महीयते ॥ 1005
P. 2.56) इति कारणे प्रतिष्ठातंत्रे जीर्णोद्धारपटलः ॥
जीर्णोद्धारविधिं वक्ष्ये मूललिंगविमानयोः ॥ 1006
दिव्यं स्वायंभुवा दीनां लिंगमानवशानुसृ(त)णु ।
स्वायंभुवे स्वयंभूते दिव्ये चार्षे तथैव च ॥ 1007
भिन्नं वा स्फुटितं जीर्णं तद्दोषं नावलोकयेत् ।
~~अ~~ हलविष्वीशभागं तु तत्प्रमाणविहीनकम् ॥ 1008
स्ख) दृश्यादृश्यमिति प्रोक्तं आपाताद्वाखिलं तं च वा ।
आमूलं वृत्तलिंगं च समूलं स्वयमुद्भवम् ॥ 1009
सूक्ष्मं वा स्थूलरूपं वा पूजनीयं विशेषतः ॥ 10
सुवर्णगोलकां कृत्वा सुदृढं कारयेत्ततः ॥ 1010
पीठभिन्ने पुनः कार्यं पूर्ववत्पीठमुत्तमं ॥
अंगहीने परित्याज्य उपांगादिषु न त्यजेत् ॥ 1011
अंगोपांगं च सांगञ्च प्रत्यङ्गञ्च चतुर्विधम् ।
लिंगपीठविमानानां सकलानामपि क्रमात् ॥ 1012
सम्यगालोक्य कर्तव्यं स्थापनोक्तेन वर्त्मना ।
रुय) राजा राष्ट्रहितार्थाय प्राणिनां सुखहेतवे ॥ 1013
इच्छा ज्ञान क्रियारूपं पीठशक्तिरिति स्मृतं ।
सर्वेषामपि लिंगानां पीठं च त्रिविधं भवेत् ॥ 1014
वेसरं नागरं चैव द्राविडं च प्रकीर्तितम् ।
नागरं चतुरश्रं स्यादष्टाश्रं वेसरं तथा ॥ 1015
द्राविडं वृत्तमाख्यातं तत्तल्लक्षणशोभितं ।
सुवृत्तमासनं प्रोक्तं अष्टाश्रं शयनं भवेत् ॥ 1016
चतुरश्रं स्थितं ज्ञेयं भद्रपीठमिति स्मृतं ।
द्र) अष्टाश्रं तु सुभद्रं स्यात्पद्मपीठं च वृत्तकं ॥ 1017

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्वादशांगुलमारभ्य पञ्चाशद्व्यंगुलावधि ।
उन्नतं तु विजानीयाद्विस्तारं तु शतांगुलम् ॥ 1018
लिंगमारवशाद्ग्राह्य उन्नतं विस्तृतं ततः ।
लिंगस्य नाह दैर्घ्यांशादधिकं हीनमेव वा ॥ 1019
समं वा कारयेद्धीमान् पीठलक्षण संयुतं ।
द्विरेखावलयं चैव महावलयमेव च ॥ 1020
कण्ठनाळादयश्चोर्ध्वं कारयेत्पद्मपत्रकं ।
चतुरष्टद्वादशेतत् पादषोडशसंयुतम् ॥ 1021
चतुर्दलसमायुक्तं पद्ममष्टदळं तु वा ।
प्रीतमो तं च घटितं रहस्यं न प्रकाशितं ॥ 1022
विषमांगुलमानेन हीनाधिक्ये गुरूत्तमः ।
पूर्वमान समोपेतं पूर्वलक्षण शोभितः ॥ 1023
अन्यथा चेत्कृतं यत्र राजा राष्ट्रं विनश्यति ।
कर्तारं शिल्पिनं हन्ति दैशिकं शीघ्रमेव च ॥ 1024
यां) पीठे दृष्टबन्धे जीर्णे तु पूजाया निष्फलं भवेत् ।
दृढ जीर्णमिति ख्यातं र कालमरणं भवेत् ॥ 1025
सम्यगपरीक्ष्य कर्तव्यं अंगोपांगादिलक्षणं ।
अंगं तु कण्ठनाळं च जलनिर्गमिनी तथा ॥ 1026
घृतवारीगर्तगर्भं पट्टिकाग्रं समंततः ।
उपांगं शिवशक्तिं च पिण्डिका च समंततः ॥ 1027
पद्मं च पट्टवलयं साङ्गं चेति प्रकीर्तितं ।
रेखासूत्रकुम्भाग्रं च प्रत्यंगं समुदीरितं ॥ 1028
भिन्नं च स्फुटितं ग्राह्यं दारितं चेत्परित्यजेत् ।
उपांगादिषु सर्वत्र यवाद्यंगुलमानतः ॥ 1029
न दोष इति विज्ञेयं तदाधिक्यात्परित्यजेत् ।
पुनः पूर्णं तदा कल्प्य शिल्पलक्षणसंयुतं ॥ 1030
शीघ्रमेव प्रकर्तव्यं पीठं स्वायंभुवादिकं ।
नागरे नागरं चैव वेसरे वेसरं तथा ॥ 1031
द्राविडे द्राविडं चैव पीठं प्रासादमेव च ।
P. L. 57) लिंगं च पिण्डिका चैव विमानं चैकजातिकं ॥ 1032
लिंगपीठ प्रमाणेन गर्भभित्तिप्रमाणकम् ।
भित्तिमूलं समारभ्य स्थूप्यंतं जीर्णशोधनं ॥ 1033

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थापकश्शिल्पिभिर्युक्तः तद्विमानं सुनिश्चयेत्।
मूलप्रस्तरमारभ्य ग्रीव्यग्रांतं सगौरवम्॥ 1034
घनीभूतमिति ज्ञेयं शिलाभिः परिकल्पयेत्।
तदूर्ध्वमिष्टिका दारु सुधाभिः स्थूपिकावधिः॥ 1035
लघुमादिव संयुक्तं नानावर्णसुशोभितम्।
घनीप्रकल्पिते स्थाने नभस्वजमनाख्यकम्॥ 1036
शातकुंभमयं कुंभं कुंभहीनं कचित् कचित्।
दिक्चतुष्कुंभसंयुक्तं मध्यकुंभोपशोभितम्॥ 1037
ताम्र दुर्वर्णि सौवर्णं गौल्वकं रत्नगर्भकम्।
सकल्वान्वितदिक्स्थानं प्राकार(साद) शिखरं यतः॥ 1038
मेरुवृत्तमिति ख्यातं कैलासं चतुरश्रकम्।
अष्टाश्रमंदरं प्रोक्तं पर्वताकृति दण्डकम्॥ 1039
त्र्यश्रकं च त्रिकोणं च एकत्रित्रि स्थलं समं।
श्रीकरं वृत्तमाख्यातं षोडशाग्रेन्दुकांतकम्॥ 1040
वि) सौमुख्यं हि तथाष्टाश्रं तुर्याश्रम विदशनिम्।
तत्तद्भेदानि विविधान्यागमोक्तानि कौशिकः॥ 1041
प्रासादशिखराण्येव पूर्ववत्कल्पयेत्सुधीः।
तत्र सांकर्यकरणात् भिन्नभेदोक्तिवर्त्मना॥ 1042
उत्पन्यलक्षणमानेन राजा राष्ट्रं विनश्यति।
श) सन्ताप ज्वर दुर्भिक्षान्नृप(स्य)श्च मरणं भवेत्॥ 1043
यद्विमानं च सर्वत्र जीर्णाजीर्णं विलोक्य च।
अंगोपांगानि देशेषु तत्तद्द्रव्य समन्वितं॥ 1044
आमूलाग्रं विभिन्नं चेत्स्फुटितं मादिवस्थले।
बाह्यारथैतरभित्तौ तु पादवर्गान्तमेव च॥ 1045
अंगजीर्णमिति ख्यातं ध्रुवांगं कोष्ठ देवताः।
कोणसन्ध्यग्रपार्श्वे च रश्मिमाला वितानकं॥ 1046
साङ्गं शिखरमित्युक्तं स्थूपिदण्डघटं तथा।
स्थूप्याधिक तलांतश्च परितश्चोपरिक्रमात्॥ 1047
वृषी पङ्क्तिः) वृषभं शक्ति· · · ·काय श्रोत्र सिंहमुखानि च।
यालिका भूतपङ्क्तिश्च मुखस्थूणं तथैव च॥ 1048

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रत्यंग मिश्रिलोपं च दारूपृच्छ दमेव च।
आधार दारवश्चापि वर्णविन्यासमेव च॥ 1049
छिद्र्यंरुक्ष स्फुटा स्फोटं पादवेद्यधिवेदिका।
तत्तत्क्रियानुसारेण दृढीकुर्यात्प्रयत्नतः॥ 1050
जीर्णे विमाने तद्देवाः सूर्यबिंबगताः स्वयं।
भूतप्रेतपिशाचाद्यैः आवृतं च तदालयम्॥ 1051
न भवेद्देवसान्निध्यं पूजायां निष्फलं भवेत्।
प्रासाद शिखरं देहं जीवो लिंग सदाशिवः॥ 1052
एतयोरंतरं नास्ति लिंगप्रासादयोरपि।
अजीर्णं जीर्णमित्युक्ते कोटि दोषं भविष्यति॥ 1053
सम्यगालोक्य शास्त्राणि कारयेत्साधकोत्तमः।
सूक्ष्मं स्थूलं ~~बीजानि~~ विजानीयाद्ध नीभूते शिलातले॥ 1054
शिलेष्टि दारु सांकर्यं न कुत्र गुरुलाघवे।
पूजांशा नाह दैव्यांशा द्रव्य संख्या प्रमाणकम्॥ 1055
क) पञ्चविंश निष्क्रान्तमंगुलैकैकशः क्रमात्।
उत्तमादिकनिष्ठान्तं नवधा भागमाहरेत्॥ 1056
द्रव्याणि) तत्रैक संख्य· · · · · सर्वं दैवैर्नियोजयेत्।
तद्द्रव्यं तु चतुर्भागं एकांशं दैविकं तथा॥ 1057
एकांशं पूजके लभ्या द्विजैकांशमुदाहृतम्।
एकांशं शिल्पिकं प्रोक्तं पूजा द्रव्यादिकं क्रमात्॥ 1058
एतैस्संप्रीणयेद्देवं तत्तत्कर्मानुसारतः।
स्थापनोक्तविधानेन कर्तव्यं साधकोत्तमैः॥ 1059
P. L. 58) जलाधिवासनं चैव नयनोन्मीलनं विना।
शिवं बाले समावाह्य मूललिंगे रहस्यतः॥ 1060
यजनं कारयेद्धीमान् याव· · · · · षेचनं।
यावन्मूल प्रतिमांतं ताव दग्निं सुपूजयेत्॥ 1061
पूर्णाहि कलशापेतं पञ्चगव्यं निधाय च।
मूलकुंभं च संस्थाप्य दिनं प्रत्येक कालतः॥ 1062
रात्रावपि च कर्तव्यं आवाहोद्वाह भावना।
मूलकुंभेन संस्नाप्य प्रार्थिनांते रहस्यतः॥ 1063

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्क्रियाकरणे काले पूजयेत्साधकोत्तमः।
द्विजभोजनसंयुक्तं अग्निकार्यसमन्वितम्॥ 1064
शिखाग्निशमने दोषं तत्क्रिया निष्फलं भवेत्।
तत्तत् क्रियालोपे कर्ता शीघ्रं विनश्यति॥ 1065
तत्क्रियैकाङ्गहीनं चेत् अभिचारक्रिया भवेत्।
नित्यपूजा प्रकर्तव्या उत्सवांश्च न कारयेत्॥ 1066
सुमुहूर्तादिकं कालं विना जीर्णं समुद्धरेत्।
शि) बालालये यजेद्देवं प्रासादशिखरान्वितम्॥ 1067
शश्च) तत्रत्यानपि देवांश्च दिनशश्च त्रिकालतः।
कुंभे दशाहपर्यन्तं दर्पणे मासमात्रकम्॥ 1068
मण्डले मण्डलान्तञ्च त्रिपक्षं परिकीर्तितम्।
त्रिमासं पटचित्रे तु षण्मासं दारुचित्रकम्॥ 1069
भित्तिचित्रे वत्सरान्तं द्विवर्षं दारुलिङ्गके।
इष्टिकामयलिङ्गे तु त्रिवत्सरमेव च॥ 1070
सकूर्चरत्नसौवर्णदुकूलपटसंयुतम्।
पुनस्सौवर्णपीठे तु द्वादशाब्दावधिक्रमात्॥ 1071
मूललिङ्गवशाद्देव त्रिपञ्चपरिमाणतः।
बालालयस्थे देवेशे द्विजाग्निगुरुपूजनैः॥ 1072
कारयेच्छिवशक्त्या मृष्टान्नैर्वसनादिभिः।
दक्षिणाभिः यथोक्ताभिः द्विजानां देशिकस्य च॥ 1073
तद्भागहीने कार्यं तत्तद्द्रव्यविधानतः।
ब्रह्मविष्णुहरांश्चैव मंत्रगर्भस्सदाशिवः॥ 1074
अतः समापनान्तं तत् समस्तैरपि तोषयेत्।
मूर्तिहोमं दिशाहोमं शान्तिहोमं समाचरेत्॥ 1075
ब्रह्ममूलमनुभिः तत्तद्द्रव्यसमन्वितः।
ततः समापने काले मण्डपे समलंकृते॥ 1076
तन्मध्ये वेदिकां कुर्याच्चतुर्वस्त्रशोभितं।
तिलतण्डुलधान्यैस्तु वासोयुग्मसमन्वितैः॥ 1077
पद्ममष्टदलं कुर्यात् चतुर्दिक्षु चतुर्दलम्।
मण्डपाद्यो विधानेन यजेत्सावरणान्वितम्॥ 1078
पुरतो वास्तुयजनं कृत्वा सम्यग्विधानतः।
सुवर्णपट्टे प्रालिख्य सदाशिवमनोन्मनीम्॥ 1079

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विघ्नेशानपि तद्देवान् इन्द्रादीन् दिक्पतीनपि।
तत्तन्मूलेन मनुना तत्तद्ध्यान समन्वितम्॥ 1080
मूलकुंभादिकान् सर्वान् सरत्नसुवर्णकान्।
सवस्त्रान् फलसंयुक्तान् संयजेदुपचारतः॥ 1081
अग्निकार्यादिकं सर्वं अग्निकार्योक्तमाचरेत्।
दशदानादिकं सर्वं भूदानादिकमेव च॥ 1082
यात्रादानादिकं चापि वित्तलोभविवर्जितः।
कृत्वाचार्यद्विजातीनां जापकानां च दक्षिणाः॥ 1083
परितोषादिकं वस्तु दद्यादाचार्यरूपिणे।
शिवाय कृतसंकल्पः प्रासादार्थं विशेषतश्च॥ 1084
शिवाग्निबालमूर्तीश्च कुंभे संयोजयेद्गुरुः।
प्रासादमूलकुंभौ तु तत्तदावरणान्वितम्॥ 1085
सुमुहूर्ते सुलग्ने तु शिल्पकर्म निवर्तिते।
(p. L. 59) प्रासादा . . . जन्मं मूलप्रासादमंत्रतः॥ 1086
सर्वद्वाराणि सर्वाणि तत्तन्मन्त्रेण देशिकः।
कुर्यात्प्रभूत नैवेद्यं नानावाद्यसमन्वितम्॥ 1087
आशीर्भिः . . . मुख्यानां तोषयेत्परमेश्वरं।
(बुधः) ततः समस्त दोषाणां शान्त्यर्थं स्नपनं बुधः॥ 1088
अष्टोत्तरसहस्रं तु अष्टोत्तरशतं तथा।
कुंभेष्वभ्यर्च्य विधिवत् अभिषिञ्चेन्महेश्वरं॥ 1089
सर्वशांतिश्च कर्तव्यः ब्राह्मणान् भोजयेत्ततः।
एकत्रिपञ्चसप्ताहं दशाहं वा समाचरेत्॥ 1090
एवं यः कुरुते मर्त्यः प्रासादोद्धारणक्रिया।
तस्य पुण्यफलं वक्तुं कामं वर्षशतैरपि॥ 1091
तथापि किंचिद्वक्ष्यामि नानाभोगसमन्वितः।
धर्मार्थकाममोक्षाणामधिकारः स्वयं प्रभुः॥ 1092
ब्रह्मादिपदवीं प्राप्य सोऽन्ते शिवपदं व्रजेत्।
इति कामिके प्रतिष्ठातंत्रे मूललिंगप्रासाद-॥ 1093
जीर्णोद्धारविधिपटलः।

अतः परं प्रवक्ष्यामि जीर्णोद्धारविधिक्रमं॥ 1094
सर्वपापहरं पुण्यं सर्वशत्रुविनाशनम्।
श्रीकरं विजयं सौख्यं आयुरारोग्यवर्धनम्॥ 1095

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वायंभुवे दैविकन्तु त्रिधा जीर्णं प्रकीर्तितम्।
निर्मूलं च समूलं च मूलं स्वायंभुवं त्रिधा॥ 1096
निर्मूलं सलिले मग्नं समूलं चलनाह्वयम्।
स्फुटितं भूमौ तु मूलं तु त्रिधा स्वायंभुवं स्मृतं॥ 1097
देवाद्यैः स्थापितं यत्तु दैविकं त्विति कथ्यते।
तद्वपीठे चैव तच्छक्तौ जीर्णोद्धारं न कथ्यते॥ 1098
खण्डिते स्फुटिते भिन्ने पीठे शक्तौ विशेषतः।
अंगुलादि वितस्त्यंतं निर्दोषमिति चोच्यते॥ 1099
तदूर्ध्वं मासिके चेत्तु बन्धयेद्देशिकोत्तमः।
बालकुंभे समावाह्य मण्डपादीन् विशेषतः॥ 1100
क्षि) संपूज्य भोजयित्वा तु विप्रान् दक्षिणया सह।
जपहोमं विशेषेण कारयेद्देशिकोत्तमः॥ 1101
स्थापनोक्तप्रकारेण स्थापयेद्विधिपूर्वकं।
आचार्यं पूजयेत्तत्र कटकांगुलीयकैः॥ 1102
आचार्यस्य मनस्तुष्टिः देवसान्निध्यकारणं।
पर्येष्टि परिचाराणां यथा शक्तिस्तु दक्षिणा॥ 1103
स्नपनं शांति होमं च महदाख्याभिषेचनैः।
एवं पक्षत्रयं प्रोक्तं विप्राणां भूरिभोजनम्॥ 1104
एवं यः कुरुते मर्त्यः स गच्छेदैश्वरं पदं।
सुप्रभेदे (कटिबंधनं) इति चंद्रज्ञाने स्वायंभुव जीर्णोद्धार विधिपटलः॥ 1105

अत्र वक्ष्ये विशेषेण कटिबंधनमुच्यते।
आयुरारोग्य जयदं अपमृत्युविनाशनम्॥ 1106
सर्वसंपत्करं नृणां सर्वसौख्यफलप्रदम्।
बन्धने तु यदा क्लिष्टे सद्यस्संधानमाचरेत्॥ 1107
शैलं च मृण्मयं चैव लोहजं दारुजं तथा।
एतेषां चैव बेराणां चलाचलमथापि वा॥ 1108
मूलाधारस्य पीठस्य बंधनं शरीरितं।
तद्बंधने तु विच्छिन्ने तद्बेरं चलनं भवेत्॥ 1109
तद्बेर चलनादेवं तद्देश चलनं भवेत्।
महाव्याधिसमुत्पन्नो महाशत्रुप्रपीडनं॥ 1110
तस्मात्सर्वप्रयत्नेन सद्यस्संधानमाचरेत्।
छिन्नं भिन्नं तथा ग्राह्यं जीर्णं चेत्तु नवीकृतं॥ 1111

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रतिमां चैव पीठं च कृत्वा पूर्वोक्तलक्षणैः।
कारयेद्विधिना सम्यक् नृपराष्ट्रहिताय च॥ ॥१२
वैपरीत्यक्षतं चेत्तु कर्तृनाशकरं भवेत्।
(P. 2- 60) चलिते स्फुरिते भिन्ने दहने : · नेन तु॥ ॥१३
प्रागुक्तैः पात्रैः कुर्यात् प्रतिमां सम्यगाचरेत्।
चलने स्थाननाशं स्यात् भेदने शत्रुपीडनम्॥ ॥१४
षोडशाहे तु चलनं मूर्तिनाशकरं भवेत्।
मासं मासद्वयं चेत्तु देशे चलनमाप्नुयात्॥ ॥१५
गणेशं क्षेत्रपालं च षण्मुखं नन्दिकेश्वरं।
(च) कङ्कालं च वृषारूढं चन्द्रशेखरमेव च॥ ॥१६
चण्डेशं चास्त्रराजादीन् बन्धनं च कृते सति।
त्रिरात्रं कारयेद्धीमान् संप्रोक्षणमथाचरेत्॥ ॥१७
उमामहेश्वरं नृत्तं तज्जटीबन्धनं कृतम्।
आमण्डलं वा मासं वा शान्तिं कुर्याद्विशेषतः॥ ॥१८
बन्धानां तु विशेषेण उत्सवं कारयेत्ततः।
अंकुरार्पण पूर्वन्तु सप्ताहं वा नवाहकम्॥ ॥१९
ग्रामप्रदक्षिणं कुर्यात् अन्त्ये चूर्णोत्सवं चरेत्।
महातीर्थं प्रकर्तव्यं निर्दोषविनिवर्तये॥ ॥२०
नित्यमष्टोत्तरशतैः स्नपनं कारयेत्ततः।
सन्धानस्य दिनात्पूर्वे अधिवासनमाचरेत्॥ ॥२१
शिवाग्रे मण्डपं कुर्यात् नानालंकारसंयुतं।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥ ॥२२
शालिभिः स्थण्डिलं कुर्यादष्टद्रोणैर्विशेषतः।
तण्डुलैस्तिललाजैश्च तन्मध्ये पद्ममालिखेत्॥ ॥२३
मण्डपोक्तविधानेन कलशं परिलिखेत् क्रमात्।
वेदिकोपरि कुम्भैश्च विद्येश्वरगणैस्सह॥ ॥२४
तन्मध्ये नवकुंभं च वर्धन्या च समन्वितं।
सकूर्चचूतसूत्रैश्च सरत्न प्रतिमादिकं॥ ॥२५
विन्यसेत्कुंभमध्ये तु पुण्याहं वाचयेत्ततः।
यथोक्तयजनं कुर्यात् षड्ध्वा विधिपूर्वकं॥ ॥२६
(धूपं) गन्धपुष्पं च धूपं च दीपनैवेद्यकं तथा।
नानावाद्यसमायुक्तं वै ध्वनिसमन्वितं॥ ॥२७

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नृत्तगीत समायुक्तं घण्टारवसमन्वितम्।
आवाहनीते तद्वेरं आचार्यो शिल्पिभिस्सह॥ ॥28
गन्धैः पुष्पैश्च धूपैश्च शुद्धवस्त्रेण वेष्टयेत्।
सद्यस्स्नानकं कुर्यात् यथा शोभैः यथाबलम्॥ ॥29
आचार्यो मूर्तिपैस्सार्धं यागकर्म समारभेत्।
नवाग्नि वाथ पञ्चाग्नि एकाग्निमथवापि च॥ ॥30
कुण्ड संस्कारपूर्वैश्च अग्निकार्यक्रमागतिः।
शिवगायत्रिमंत्रेण तथा पाशुपतादिभिः॥ ॥31
मूलमंत्रेण विधिवत् ब्रह्मांगैश्च विशेषतः।
अष्टोत्तरशतं हुत्वा मंत्रं प्रति विशेषतः॥ ॥32
समिधादि चरून् लाजान् प्रत्येकं शतसंख्यया।
जयादिरभ्याधानैच ततः पूर्णां समाचरेत्॥ ॥33
रात्रौ जागरणं कुर्यात् अधिवासनमाचरेत्।
परेद्युः प्रातरुत्थाय नित्याग्नौ तु विशेषतः॥ ॥34
सुमुहूर्ते सुलग्नेच अभिषेकं समाचरेत्।
ग्राम प्रदक्षिणवशात् नानावाद्यसमन्वितः॥ ॥35
विविधैर्दशदानैश्च दानं कुर्याद्विचक्षणः।
कुंभाभिषेचनं कुर्यान्मंत्रान्नं च निवेदयेत्॥ ॥36
(पञ्चगव्यैः) गव्यैः पञ्चामृताद्यैश्च शुद्धतोयैर्विशेषतः।
विशेषैर्गन्धतोयेन अभिषेकं समाचरेत्॥ ॥37
गंध वस्त्रादिभिर्भूष्य अष्टगन्धैर्विलिप्य च।
महाहविर्निवेद्याथ ब्राह्मणान् भोजयेत्ततः॥ ॥38
(p.2.61) आचार्य दक्षिणां दद्यात् शिल्पिभिः परिचारकैः।
अन्यैश्च परिचारैश्च दासीदासगणैस्सह॥ ॥39
यथा वित्तानुसारेण दक्षिणा संप्रदाय च।
अन्नवस्त्रादि तांबूलैः स्थान संभावनादिषु॥ ॥40
दत्वा विभवसारेण यथाप्रीति पुरस्सरैः।
उत्सवं च ततः कुर्यादन्त मण्डल देशके॥ ॥41
एवं यः कुरुते यः मर्त्यः स पुण्यां गतिमाप्नुयात्।
इति सुप्रभेदे ध्वजबंधनविधि पटलः॥ ॥42

अन्न वान्यप्रकारेण ग्राम संकट जीर्णके।
नद्यां समुद्रके वापि प्रमादात्संकटो यदि॥ ॥43
ग्रामेऽपि नगरे ~~मौलि~~ गेहे पट्टणे वासुरालये।
सङ्कटं जीर्णमाप्नोति इच्येतद्विजिना ततः॥ ॥44
यदुक्तं संग्रहाकार्य सर्वत्रा जीर्णमुद्धरेत्।
सङ्कटालय वास्तूनां सोम ईन्द्रे शान इंद्रयोः॥ ॥45
अग्न्यादि पञ्च कोणेषु न कुर्यात्तु विचक्षणः।
उत्तरे पूर्ववृद्ध्या तु नवृद्ध्या याम्य पश्चिमे॥ ॥46
मोहतस्थापयेच्चैव कर्ता भर्ता विनश्यति।
प्राग्दिशमुदङ्दिश्यम वृद्धिगमनं चरेत्॥ ॥47
. . . . सर्वसंपत्क्षयं भवेत्।
यन्मोक्तं स्थापयेद्धीमान् सर्वदा संपदामपि॥ ॥48
अन्यवा नदीनदे सम्यक् सागरे तीरकोणके।
गिरिसंकट तीर्थे वा पुण्यवृक्षे तु कूपके॥ ॥49
स्वयंभु लिंगबेरेण शास्त्या वा प्रतिमा भवेत्।
यावदास्थानसौकर्यं कल्पयेदिति बुद्धिमान्॥ ॥50
सोम ब्रूयादि वस्तूनां मंगलं वास्तु वास्तुकं।
मनोरम्यो पकर्तुश्च यथाशास्त्रो क्रमागतः॥ ॥51
एवं परीक्ष्य निश्चित्य पश्चाद्वास्तु प्रकारयेत्।
नृपकर्तोश्च वास्तूनां जन्मनाम निरीक्षके॥ ॥52
आयादि पञ्च शुद्धयर्थं सर्वसंपत्समुद्धये।
विस्तारा यामयोश्चैव परिणाहे पटे पि वा॥ ॥53
दण्डमान प्रकारेण हस्तमानं च कारयेत्।
आयादि दशधा चैव योगा षड् दृष्टि सूचयेत्॥ ॥54
ध्वजसिंहौ च वृषभौ गजश्चैव शुभावहः।
शेषयोन्या तु कर्तव्या भवतो कर्तुनश्यति॥ ॥55
तस्मात्सर्वप्रयत्नेन आयादि परितं शुभैः।
स्थपति स्थापके विप्रैः दैवज्ञै कर्तृकार्यके॥ ॥56
कर्षणादि परिच्छेदे सर्वदामपि कारयेत्।
गोवास दिवसस्थाने तृण संपूर्णमालिका॥ ॥57

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गोमयोलेपनं कृत्वा वास्तुपूजां समारभेत्।
चतुष्षष्ट्यैकाशीतिपदे सकले निष्कले तथा॥ ॥58
सूत्रे च पदमध्ये च ब्रह्मादि सुर पूजितः।
मण्डूकपदमाख्यातं परमशायिपदं द्विधा॥ ॥59
विघ्नेशं पूर्ववत्पूर्वं स्थपतिना स्थापकैस्सह।
वास्तुपूजां च होमं च पर्यग्निकरणं कुरु॥ ॥60
पश्चाद्वनस्पतिं देवान् भूतकेत बलिं तथा।
प्रवेश बलिमाप्नोति काल रात्रि च मेऽवतु॥ ॥61
अलकुक्कुट वाराही कुश्माण्डो बलिं ददेत्।
प्रागादिषु बलिं दत्वा योगिनीं चैव पूजयेत्॥ ॥62
शैवान् संभोजयित्वा तु ब्राह्मणान् भोजयेत्सुधीः।
उच्छिष्टमुक्तसेत्पश्चात् पञ्चगव्येन सेचयेत्॥ ॥63
देवद्विजनरेन्द्राणां स्थापनात्तक्षकैस्सह।
तथा वास्तु प्रकारेण योजयेच्छास्त्रवित्तमः॥ ॥64
गणेशादि महेशानौ विष्णु दुर्गा गुहस्तथा।
तत्तत्स्थानेषु संस्थाप्य भैरवौ कालि कौष्टके॥ ॥65
एवं परीक्ष्य कर्तव्यं शिल्पशास्त्रेण मार्गतः।
शिल्पशास्त्रमुदितं तु यत्कृतं राजराष्ट्र-॥ ॥66
p.2.62 इति वर्धते क्रमात्। तद्विपर्यय विपरीत -
यत्कृतं, राजराष्ट्र भुवि नाशनं भवेत्॥ ॥67
इति कारणे प्रतिष्ठातन्त्रे संकटजीर्णोद्धार।

विधिपटलः॥

मुद्राणां लक्षणं वक्ष्ये यस्मीश्चैव यथास्थितं॥ ॥68
उत्तान मञ्जलिं कृत्वा कपालं परिकीर्तितं।
तिर्यक् कृत्वा करे वामं कनिष्ठा नामि मध्यमा॥ ॥69
अंगुष्ठेनोत्क्रमे देवी ऋजुं कृत्वा प्रदर्शिनीं।
पराङ्मुखं करं कृत्वा स्कन्द देशो निवेशयेत्॥ ॥70
खड्वांगं कीर्तितं ह्येतत् खड्ग मुद्रां निबोध मे।
आत्मनस्संमुखं तत्तु हरमस्तलितो मया॥ ॥71
मुष्टिं बध्वा तु देवेशि तर्जन्या स्कृज कुण्ठयेत्।
अंकुशः कलितो ह्येषः इष्टजानि कुड्डकः॥ ॥72

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मुष्टिं कृत्वा वरारोहे संप्रदार्यं च दर्शनीम्।
नाराचस्तु समाख्यातो समासात्तव भैरवीम्॥ ॥73
मुष्टिं कृत्वा प्रसार्येत्तर्जन्यांगुष्ठतः प्रिये।
अग्रकञ्चन कुञ्चीयात् क्षिपाणी परिकीर्तिता॥ ॥74
अग्रप्रसारितं हस्तं शिष्टशाखे वरानने।
पराङ्मुखं नु तं कृत्वा अभयः परिकीर्तितः॥ ॥75
ज्येष्ठं भुजं प्रसार्याथ स्कंधोपरि निवेशयेत्।
प्रसन्नं दर्शयेद्देवी अंगुष्ठेन समासतः॥ ॥76
प्रसार्य साङ्गुलिस्तिस्रस्तत्त्रिशूलः प्रकीर्तितः।
गदा वै मुष्टिबंधेन वज्रमुद्रां निबोध मे॥ ॥77
वामहस्तमधः कृत्वा उत्तरं सुसमाहितः।
दक्षं त्वधोमुखं कृत्वा अंगुष्ठेन तु कनिष्ठिका॥ ॥78
उभयोरपि देवेशि वज्रमुद्रा प्रकीर्तिता।
डमरुमुष्टिबंधे तु दक्षहस्तस्य सुव्रते॥ ॥79
स्वाक्षीरेण समायुक्तं कर्तव्यं तु वरानने।
मुद्गरं तु प्रवक्ष्यामि अनामिकौ संप्रसारयेत्॥ ॥80
मुष्टिं बद्ध्वा वरारोहे मध्यमं तु प्रसारयेत्।
मुद्गरः कथितो ह्येवं वल्लकीश्च निबोध मे॥ ॥81
हस्तौ प्रसारयेद्देवी उत्तानौ सुसमाहितौ।
अनामे कुञ्चयित्वा तु वीणा मुद्रा प्रकीर्तिता॥ ॥82
भ्रामयेत्तर्जनिके द्वे तु चक्रसृष्टिनिकृन्तनम्।
अंगुष्ठं दक्षिणं ग्राह्य वामांगुलिभिरावृतम्॥ ॥83
दशांगुलिन्यस्यांगुष्ठौ शैरव मुद्रा प्रकीर्तिता।
एता मुद्रा महादेवि भैरवस्य प्रदर्शये॥ ॥84
अर्चने पूजनान्ते तु तथाचैव विवर्जयेत्।
कपालं चैव खट्वांगं डमरुश्च प्रदर्शयेत्॥ ॥85
कपालं धवलं ज्ञेयं खट्वांगं च तथैव हि।
त्रिशूलं च नाराचं खड्गं . . . . ॥ ॥86
. . . . . पिनाकिं च कृष्णन्तु संप्रकीर्तितं।
घण्टा हेमप्रभा ज्ञेया त्वंकुशं वरदप्रदम्॥ ॥87
पाशं भिन्नाञ्जनाभं तु स्फटिकाभो भयस्मृतः।
वरश्चक्रं च भेदेन ज्ञातव्यं वरवर्णिनि॥ ॥88

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

डमरुं हेमसंकाशं वीणावैतत्समप्रभा।
नदारक्ता 1189
राजवर्तनिभं देवि मुकुरं परशुं तथा।
प्रसारितं . . . अंगुष्ट इय तथास्थित ॥ 1190
मणिबंधे तलोलग्ना पद्ममुद्रा तदंतरा।
तिस्रः प्रसारितांगुलयः कनिष्ठानामिमध्यमा॥ 1191
अंगुष्ठानाकर्मी- . . . . स्वमुद्रा स्मृतः॥
मुद्राणां च समाख्यातं . . . . ॥ 1192
. . . सनमाकदा देवदत्तवरानने॥
स्वनामाकृति विन्यस्य नमस्काराबसानकाः॥ 1193
P. 2. 63 साधयन्ति महादेवि फलानि विविधानि च॥
निर्विघ्नकरणं ख्यातं मुद्राणां लक्षणं प्रिये॥ 1194
इति श्रीमत्स्वच्छंदे मुद्राधिकारश्चतुर्दशपटल:॥ ॥
जीवन्यासोत्तरं वक्ष्ये शृणुष्व महेश्वरि॥ 1195
जीवभेदद्वश प्रोक्ता सर्वे जीव स हंसवत्॥
हंसवाहं परब्रह्म परशाहदात्मवत्॥ 1196
आत्मवत्सर्वभूतानि स्थित्वा भूतेश्वरं शिवं।
शिवं शांतमनाकारं निर्मलं निर्विकल्पकम्॥ 1197
निराकारं हृदाकाशं कृत्वा इतमंजलिं।
प्रासादहृदयांतस्थं अर्बुदादित्यवर्चसं॥ 1198
वर्चसं वस्तु चैतन्यं दीहं कपूरिभिश्शिवम्।
पि) निष्कलं शिवमत्याभि समासीमानसागतं॥ 1199
भावनं कोटिमार्तण्ड कोटिमार्तण्डसन्निभं।
भावयेच्छरिसिआत्मानं भावनाकपवद्युतिं॥ 1200
वर्षाकाले दिशाप्रख्यं सौदामिनिसहस्रकं।
ह) सहस्रारे दले पद्मं पद्मरागमनागमम्॥ 1201
माणिक्यसदृशं कन्दं गोमेदकसुसन्निभं।
मरतकं गुह्यहृदक्षेमे . . . कादंबरीननम्॥ 1202
शरत्कोटिसमप्रख्यं अष्टत्रिंशत्कलात्मकं।
देहंकलाहृदि प्रोक्तं स्फुरत्तारकसन्निभम्॥ 1203
देहदेही हितात्मानं ध्यात्वा देवं सदाशिवम्।
रक्तश्या मलशुक्लाभं बिन्दुनादात्मनस्थितं॥ 1204
मनस्वं मेचकालीनं बुद्धिमाणिक्यदा हृकृतिः॥
ॐ हंकारात्मनप्रख्यं जपाविचन्तविधानकम्॥ 1205

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निष्कान्तं निवकल्कान्तस्थं उन्मनस्थ परशिवः।
द्वादशाद्वादशान्तमार्गे उद्यत्कोटिरविप्रभम्॥ 1206
निर्विकंपप्रभादीपं दशनादावृतात्मकम्।
आवृतावरणादीनां मन्त्रतंत्रे क्रियावहम्॥ 1207
तत्क्रिया हृत्स शात्मानं ध्यानं कुर्यात्सदाशिवं।
वाम दक्षिणहस्ते तु आनन्दानंदमेव च॥ 1208
प्रसूनाग्रे मनोवायु भावनं पिण्डवत्क्रमात्।
मूले चैव महाभेरी स्वाधिष्ठाने तु काहळम्॥ 1209
द्वे) ताळपूर विशुद्धयेऽपि मद्दळस्वरसंयुतम्।
आज्ञाघण्टारवारे तु काळी मेघाळकेऽपि च॥ 1210
द्वादशान्तात्समानीय वाङ्मनातीतगोचरम्।
आवाहयेत्ततो देवं क्रियाब्रह्म निवेदयेत्॥ 1211
धूपदीपं च नैवेद्यं सर्वं सन्ध्योपदेशवान्।
दिवा पूजा न कर्तव्या रात्रौ चैव तु नैव च॥ 1212
सन्ततं पूजयेद्विद्वान् दिवारात्रौ तु वर्जयेत्।
वर्जयेद्यष्टि . . . . त्यकोटयः॥ 1213
एवं ध्यायेत्समाख्यातं मनसावाहनं भवेत्।
. . . . भावयेत्॥ 1214
भावयेच्छिवलिंगादौ . . . . ।
शिवं संचिन्तयेत् श्यामं ध्यानहं होत्पादि वा॥ 1215
एकीकृत्य विध्यौ ज्ञानं विषयांते मनोन्तके।
. . . . यामहादेव पदाश्रितम्॥ 1216
आश्रितं आदिरझोऽपि वाहयित्वा शिवं सदा।
२८) इति पारमेश्वरतंत्रे जीवन्यास(उत्तर)विधिपटलः॥ 1217
अतः परं प्रवक्ष्यामि मकुटस्याभिषेचनं।
आयुरारोग्यजयदं अपमृत्युविनाशनं॥ 1218
p.2.64) सर्वशत्रुक्षयहरं सर्वारिष्टनिवारणम्।
कीर्तिदं विजयं पुण्यं परसेनापलायनम्॥ 1219
यस्मिन् देशे पुरा शंभुः राज्यतंत्रं करोति च।
तस्मिन् देशे तु नृपतिः कारयेद्देशिकेन तु॥ 1220
वसन्तकाले शारदि उत्सवे वा विशेषतः।
देवानुकूल नक्षत्रे देशिकश्चेशुभोदये॥ 1221

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुवारे सुतिथौ राशौ प्रारम्भे देशिकोत्तमः ।
सायं काले महानद्यां स्नात्वा साधकपुंगवः ॥ 1222
शुद्धवस्त्रधरो भूतिं धृत्वा रुद्राक्षमालिकाम् ।
सौवर्णं रजतं ताम्रं कुम्भमेकं प्रगृह्य च ॥ 1223
उदकेन समापूर्य चूतपुष्पोपशोभितं ।
गजस्कन्धे समारोप्य नृत्तगीतादि वाद्यकैः ॥ 1224
पुरीं प्रदक्षिणीकृत्य नयेद्देवस्य सन्निधिम् ॥
आस्थानमण्डपे वाऽथ देवाग्रे वा विशेषतः ॥ 1225
वितान दर्भमालाद्यैः मुक्तादामैरलंकृते ॥
मल्लिका जातिवकुलैः अगरुश्च वधूपकैः ॥ 1226
सिंहासने समारोप्य देवं देवीं विशेषतः ॥
अलंकृत्य विशेषेण नवरत्नादिभूषणैः ॥ 1227
सर्वोपचारसंयुक्तं राजचिह्नसमन्वितं ॥
तत्र संकल्प्य पुण्याहं वाचयेद्देशिकोत्तमः ॥ 1228
सद्योंकुरार्पणं कर्म कृत्वा कौतुकबन्धनं ॥
अभिषेकार्थमुद्दिश्य स्नपनं कल्पयेत्ततः ॥ 1229
सुवर्णं रजतं ताम्रं नवकुंभं प्रगृह्य च ॥
ससूत्रान् सफला हेम रत्नपुष्पोपशोभितान् ॥ 1230
कलशस्योक्त मार्गेण शोधयेत्पूर्ववर्त्मना ॥
दशद्रोणैश्च शाल्याभिः तदर्धैस्तण्डुलैः तिलैः ॥ 1231
तदर्धैश्चैव लाजैश्च प्रतिमां पञ्चनिष्कतः ॥
परिवारे तु निष्कैकं नवरत्नं सुवस्त्रधृक् ॥ 1232
चूतपल्लव शोभाढ्यान् नारिकेरसतंतुकान् ।
कुंभान् संस्थाप्य विधिना पूजयेद्देशिकोत्तमः ॥ 1233
हारकुण्डलकेयूर कटकांगद वस्त्रकैः ।
ग्रैवेयकै रत्नमुद्रिकाभिः अलंकृत्य शिवं द्विज ॥ 1234
उदकेन समापूर्य चंदनोशिरसंयुतम् ।
मनोन्मनीं समावाह्य मध्यकुंभे विशेषतः ॥ 1235
गंगा च यमुना चैव नर्मदा च सरस्वती ।
सिन्धु गोदावरी चैव कावेरी ताम्रपर्णिका ॥ 1236
परिवारघटेष्वेता तत्तन्नाम्ना सुपूजयेत् ।
आवाहन स्थापनादीनि नैवेद्यं धूपदीपकम् ॥ 1237

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चतुर्वेदविदो विप्रा चतुर्दीक्षाव्यवस्थिताः।
पठंते देवतालिंगान् मंत्रान् संनिधि हेतवे॥ ।238
तदग्रे स्थण्डिलं कृत्वा हस्तमात्रप्रमाणतः।
अग्न्याधानादिकं सर्वं अग्निकार्योक्तमाचरेत्॥ ।239
शांतिहोमं ततः कृत्वा उक्तमंत्रेण देशिकः।
जयादिरभ्याधानं च राष्ट्रभृत् अक्रमाज्जुनेत्॥ ।240
यदस्य कर्मणि इति पूर्णाहुतिमथाचरेत्।
कुंभाद्बीजं समादाय देवस्य शिरविन्यसेत्॥ ।241
कुंभेभ्यो बीजमादाय देवस्य मकुटोपरि।
दश दानं पुरा कृत्वा किरीटे हेमवेत्रके॥ ।242
नवरत्नसमाकीर्णे मुक्ताफलविभूषिते।
राज्यलक्ष्मीं तु मकुटे आज्ञाशक्तिं तु वेत्रके॥ ।243
संपूज्य विधिवत्ते तु धूपदीपौ ददौ गुरुः।
किरीटं सर्ववाद्यैश्च आशीर्वादपुरस्सरं॥ ।244
धृत्वा शिरसि देवस्य मधुपर्कं निवेदयेत्।
धूपदीपौ ततः कुर्यात् दारार्तिकपुरस्सरम्॥ ।245
दर्पणं चामरं छत्रं व्यजनं तालवृन्तकम्।
P.2.65) पञ्चब्रह्मादिमंत्रेण क्रमेण तु ददेद्गुरुः॥ ।246
भक्षितं दापयेद्राज्ञे भक्तान्येभ्यो विशेषतः।
आचार्यः शिवदावस्स्यात् अनयोरंतरं नहि॥ ।247
यः पश्येदनयोर्भेदं सो भोगतिमवाप्नुयात्।
शिवेनाचरितं यत्तु देशिकानुष्ठितं भवेत्॥ ।248
अन्यथा तत्कृतं चेत् राजा राष्ट्रं विनश्यति।
शिवस्य पुरतस्थित्वा गृह्णीयाद्देशिकोत्तमः॥ ।249
नवरत्नमयं वेत्रं गंधमाल्यानुलेपनं।
अर्चकस्य तु पार्श्वे तु राजमंत्रिपुरोगमाः॥ ।250
गच्छेयुः राजचिह्नानि छत्रचामरवृन्तकैः।
पुरोभागे स्थितानि स्युः भूत्वा · · त्रिपूर्वकम्॥ ।251
गजस्कन्धे समारोप्य पुरमावृत्य देशिकः।
भक्तैर्जनार्विधजनैः विनोदालोकनोत्सुकैः॥ ।252
शनैः प्रदक्षिणीकृत्य प्रविश्यास्थानमण्डपं।
रङ्गे वा शिबिकायां समारोप्य महेश्वरम्॥ ।253
परिवेषक्रमेणैव देवं धाम निवेशयेत्।
दृष्टिदोषनिवृत्यर्थं राजरक्षां समाचरेत्॥ ।254

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निंबपत्रं च कार्पासं गोशकृत् गौरसर्षपम्।
लवणं चतृष्णावृत्य मूर्ध्नादिपादुकावधि॥ 1255
आरार्तिके तु निक्षिप्य नीराजनमथाचरेत्।
महादेवीं पुरस्कृत्य प्रविश्यादालयं शिवं॥ 1256
स्नपनं शांति होमं च अभिषेकं महाहविः।
पूर्ववद्धूपदीपौ तु क्रमेण परिवर्तयेत्॥ 1257
आचार्यं पूजयेत्पूर्वं यथा संतुष्टमानसः।
आचार्यस्य मनस्तुष्टिः देवसान्निध्यकारणं॥ 1258
दक्षिणां दापयेत् पश्चात् ब्राह्मणान् भोजयेत्ततः।
दीनान्धकृपणादीनां अन्नवस्त्रादिकं ददेत्॥ 1259
कारागृहे च ये बंधा तान् मुक्तनिगलान् कुरु।
एवं यः कुरुते मर्त्यः अखण्डैश्वर्यमवाप्नुयात्॥ 1260
राज्यार्थी राज्यमाप्नोति पुत्रार्थी लभते सुतम्।
कामार्थी काममाप्नोति मोक्षार्थी मोक्षमाप्नुयात्॥ 1261
इति सहस्रागमे मकुटाभिषेकनेत्रदानविधिपटलः।

अथातः संप्रवक्ष्यामि आचार्यकल्पलक्षणम्॥ 1262
विद्यापदार्थकुशलः क्रियापादपदक्रमः।
योगपाद क्रियाभ्यूह चर्यापादानुवर्तकः॥ 1263
सितचंदनलिप्तांगो श्वेतमालाविभूषितः।
सुश्लक्ष्णसितवस्त्राढ्य सुधूपामोद एव च॥ 1264
मुकुटेन विचित्रेण स्फुरन्माणिक्यतेजसा।
मुक्ताफलमये शुभ्रे कुण्डले रुक्मसन्निभे॥ 1265
चित्रे कर्णविलंबे तु कण्ठाभरणविभूषितः।
सत्कृताभरणं भद्रं ब्रह्मसूत्रंच मौक्तिकैः॥ 1266
निर्मितं वकुलं भद्रं कटिसूत्रं च कांचनम्।
नायकेन विचित्रेण मध्ये नौ··· वचसम्॥ 1267
पद्मरागमयेनाथ लक्षणैर्लक्षितेन च।
कटके च शुभे धार्ये वज्ररत्नविचित्रके॥ 1268
आचार्यदक्षहस्तेन रत्ना····गुलीयकं।
स्वर्णाम्बरेण चोष्णीषं दशाहस्तप्रमाणतः॥ 1269

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

उत्तरीयं च तेनोक्तं धारयेद्देशिकोत्तमः।
ततश्चोपविशेन्मौनी कौबेरीदिङ्मुखस्तथा॥ 1370
दिशो विलोक्य नेत्राभ्यां पञ्चब्रह्मनमनुस्मरन्।
नित्ये नैमित्तिके कार्ये एवं धार्यप्रपूजयेत्॥ 1371
इति मतङ्गपारमेश्वरे आचार्यलिंकरणविधि।

—पटलः—

पश्चिमाभिमुखं वक्ष्ये समासात् कथयामि ते॥ 1372
p. 2. 66) सन्मद्वारं च वक्त्राख्यं मण्डपादीवि पश्चिमे।
प्राक्दिशान्तद्दिशं मूर्तिन् पश्चिमे तु प्रकल्पयेत्॥ 1373
पश्चिमोदित दिङ्मूर्तिं पूर्वायां दिशि कल्पयेत्।
स्थापयेन्मूललिंगञ्च पश्चिमाभिमुखं यथा॥ 1374
गोमुखं चण्डिकाश्चैव सौम्यायां जलधारकान्।
लिंगे च॥ चिन्तं तु सादित्यं महेशं वा विशेषतः॥ 1375
यत्र सूत्रस्य नाभिं च हृदयं च स्तनोदकं। ⟵
नाभिलिंगं च जान्वंतं पादयोरंगुलाग्रकं॥ 1376
पश्चिमाभिमुखं नित्यं कल्पयेत्त्वर्चये बुधः।
अत्र सद्यं पूर्ववक्त्रं वामवक्त्रं तु दक्षिणे॥ 1377
ममुखं) पुरुषं पश्चिमे चैव अघोरं सौम्यदिङ्मुखं॥
दर्वि) ईशानं मूर्ध्नि वक्त्रं स्यात् दीर्घं नैरृतमाश्रितं॥ 1378
दयात्वैवं अर्चयेत्प्राज्ञः . . क्रियामन्त्रानुभेदतः।
मनोन्मनीमुमां याम्ये चण्डेशं शाङ्करेऽर्चयेत्॥ 1379
अन्यान् स्वावरणान् देवान् सांगैर्वहिस्समर्चयेत्।
वृषभं परिवारं तु पश्चिमे तु समर्चयेत्॥ 1380
महापीठं समभ्यर्च्य प्रथमं वृषभं यजेत्।
शनैः प्रदक्षिणं कृत्वा प्राच्यां स्कंदं समर्चयेत्॥ 1381
प्रदक्षिणक्रमाद्यावत् शाङ्करान्तं विशेषतः।
ततो विघ्नानि भूतानि महापीठे समर्चयेत्॥ 1382
स्नपने शिवकुंभं तु स्थापयेत्पश्चिमाननं।
वेदिकायां धरं चैव शैवाख्यं वर्धनी तथा॥ 1383

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पश्चिमामुखं स्थाप्य दर्भाग्रेत्वग्निकुण्डकम्।
कल्पयित्वा तु होमार्थं भक्त्याचैवं समाचरेत॥ 1384
ध्वजस्थाने त्र तीर्थं च चूर्णोत्सवे तथैव च।
त्रिशूलं पश्चिमाग्रं स्यात् तस्याग्रे कलशादयः॥ 1385
स्थापयित्वा यथान्यायं सर्वकर्म समाचरेत्।
उत्तराभिमुखं नत्वा नैरृत्यां स्थितः अर्चयेत॥ 1386
एवं कृते नरेन्द्रस्य विजयायुर्बयं सदा।
राष्ट्रस्यार्ति निवृत्तिस्स्यात् विपरीते विपद्भवेत॥ 1387
शिवन्तु शिवलिंगेऽत्र मोक्षकामी समर्चयेत।
उभयार्थत्र सादाख्यं महेशं वा यजेत्सदा॥ 1388
शिवार्चनं शिवे लिंगे मिश्रं च सकलं विना।
सर्वेश्वरपदद्ध्वा शिवायेत्यर्चनं गुरोः॥ 1389
शेषं प्राग्वत्कर्तव्यं अर्चनोक्तं विशेषतः।
इति रौरवतंत्रे पश्चिमार्चनमुखार्चनविधिः॥ 1390
पटलः
अजिते। मेरुमंदरकैलास शिखरेषु सुधातुषु।
श्रीपर्वते देवगिरौ महेन्द्रे गन्धमादने॥ 1391
गिरिष्वेतेषु चान्येषु पुण्यतीर्थयुतेषु च।
तथाभिमतेष्वरण्येषु गंगातीर्थयुतेषु च॥ 1392
यमुनाया सरस्वत्या गोदावर्यास्तदद्वये।
नदीनदानामन्यानां पुण्यानां तीरकेऽपि वा॥ 1393
महदादि रतिसासीत भूतानां महतामपि।
समुद्रतीरे सर्वत्र पुण्यक्षेत्रे समीपतः॥ 1394
सर्वक्षेत्रेषु पुण्येषु कुरुक्षेत्रमुखेऽपि च।
p. 2-67) अविमुक्तादि सर्वेषु पुण्यस्थानेषु चैवहि॥ 1395
गोष्ठे देवालये वापि गुरूणामाश्रमेषु च।
उद्यानेषु च रम्येषु सिद्धिक्षेत्रेषु वा पुनः॥ 1396
मुनीनामाश्रमे रम्ये वानप्रस्थाश्रमेषु च।
इति दीक्षास्थाननिर्देशविधिः॥ 1397
अथ दीक्षाविधिं वक्ष्ये सर्वसिद्धिफलप्रदम्।
अपत्र विजयं चैव आयुरारोग्यवर्धनम्॥ 1398
दीयते च शिवत्वं हि क्षीयते पापसंचयः।
क्षयात्पापस्य शैवत्वात् दीक्षा चेत्यभिधीयते॥ 1399

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महेन्द्रे मलये विन्ध्ये हिमवत्पारियात्रके।
गंगातीरे सरित्पुण्ये समुद्राश्रयकेऽपि वा॥ ।300
पुष्पोद्यानेऽथवा शुद्धे जलेश्वरसमीपके।
देवालये महास्थाने दक्षिणद्वारकालये॥ ।301
कुंदवृक्षे गवां स्थाने दीक्षास्थानं प्रकल्पयेत्।
दीक्षास्थानविधिप्रोक्तः दीक्षाकालविधिं शृणु॥ ।302
देशनिर्देशमाह —
महेन्द्रे मलये विन्ध्ये हिमवत्पारियात्रके।
गंगातीरे सरित्पुण्ये समुद्राश्रयकेऽपि वा॥ ।303
पुष्पोद्यानेऽथवा नित्यं क्षीरवृक्षसमीपके।
शुद्धदेशे मनोरम्ये गृहे देवालयेऽपि वा॥ ।304
प्रागुदक्प्रवणे देशे मण्डलं त्वालिखेद्बुधः।
इति सुप्रभेदे दीक्षार्थमण्डलपटले कालनिर्णयः॥ ।305
सप्तम्यां नवम्यां च एकादश्यां त्रयोदशी।
नक्षत्राणि शुभान्याहुः आदित्ये सोमवारके॥ ।306
गुरुशुक्रे दंसुरूनां दीक्षाकर्मसु शोभनम्।
इति सुप्रभेदे॥ काश्यपीये कालविधिः॥
अल्पदोषे गुणाधिक्ये दिनं लग्नं च संग्रहेत्॥ ।307
अनेककोटिदोषाढ्यं दिनं चेद्धीनमेव वा।
दोषो हीनत्वमायाति जीवं दृष्ट्वा द्विजोत्तम॥ ।308
अनेककोटिदोषस्तु जीवेनैकेन नश्यति।
तमांसि वामितं रात्रौ न संति रविणा यथा॥ ।309
तथैव जीवदृष्ट्या तु सर्वदोषास्समुत्थिताः।
एवं परीक्ष्य च बुध्वा कष्टादीनि च कारयेत्॥ ।310
इति काश्यपीये कालविधिः।
उत्तरायणकाले तु माघमासं विवर्जयेत्॥ ।311
शुक्लपक्षे च द्वितीये च तृतीया पञ्चमी तथा।
षष्ठी च सप्तमी चैव दशमी च त्रयोदशी॥ ।312
तिथयः शुभदा प्रोक्ता दिनपूर्वार्ध इष्यते।
श्रेष्ठा वारा गुरुसोमेन्दुशुक्राणां परिकीर्तिताः॥ ।313
पक्षाश्चिद्रां सपर्वांश्च रिक्तां चापि विवर्जयेत्।
कोणांगारदिनेशानां वारांश्च परिवर्जयेत्॥ ।314

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्राजापत्यैंद्रवं तिष्यमाद्रास्वाती पुनर्वसुः।
आश्विनं रेवती हस्तं चोत्तरादित्रयं तथा॥ 1315
मैत्रं वैष्णवसंयुक्तं नक्षत्रं शुभदं स्मृतम्।
अजं कर्णं च वर्ज्यं स्यात् कन्दकस्थूणमेवच॥ 1316
पापयुक्तं तथा दृष्टं दृष्टं काक्षितमेव च।
सव्यतीपातकं चैव वर्जनीयं प्रयत्नतः॥ 1317
द्रेक्काणांशक होराश्च दर्शनं शुभदं सदा।
इत्यजिते कालविधिपटलः॥ 1318

कारणे। पूर्वभाद्रपदे माघे चाषाढे मार्गशीर्षके।
दीक्षांतं कारयेद्धीमान् अन्यमासेषु कारयेत्॥ 1319
शुक्लपक्षे शुभर्क्षे तु शुभवारादिभिर्युते।
सोमो बुधो गुरुश्शुक्रः शुभाश्चपरिकीर्तिताः॥ 1320
एषां वारेषु कर्तव्यं दीक्षाकर्मविशेषतः।
पूषा च रोहिण्यादित्या श्रवणं चाश्विनी मखः॥ 1321
सावित्री त्वाष्ट्र वायव्ये नैर्ऋते मैत्रमेवच।
तिष्य त्रीण्युत्तरात्मा च हत्वा शिष्य त्रिजन्मकं॥ 1322
नक्षत्राणि प्रशंसंति दीक्षाकर्मणि सुव्रताः।
राशयश्च वराश्रेष्ठा मध्यमं चोभयास्स्मृताः॥ 1323
स्थिराश्च नैधनस्थाने ग्रहास्सर्वे विवर्जिताः।
आचार्यशिष्ययोरानुकूल्यादिशुभदं भवेत्॥ 1324
अंकुरार्पणं कुर्याद्धीमान् प्रागुक्तविधिनासह।
मकुटे॥ उत्तरायणकाले तु शुक्लपक्षसमन्विते॥ 1325
अयने विषुवे चैव ग्रहणे सोमसूर्ययोः।
सर्वमासेषु कर्तव्यं आचार्येच्छावशात्क्रमात्॥ 1326
सुमुहूर्ते सुलग्ने च दीक्षाकर्म च कारयेत्।
शिष्याणां वत्सरात्पूर्वं परीक्ष्य च गुणागुणान्॥ 1327
जासिष्टे: सूर्यवारादौ नक्षत्र(योग)विधिः।
अन्यातः संप्रवक्ष्यामि वार नक्षत्रयोः फलम्।
योगे शुभाशुभं ज्ञात्वा सर्वकर्माणि कारयेत्॥ 1328
सूर्यवारे। उत्तरत्रय रोहिण्यौ हस्त श्रवण रेवती।
पुष्य स्वात्यसुराण्यर्के सर्वकर्माणि कारयेत्॥ 1329

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मृगशिरो मखा ज्येष्ठा विशाखा भरणी तथा।
अनूराधाश्च सूर्येण सर्वकर्माणि कारयेत्॥ 1330
सोमवारे॥ श्रवणं पुष्य रोहिण्यौ चित्ता सौम्यवारकं।
सौम्यस्य दिवसे युक्तं सर्वकर्म समृद्धिदम्॥ 1331
विशाखाग्नि मखा पौष्णं आषाढं मैत्रमेव च।
अभिजित्सोमवारेण सर्वकर्म विनाशनम्॥ 1332
कुजे। पूर्वोक्ति राख्य फल्गुन्यौ रोहिण्यां चाश्व रेवती।
अंगार दिवसे युक्तं सर्वकर्म समृद्धिदम्॥ 1333
श्रवणं पूर्वभाद्रं च त्वाष्ट्री ज्येष्ठा विशाखकं।
धनिष्ठे च दिनेंगारे सर्वकर्म विनाशनम्॥ 1334
बुधवारे॥ पूर्वोत्तराख्य फल्गुन्यौ उत्तराषाढकृत्तिके।
बुध) मृगशीर्षमनूराधं बुधवारे समृद्धिदं॥ 1335
बुधे मूलं च रेवत्यौ अश्विनी भरणी तथा।
पूर्वभाद्रा धनिष्ठा च सर्वकर्म विनाशनम्॥ 1336
गुरुवारे॥ पूर्व फल्गुनि पुष्याश्विषु मघा स्वाती च रेवती।
पुनर्वसु गुरौ वारे जनानां सर्वसिद्धिदम्॥ 1337
बृहस्पति दिने चार्द्रं तार मुत्तर फल्गुनि॥
शततारक रोहिण्यौ सर्वकर्म विनाशनम्॥ 1338
शुक्रवारे॥ पूर्वभाद्रार्यमा सौम्यं हस्त श्रवण रेवति॥
शुक्रस्य दिवसे युक्तं योगोऽयममृतं भवेत्॥ 1339
P. 2. 69) विशाखा सार्पमैत्राश्वि धनिष्ठा तिष्य रोहिणी॥
चित्रा च चित्र दैवत्यं शुक्रवारे विवर्जयेत्। — 1340
मंदवारे॥ कृत्तिकाश्विनि रोहिण्यौ शततारानिलं तथा॥
अर्कजे दिवसे युक्तं योगोऽयममृतं भवेत्॥ 1341
पुनर्वसु मखा चार्द्रा रेवत्युत्तर फल्गुनी॥ +
सावित्रं श्रवणं चैव शनिवारे विसर्जयेत्॥ 1342
कामिके तु॥ अल्पकालं प्रवक्ष्यामि सर्वेषां तु सुखावहं॥
अर्धमासं विना शस्तं भानोरयनमुत्तमं॥ 1343
दक्षिणायन काले तु . - - - . न्तं तथा॥
विधीयते तदन्ये तु निन्दिता मताः॥ 1344
शुक्लपक्षश्शुभोऽन्यस्मिन् सप्तम . . . . पञ्चमं॥
तत्त्वाद्यं तृतीयां वा कृष्णे चान्त्यं च संत्यजेत॥ 1345

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मध्यमे मध्यगौ भागौ श्रेष्ठावन्यौ प्रकीर्तितौ।
नवदीपं च दश्यौ च हित्वा युग्मेतरां तिथिम्॥ 1346
आयामपि तथा युग्मे द्वितीया दशमी तथा।
कृष्णे षष्ठीश्च या शिष्टा तत्सर्वाश्च विनिन्दिताः॥ 1347
रोहिणी चोत्तरा तिस्रो हस्तस्वाती पुनर्वसुः।
अनुराधाश्च युक्तसोमं वैष्णवं तरुणं मखं॥ 1348
चित्राश्रविष्ठा पौष्णं च प्रोष्ठांते तु प्रशंसिताः।
पुष्यतः शतभिषक् चैव विशाखा पूर्वैस्सह॥ 1349
दैवेषु कथिता रौद्र युक्तस्वयं शिवे मतः।
मानुषे पुष्य इष्टस्स्यात् अन्ये वै निन्दितास्त्विह॥ 1350
वारौ कुजार्कजौ हित्वा दैवे वाराः प्रशंसिताः।
मानुषे रविवारं च वर्जयेत्तं हिताः परे॥ 1351
शुभ कर्म मनुष्यं जीवे चास्तंगते बुधे।
शुक्रस्यास्तमये वापि प्रतिष्ठायं न कारयेत्॥ 1352
दिवा गर्भप्रतिष्ठा च कर्पयी वास्तुकर्म च।
सर्वदोषकरं प्रोक्तं रात्रौ वा वेशनं भवेत्॥ 1353
कारणे॥ पौष्णादित्य मखा स्वाति त्वाष्ट्र सावित्र मैत्रकाः।
प्राजापत्य शिवो विष्णुः तिष्यश्चैवोत्तरत्रयं॥ 1354
षष्ठी च सप्तमी चैव प्रतिपत्पौर्णिमास्वपि॥
द्वितीया पञ्चमी चैव तृतीया च त्रयोदशी॥ 1355
सितस्सौम्या--र गुरु सूर्येन्दूनां वरं दिनं॥
तद्धोरा दशनांशाश्च तेषां द्रेक्काणकाश्शुभाः॥ 1356
उदयास्तमये तेषां तत्र शन्यूदयं विना।
मेषकर्कटकन्तौलयं मकरं च विवर्जयेत्॥ 1357
अन्ये च शुभदा प्रोक्तास्तेषु पापं विवर्जयेत्।
सुप्रभेदे॥ अष्टमस्था ग्रहास्सर्वे कर्तुः कुर्वन्ति दुस्थितं॥ 1358
एकादशगताः सर्वे क्षौमारोग्य समृद्धिदाः।
भार्गवो भय कृद्प्रोक्तो दशमस्सप्तमस्थितः॥ 1359
नवद्विपञ्चसप्तस्थो गुरुश्शोभन कृत्सदा।
सोमस्सौख्यकरः प्रोक्तो स्वाती रोहिणी योगतः॥ 1360

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सोम स्सौरव्यकरः प्रोक्तः द्वितीये पञ्चमेऽपि च।
---- विष्णुभक्तः त्रिरुत्तरैः। ॥ 1361
सौरवारश्शुभ प्रोक्तः स्वाती रोहिणियोगतः।
बुध युक्ता द्वितीया च गुरुषष्ठि - - - - - ॥ 1362
P. 2.70) ...... त्र रव ण्डंच गु श्वि कं त्यजेत्।
दुर्दिने तु दिशा दाहे भूकंपे चण्डमारुते ॥ 1363
अशनिध्वनि संयुक्ते .... विप्या-पद्धतौ।
शिष्यज्ञ दिवसेषु संगमे शशिदिनेशयोरपि ॥ 1364
पुण्य योग युजिना दिने नृणां देह--- क्तर-
रेवति वसु मरुत्पौष्णानु शाप्यमखास्त्रिष्या- ॥ 1365
दिव्य शाङ्गां कमूल दिन कृ द्रौन्दुभे वैष्णवे।
.... न्दारव्यौ स्त्विरान् राशिष ..युक्तेष्व- ॥ 1366
प्रमेहि शुभदे दीक्षां विदध्यात्। वज्येष्ट-
दिवसेषु क .... तिते सितैश्च गुणैश्च- ॥ 1367
सौढ्याभिवक्त्राधिकेषु शुभं विवर्ज्यं
समु सहमेव च। संसर्गो रविमा...वा- 1368
स्थिते च तस्मिन् वैष्णवयुग्मं ...त्र भेयति-
वि दुस्तं केचित्तं ह स्पतिम्। अर्केन्दो र्युग- 1369
मध्ययोः शुभयोः सङ्क्रान्तयोरप्यिमासयेषु-
इति मासात्रया निन्दिता:। - - - - - ॥ 1370
गुणेषु दोषास्त्वति (स्त्वपि) कश्चाचिन्त्यादा- ॥
गुणास्सन्ति तथा विपर्यास्स दोषकाल गुणश्च- ॥ 1371
नेह। अविहिता गुण कोटियुताश्च आचिहित-
मेव च .... स्य युतात् परपुरुषात् स्वपति- 1372
रेव वरं हि कुलस्त्रियः। पारमेश्वरे ॥
गर्भिणी प्रसवांतं तु शिवं संपूजयेद्गुरुः। 1373
शवानुगमनं चैव ~~सिन्धु~~ वपनं सिन्धुसेवनं।
अन्तर्वत्त्याः पतिः कुर्वन् न प्रजा भवति ध्रुवं ॥ 1374
अन्यत्र- क्षौरं शवानुगमनं नखकृन्तनं च श्राद्धं च?
वास्तुकरणन्त्विति दूरयानं। उद्वाहमंकुपि- 1375
निषेवणं अद्रियोगमायुक्षयं भवति गर्भिणि-
का पतित्यामिति सूतकमेव काशौचे दीक्षिताश्च- 1376
प्रवेशकाः।

आत्मार्थयजनं कुर्यात् न कुर्यात्तु परार्थमिति।
सर्वदा सर्वकालेषु कुर्याद्दीक्षां विशेषतः॥ 1377
तिथिवारमुहूर्तेश्च वर्जयेद्देशिकोत्तमः।
राजाभिषेकगर्भिण्यां विद्यादाने च नार्जवे॥ 1378
दीक्षायाँ यागशालायाँ कालक्षेपँन कारयेत्।
कामिके= पितृपितामहश्चैव माता पितृ तथैव च॥ 1379
एककाले भवेद्दीक्षां भार्या भर्तान संशयः।
एकयज्ञे पृथक्कुर्याद्धि पति पत्नी उभे अपि॥ 1380
...... देकस्तत् समान्य भ्रातृमातृकाः।
माता पितृपतिपत्न्या दीक्षयेत्सर्वबंधुभिः॥ 1381
ब्रह्मयोनि जगत्सर्वं नानायोनि समुद्भवं।
दीक्षा कर्ता शिवो यस्मात् तस्मात्कार्यं नपुत्रकाः॥ 1382
उकारं अनुग्रहं एवं पकारं पापनाशनम्।
देते ज्ञानसमुद्भावं शकारं मलमोचनम्॥ 1383
मकारं सर्वदोषघ्नं उपदेशप्रकल्पते।
अन्यत्र= परीक्ष्य वत्सरं पूर्वं शिष्याणां तु गुणागुणं॥ 1384
चि) गुणयुक्तांस्तु संग्राह्य गुणहीनान्विवर्जयेत्।
इत्यंशुमान=
शिकारं जन्मविच्छेदं ष्यकारं पापमोचनं॥ 1385
नकारं ज्ञानसिद्धिस्स्यात् शिष्य शब्दमिहोच्यते।
इतिकामिके= दीकारं जन्मविच्छेदं क्षकारं कर्मनाशनं॥ 1386
दीयते क्षीयते कर्म दीक्षा शब्दमिहोच्यते।
कामिके ऽप्युक्ता=
अज्ञातो भोगमोक्षार्थं दीक्षारूपं निरूपणं॥ 1887
यत्रागमं यत्रभोगं संक्षेपादभिधीयते।
मलमायादि पाशानां विश्लेषं कुरुते यदा॥ 1388
ज्ञानं च जन्यते शिष्ये सा दीक्षेत्यभिधीयते।
सोमशंभुः। अन्यत्र ॥ ॥ 1389
दीयते ज्ञानसंभावं क्षीयते च मलत्रयम्।
दीक्षते क्षीयते भोगं दीक्षाशब्दमिहोच्यते॥ 1390
निराधारदीक्षानियमः। तत्र शिवः।
स्वयमेवविज्ञानकलवर्गाद्भूत सप्तकोटि-॥ 1391
महामंत्रेषु सार्धकोटिमहामंत्रान्।
साधनकारणानि कृत्वा विज्ञानकलान्॥ 1392

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रलयकलौंश्चानुगृह्य परमुक्तौ चापर-।
मुक्तौ च योजयति॥ साधारणदीक्षानियमः॥ 1393
आचार्यमूर्तिमधिष्ठाय स्थितसाध्य त्रिकोटि-
मन्त्रान् करणानि कृत्वा सकलेषु पक्वान् - 1394
परमुक्तौ चापरमुक्तौ च योजयति। इयं-
साधारणदीक्षा सापेक्षा। निरपेक्षा चेति- 1395
द्विधा भवति। तत्र सापेक्षा सामर्थ्यवतां
योगाभ्यास जप शास्त्र परिचयलिङ्गार्चन- 1396
नार्येभ्यो इत्युक्तसमयाचारांश्च अहिंसा-
सत्यवादास्तेय ब्रह्मचर्य कृपार्जव क्षमा- 1397
धैर्यल्लाभार मनश्शुद्धिकायशुद्धि आदि-
कृतमनुष्ठानम्॥ निरपेक्षायां विशेषः॥ 1398
य:) वृद्धाः अज्ञाः स्त्रियं भोगेष्वतिसक्ताः व्याधि-
स्थाश्च। एतेषां उपदिश्य शास्त्रेषूक्तप्रायश्चित्त- 1399
होमं कृत्वा शोधनकारणम्। पूर्वोक्तकारण-
सापेक्षायां बीजेति नाम। निरपेक्षायां निर्बीजेति- 1400
नाम। सापेक्षा लोकधर्मिणि शिवधर्मिणि-
द्विधा भवति। तत्र लोकधर्मिणां शिखाच्छेदं- 1401
विना कर्तव्या दीक्षा। शिवधर्मिणि तु भौतिका-
नैष्ठिका चेति द्विविधा। तत्र नैष्ठिका च - 1402
यावज्जीवं ब्रह्मचर्यविधिना कर्तव्यः।
भौतिकी तु एतावत्कालं निश्चित्य ब्रह्मचर्या- 1403
नुष्ठानेन कर्तव्या। पूर्वोक्त नैष्ठिकी सकामा-
ति) अकामी द्विधा। अत्र सकामा तु मायाया- 1404
अधस्थितानुध्वनस्संशोध्य शुद्धाध्वनि-
भोगं भोक्तुं संस्थाप्य कर्तव्या। अकर्मा तु- 1405
सर्वाध्वनः सकृदेव संशोध्य सायुज्ये योज-
p. 2.72) यतीति। भौतिकी च परा अपरा चेति द्विधा॥ 1406
अत्र परा पूर्ववत्। मायाया अधस्तनानुध्वन-
संशोध्य शुद्धाध्वनि योजयति। अपरा तु- 1407
सर्वाध्वनस्संशोध्य-प्रारब्ध भोगसाधन
देहस्य एतद्भोग्य कर्माणि विशोध्य कर्तव्या- 1408

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूर्वोक्तलोकधर्माणि च, परा अपरेति द्विधा।
(अत्र परा पूर्ववत् मायायाध्वस्थान देहं च-)॥ 1409
अत्र परा अध्वस्थित पुण्यपाप कर्माणि-।
संशोध्य देहपातनानंतरं एतस्यात्मनः। ॥ 1410
योग्य भुवने योजयति। अत्रापरा तु अध्वनः-
संशोध्य एतस्य योग्य भुवने शुभकर्म- ॥ 1411
अशोध्य तद्भुवने श्वरां गुणान् अणिमादि-
सिद्धिरपि प्रयोजयति = पूर्वोक्ता शिवधर्मिण्यां -॥ 1412
निष्कामासद्यो निर्वाणेति द्विधा। अत्र सद्यो-
निर्वा, तीव्रतर शक्तिपात युक्त शिष्य षडध्वन -॥ 1413
संयोज्य, सायुज्ये योज्या। तदानीमेव -
देहपातं करोति (करोति)। असद्यो निर्वाणा तु-॥ 1414
प्रारब्ध कर्मणो नृशे शुद्धध्व भोगान्य-
भुक्त्वा तत्र विरक्ति जनेनैव मुक्तिं प्राप- ॥ 1415
यति॥ पूर्वोक्तस्य बीज दीक्षा। साधिकर-
णोति णनिरधिकरणेति द्विधा। तत्र साधि- ॥ 1416
करणा प्रतिष्ठा दीक्षादि कर्म कृत्वा आचार्यस्य-
कर्तव्या। साधिकरणा संयुक्तौ तवाचार्यैः॥ 1417
समयविश्लेषणादि दीक्षां कृत्वा स्वस्य-
कामित कार्य निमित्ताय तद्योग्य मंत्रैर- ॥ 1418
भिमंत्रितं कुंभवर्धन्या तन्मन्त्रा साध-
यित्वा वर्तमानसाधकः, समय दीक्षां- ॥ 1419
शिवपूजाग्निकार्यं च नैरन्तर्येण कुर्वन्
पुत्रकः। समयविशेषाल्प स्वाग्निव गुर्वा- ॥ 1420
दीनां दासवृत्ति कुर्वन् समयी निर्वाणा-
भिषेकं प्राप्य प्रतिष्ठोत्सव दीक्षादीन् -॥ 1421
कुर्वन् दैशिकः॥ तदुक्तं दास्यं चरित्रं
समयी प्र कुर्यात् पुत्रस्तु पूजादिक योग्यकर्म-॥ 1422
तत्रापि सान्तानिक साधकौ वा सर्व चरित्रं
गुरुणा विधेय इति॥ निश्वासे॥ 1423
गृहस्थो ब्रह्मचारी वा शिव पूजार्थकौ स्मृतौ।
तस्मात्स्व प्रयत्नेन दीक्षयित्वा कृतौ गुरुः॥ 1424

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रक्ता . . . . कारव्या तथा।
पाके तीव्र - - - - - - - - - - तिते॥ 1472
विज्ञानं प्रभुया कलात्मसु- - - - - - - - ।
आधारस्सकलात्मनां च तनोर्जातिश्च सैवात्मनः॥ 1473

स्वच्छन्द भैरवे हस्तप्रमाणम्।

अधुना संप्रवक्ष्यामि प्रमाणं शिवधामतः॥ 1474
योजनानांबराशिहि यथा भवति लक्षणम्।
अव्यक्ता दशभिर्भागैः महास्थूलोपराजते॥ 1475
द्विपञ्च भागमहतो भूतादि स्थूल उच्यते।
भूतादि परिमाणं च भागं ग्राह्यं च चक्षुषा॥ 1476
ह) भूतादेर्दशगुणा अणीयो दृश्यते रजः।
जालांतरगतं भानोः परमाणुः प्रचक्षते॥ 1477
अष्टानां परमाणूनां समवायो यदा भवेत्।
त्रसरेणु समाख्यातः तत्पद्म रज उच्यते॥ 1478
त्रसरेणवष्टकेण वालाग्रन्तु विधीयते।
वालाग्राणि तथाचाष्टौ लिक्षाच परिकीर्तिता॥ 1479
लीक्षा चाष्टौ पुनर्यूकं यूकान्यष्टौ यवो भवेत्।
अष्टौ यवं त्वसौ हि अंगुष्ठपर्व मंगुलम्। 1480
द्वादशांगुलमानेन वितस्त स्ताल उच्यते।
तालद्वयं भवेद्धस्तं चतुर्विंशतिकांगुलाः॥ 1481
इति स्वच्छंदभैरवे हस्तप्रमाणविधिः।

अन्यत्र योगि यत्परमाणुरथ रेणुके॥ 1482
समग्रलीक्षायुगता शालीतत्क्रमशाष्ट-
अष्टांगुलं वेद विंशतिरंगुलं हस्तकम्॥ 1483
प्र ह स हा प्रव तार वि हीनमध्यं चोत्कृष्टं
त्रिविधमंगुलमानमन्यत्। शालया यत- ॥1484
त्रिगुणसूद्धं चतुर्गुणितं मानांगुलैरसविज्ञं-
विधिना विदध्यात् आचार्य दक्षिणहस्ते मध्य- 1485
मांगुलिमध्यमे। पर्वदीर्घिततं वापि मात्रा-
मात्रं विधीयते। मानवं निष्कले वेरे॥ शिरो- 1486

मानं विनो दयं॥
अत्यंतं काहुलीमान्तं स्तनांतं हृदयान्तकं।
हस्तमानमिदं प्रोक्तं चतुर्विधमिहोच्यते॥ 1487
अंगुलं त्रिविधं प्रोक्तं पूर्वमानांगुलं भवेत्।
मात्रांगुलं द्वितीयं तु देहलब्धं तृतीयकम्॥ 1488
अत्र मानांगुलविधिः।
जालांतरगतेरश्मौ दृश्यं सूक्ष्मं तु यद्रजः॥ 1489
परमाणुस्तवाख्यातो रेणुरोमं च लीक्षयः।
यूकी यवक मेणैव वृद्ध्याष्टगुणितं तथा॥ 1490
यव व्यासस्याष्टगुणं मानांगुलं तदुत्तरं।
सप्त संख्यायवं तारं मध्यमांगुलमुच्यते॥ 1491
कनीयसेत दाख्याता षट्संख्याय वि· ·तरा।
शालयायाम चतुष्कं तु उत्तमांगुलसञ्ज्ञयं॥ 1492
साध्यानिशाली दीर्घन्तु मध्यमा इति संज्ञिकाः।
शालयाय दीर्घं त्रिगुण मध्यमं तदुदाहृता। 1493
एवं च प्रद्विधं प्रोक्तं मानांगुलं द्विजोत्तमाः॥
श्रेष्ठ मध्यमाय मैमात्रैस्तालं भुवांगुलं भवेत्॥ 1494
भाराक्ष्यंगुलं किष्कु हस्तमित्युच्यते बुधैः॥
पञ्चविंशति मात्रं स्यात् प्राजापत्यकरं बुधैः॥ 1495
षड्विंशति धनुर्मुष्टि सप्तविंश अनुग्रहः॥
अष्टाविंशांगुलं प्राप्य वेदैहे नवविंशकः॥ 1496
(p.2.76) वैपुल्यं त्रिंशदंगुल्यं एकत्रिंशत्प्रकीर्तिताः।
एवमष्टविधं हस्तं प्रत्येकं द्विजसत्तमाः॥ 1497
वैपुल्य धनुर्मुष्टिर्यां क्षत्रियाणां गृहं कुरु।
प्राजापत्यकरं चैव वैदेहे वैश्य योग्यकं॥ 1498
किष्कु प्राप्तकरं चैव शूद्रजात्यर्हकं भवेत्।
अधिकाभ्यहिकं हस्तं विहीनां च विवर्जयेत्॥ 1499
हीनानाधिकरं विप्र आधिकानां शुभावहे।
सर्वेषामुदितं हस्तं ममसद्मनि पूजितं॥ 1500
धानानिशयनान्यासं किष्कुहस्तेनमारयेत्।
आरामोद्यानि कादीनि प्राजापत्येनकरेण तु॥ 1501

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धनुर्मुष्टि करेणैव ग्रामादीनि समानयेत्।
धनुर्ग्रहेण व्याप्यादि नक्षद्वानं च मानयेत्॥ 1502
मानयेत्सर्ववस्तूनि किष्कुहस्तेन वै द्विजाः।
श्रेष्ठमध्या यवैर्मित्रैः कल्प्यहस्तं यवोदितम्॥ 1503
तच्चतुष्कं भवेद्दण्डः तेन वास्तु समानयेत्।
सहजदण्डमानेन क्रोशमानं विधीयते॥ 1504
गव्यूति द्विगुणं ज्ञेयं तद्विगुण्येन घाटकम्।
घोटस्यैव चतुष्कं तु योजना परिकीर्तिता॥ 1505
प्रासादमण्डपानां तु प्राकाराणां तु गोपुरम्।
ग्रामाद्वा क्षेत्रगण्येष्टमानानांगुल विधानतः॥ 1506
मात्रांगुलमाह—
आचार्य दक्षिणे हस्ते मध्यमांगुल मध्यमे।
पर्वदीर्घं च तारं वा मात्रांगुलमिति स्मृतम्॥ 1507
अंगुष्ठतर्जिनीयुक्तं प्रादेशमिति कीर्तितम्।
मध्यमांगुष्ठयुक्तं वा लमानमिति स्मृतम्॥ 1508
अंगुष्ठानामिका युक्ता गोकर्णमिति विस्मृतं।
कनिष्ठांगुष्ठसंयुक्तं वितस्तिरिति चोच्यते॥ 1509
हस्तं रत्निं च मुष्टिं च त्रिविधं जालरन्धावपि।
चतुर्विंशति हस्तं तु त्रयोविंशद्रत्निकम्॥ 1510
द्वाविंशतिश्च मुष्टिस्स्यात् तेन कुण्डानि कारयेत्।
यागोपकरणानि मात्रांगुल विधानतः॥ 1511
देहलब्धांगुलं॥
चतुर्विंशच्छतं भागं पूजांशोऽशं विभाजयेत्।
एकांशमंगुलं ख्यातं मूललिंगांगुलं त्विदम्॥ 1512
देहलब्धांगुलेनैव प्रतिमां तत्र कारयेत्।
यागधाममग्रह भूम्रहादि तं शून्यरामेवयमाह॥ 1513
पङ्क्तिभिः। भास्करेण च विकल्पितैः करैः
कल्पयेत्सविवरं सलक्षणम्। द्वारवसुधातु 1514
रसभूतकरगेहे पादरविषोडश नवोनव
पदं स्यात्। मध्य ~~पद~~ नववेदि स्यह त्रीणिपद= 1515

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मध्ये, कुण्डनव पञ्चाग्निख मण्डपविधानं।
इति सारावल्यां -
यागांगमण्डपं वक्ष्ये तद्रूपं शृणु मद्रुवे ॥ 1516
क्ष्मा कारे तु मकारं स्यात् अवच्छब्दं तु कारकं।
अग्निनामनि उकारं तु पवनाख्यं पकारकम् ॥ 1517
व्योमाकारे मकारं तु पञ्चवर्णाश्रिवं क्रमात्।
(P 2.77) पञ्चवर्णाभिधानं स्यात् पञ्चभौतिकरूपकं ॥ 1518
पञ्चभूतं पञ्चकलारूपं मण्डपमुच्यते।
यस्यां दिशि विशाला तु तद्देशे कल्पयेद्बुधः ॥ 1519
मान निश्चय तत्पूर्वं निरवने तत्परिग्रहम्।
त्रितालं वा द्वितालं एकतालम चापि वा ॥ 1520
मृ) मृतमुत्थाप्य संशोध्य अन्य मृद्भिः प्रपूरयेत्।
पुण्यक्षेत्रे नदीतीरे शुद्धदेशे मनोरमे ॥ 1521
संगृह्य मृदमादाय तद्गर्तं पूरयेत्समम्।
निर्च्छिद्रं वालुकाभिः वा निम्नोन्नत विवर्जितं ॥ 1522
एक हस्तं तदर्धं वा तलादुन्नत वेदिकाः।
मानं निश्चित्य तद्भागे पङ्क्तिस्तंभस्य गर्तकम् ॥ 1523
उत्तमादीनि संख्यानि कलाद्यमीष्ट तालकम् ॥
प्रपायां सम मानानि मण्डपे मध्य दैर्घिकं ॥ 1524
स्तंभमानं यथा योग्यं त्र्यंशैकार्धिकमध्यगात् ॥
प्रकल्पयेत्। उत्तमत्र तय स्तंभं चतुष्षष्टि ~~मण्डपे मध्य दैर्घिकं~~ प्रकल्पयेत् ॥ 1525
षड्त्रिंशद्गात्रसंसक्तान्मध्यमत्रितये षु च ॥
षोडशस्तंभ संयुक्तान् . . . . त्रयमण्डपे ॥ 1526
मान मात्रांगुलाभ्यां वा मण्डपं मान निश्चितं।
यागांगानि सर्वाणि मात्रांगुलेन कारयेत् ॥ 1527
पञ्च हस्तं समारभ्य एकहस्त विवर्धनात्।
त्रयोदशकरांतं तु कन्यसादि त्रयं त्रयम् ॥ 1528
पञ्च हस्तात्समारभ्य द्विद्वि हस्त विवर्धनात्।
एकविंशत्करांतं तु नवधामान उच्यते ॥ 1529
हस्तमानस्य लिंगस्य लिंगमानं यथाविधि।
कन्यसा रत्नमानं हि नवधा मण्डपं विदुः ॥ 1530

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतेषां मण्डपानां तु यथा कर्मार्हकल्पितम्।
त्र्यादिशुभसंयुक्तं यजमानानुकूलतः॥ 1531
शिलां वा चेष्टिकां वापि सारदारुमयेन वा।
समाग्रमण्डपं कुर्यात् आयताग्रमथापि वा॥ 1532
षड्सहास्रांशमाणिक्यं मुख्ययामं विधानवित्।
एवं मण्डपनिर्माणं स्थाननिर्देश उच्यते॥ 1533
आद्यं बालप्रतिष्ठादि क्रिया सर्वत्र पूर्वकं।
क्रियांगमण्डपे -- तु स्थानसंकल्पनं शृणु॥ 1534
देवाग्रे तत्पार्श्वयोर्वा सोमे शांकरदेशके।
म्येषु) निर्ऋति वरुणयाम्येषु ~~देशेषु~~ यथायोग्यं प्रदेशके॥ 1535
अन्तर्हारादि सर्वेषु यागशालां प्रकल्पयेत।
अन्तर्हारान्तसालेतु लिंगस्य स्थापनार्हकं॥ 1536
पीठस्थापनमेवात्र चान्यत्सर्वं न कल्पयेत्।
अन्तर्हारे तु मर्यादौ मध्ये वा पत्नि पार्श्वयोः॥ 1537
महामर्यादि सालेतु मध्ये वाऽथ्यन्तरेऽपि वा।
येषु स्थानेषु सर्वेषु . . . . के॥ 1538
उत्तमत्रयलिंगानां - - - - त्तमे बुधः।
मध्यमत्रयलिंगानां षड्त्रिंशत्यात्रमुच्यते॥ 1539
. . . . ।
पश्चिमद्वार संयुक्तं चतुस्तोरणभूषितं॥ 1540
पूर्वद्वार प्रदेशे तु कल्पते मुखमण्डपे।
p. 2.78) द्वाराणि त्रीणि चान्यानि कंपद्वारमथापि वा॥ 1541
तद्द्वारस्यार्धमर्धं वा द्वारं संकल्प्य पूर्ववत्।
स्थानसंकल्पयुक्तं चेत् पूर्वे वा दक्षिणेऽपि वा॥ 1542
एवं द्वारस्य निर्माणं मण्डपाद्यंतरे बुधः।
तद्देशं सुतलं कृत्वा सूत्रं न्यासं समाचरेत्॥ 1543
दशसूत्रं समारभ्य पञ्चाशान्तुर्यमन्तकम्।
सूत्रभेदं प्रवक्ष्यामि तत्तद्भेदं पृथक् पृथक्॥ 1544
पृथक् ~~पृथक्~~ पंक्त्यादित्यमनुश्चैव सूत्र संख्यातमादिकैः।
पदमानं प्रकर्तव्यं क्रियाभेदं द्विभेदकम्॥ 1545

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लिंगस्यस्थापने चैव विमानस्थापनेऽपि वा।
उत्सवे चैव दीक्षासु नित्यमाचार्यसेवने॥ 1546
त्रयोदशपदे कार्यम् सर्वं कृत्वा विचक्षणः।
प्रतिमा सर्वबेरस्य स्थापने प्रोक्षणेऽपि वा॥ 1547
प्रो) पवित्रस्य · · · · से तु विमानप्रोक्षणेऽपि च।
एकादशपदे कार्यं मण्डपे रविसूत्रके॥ 1548
बाललिंगप्रतिष्ठायां प्रायश्चित्तादि कर्मणि।
अष्टबंधनकार्येषु नित्यनैमित्तिकेऽपि वा॥ 1549
एतन्नन्दपदे कार्यं तत्तत्कर्म विचक्षणैः।
मण्डपाभ्यन्तरे भागे प्रागुदग्दशसूत्रकं॥ 1550
एकाशीति पदं कृत्वा मध्यादि पदभागिकं।
मध्ये नवपदे वेदि षोडशं त्र पवेदिकम्॥ 1551
हस्तमानस्य चोत्सेधं दर्पणोदर सन्निभं।
चतुरंगुलमुत्सेधं अष्टांगुलसुविस्तृतं॥ 1552
उपवेद्या चतुष्कोणे मध्यस्तंभयुगस्थितिः।
तदा प्रत्य चतुर्विंशत् पदेष्विन्द्रादि दिक्षु वै॥ 1553
चतुरस्राणि कुण्डानि तत्तस्थानोचितं क्रमात्।
प्रधानं त्वीश देशे तु पञ्चाग्न्यायतनं तु वा॥ 1554
एकान्यायतनं चेत्तु पूर्वे वास्त्वीशदेशके।
तद्बाह्ये पदमध्येकं चतुर्द्वारं प्रकल्पयेत्॥ 1555
द्वाराणां पार्श्वयोः प्रोक्तं अष्टाविंशत्पदावृतं।
पूर्वद्वारादि नन्द्यादि महाकालांतकं क्रमात्॥ 1556
नन्दीन्द्रो मातुवह्नीच यमो विघ्नविनायकः।
विद्याकला चाग्निकोणे सप्तैते पदभागिनः॥ 1557
भृंगी वास्तोष्पती विष्णु निरृति लक्ष्मी गुहस्तथा।
निवृत्ति चैव सप्तैते नैरृतौ पदभागिनः॥ 1558
अस्त्रमुख्या च वरुणं स्तवकोऽन्य गणेश्वरः।
चण्डेशाश्च प्रतिष्ठा च वायुकोणे च सप्तवै॥ 1559
देवि सोमो गुरुश्चैवश्री विरिञ्चिः कालशांतिकौ।
ईशकोणे च सप्तैते पदभाजो भवन्ति ते॥ 1560

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं बाह्यपदस्थां च ईशकुण्डस्य पश्चिमे।
~~एकाशीति~~ क्षिपदं कुंभवर्धन्योः पदशेषं परित्यजेत्॥ 1561
त्रित्रिभागसूत्रसंध्यौ च चरणा द्वादश स्थिताः।
पताकाश्च दशास्त्राणि दिग्गजाष्टकमेव च॥ 1562
P.299) मण्डपावृतदेशे तु द्वारपार्श्वे स्थितः क्रमात्।
एवं सर्वं समापाद्य कन्यसे मण्डपे बुधः॥ 1563
भानुसूत्रात्समुद्भूतत्वेकविंशत्पदं शतम्।
पदभागिकर्मभागि भानुसूत्रात्पृथक् पृथक्॥ 1564
वेदिकां चोपवेदीं च पूर्वाद्यं चाष्टकुण्डकं।
ईशान चक्रयोर्मध्ये प्रधानक्षिपदान्तरे॥ 1565
तत्वबाह्यैकपदावृत्या संचाराला विलोप्य च।
तत्वसाहपदभागेषु दिक्षुरान्नं च कल्पकम्॥ 1566
पदी ~~त्रीणि~~ त्रीणि पदं ग्रह्य शेषं पूर्ववदेव हि।
ज) मण्डपाधिपदेवाश्च यदनार्थं परिग्रहेत्॥ 1567
तन्मण्डपे क्रियां कुण्डां प्रतिमाद्यधिवासनं।
षोडश प्रतिमानां तु परिवारामनादिनाम्॥ 1568
शयनाद्यधिवासांतं सर्वं कुर्याद्विचक्षणः।
तन्मण्डपे तु कर्तव्यं पवित्राद्यधिवासनं॥ 1569
मध्यमे वेदिकायां तु लतालिंगोद्भवादिकं।
उपवेद्यास्तु परितः कुण्डं कुर्याद्यथाविधि॥ 1570
...... संकल्प्य स्थालिपाकार्थमेव हि।
प्रधानकुण्डवारिण्यां पवित्राण्यधिवासयेत्॥ 1571
उपवेद्यास्तु परितो वृतांगद्रव्य.....।
....शार्वदुद्दिष्ट पवित्रारोहणांतकम्॥ 1572
तन्मण्डपे कृतं कार्यदमनारोहणं क्रमात्।
सर्वत्र पवित्रवत्कार्यं स्थालि......॥ 1573
.....दशपदे एवमादीनि कारयेत्।
अन्नसूत्रात्मनाभूतं षट्षष्टिनवोत्तरम्॥ 1574
पदभागांश्च कृत्वैवं मध्यमे वेदिका...।
.... स्तरं हस्तोत्सेधं समाकुलम्॥ 1575
क्ष) तत्पूर्वादि चतुर्दिक्षु वेदिकां चोपभद्रकाम्।
नवाकृतं चतुरस्रं तु तदर्धोत्सेधमानयुक्॥ 1576

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आग्नेयादि चतुष्कोणे तन्मध्योत्स्थेप्यमानकं।
मध्यादि नववेद्यायां त्वेकाशीति पदं विदुः॥ 1577
मध्यादि पञ्चवेद्यां च कलशस्थापनं क्रमात्।
आग्नेय्यां पञ्चभागं तु नैरृत्यां नवलकं॥ 1578
इष्टिकां वायुदेशे तु स्थूपिदण्डं न देशके।
कुण्डादि सर्वकार्याणि सर्वं पूर्ववदाचरेत्॥ 1579
विमानेस्थापनं त्वेवं तदेव प्रोक्षणं कुरु।
मध्यादि पञ्चवेद्यास्तु पूर्वस्याः पञ्चकुण्डकं॥ 1580
~~कुण्डादि सर्वकार्याणि~~
तक्रियावो क्रमवत्सर्वं शेषं पूर्ववदाचरेत्।
विधानं प्रोक्षणं त्वेवं दीक्षादिषु विधानकम्॥ 1581
दीक्षाख्यिके विधानेषु विशेषः किंचिदस्ति हि।
मण्डपं पूर्ववत् कृत्वा पदं सूत्रं तथैव च॥ 1582
मध्ये नवपदं वेदि हस्तमानेन चोन्नतम्।
पूर्वे नवपदं ग्राह्यं मध्ये कुण्ड विधानकं॥ 1583
पश्चिमे तु पदं वेदि शिवलिंगार्चनादिकम्।
(P.L. 80) कुण्डवेदिकयो दक्षे पूर्वाय त्रिद्विभागिकं॥ 1584
वेदिका पूजनार्थन्तु शिष्य संवेशनार्थकं।
उत्तरे च पदं वेदि कलशस्थापनार्थकम्॥ 1585
पञ्चौषध्यौ पञ्च शालीं पञ्च.... वायवे।
कार्तिकां तनुसूत्रं तु पञ्चगव्यं तथैशके॥ 1586
परितः पदमेकं तु सञ्चारार्थं विलोकयेत्।
चुल्लिका दक्षिणे स्थाप्य धर्मराजस्य चाग्रके॥ 1587
शेषं पूर्ववदुद्दिष्टं तत्पदे तु विधानके।
83) दीक्षितं च प्रकुर्वन्ति शांभवं गुरुसेचनम्॥ 1588
शिष्यवत्त्वं परीक्ष्याथ गुरुस्तत्सर्वमाचरेत्।
एवं कर्म विभागोऽथ घटशस्थापनोच्यते॥ 1589
नवेदिकादि सहस्रांतं कलशस्थापनं क्रमात्।
चेत्तु अथमं त्रितयं चेत्तु कन्यसं त्रयमण्डपे॥ 1590
कलशस्थापनार्थन्तु मध्ये वेद्य यथा तथा।
कुण्डादीनि च तत्सर्वं प्रवोत्तर विधानतः॥ 1591

भास्करादींश्च सर्वांश्च पूजयेन्मण्डपाधिपान् ।
स्वस्वमंत्रैस्समभ्यर्च्य कुंभवर्धनिका विना ॥ 1592
मध्यमत्रितयं चैत्तु कलशस्थापनोक्तवत् ॥
तत्तत्संख्यानि सूत्राणि पातयेत्पाश्वयुग्मके ॥ 1593
त्रित्रिसमत्रं प्रकर्तव्यं प्रागादिकचतुर्दिशि ।
होमार्थं पदमेकं तु संस्कारार्थं तु तद्बहिः ॥ 1594
ततो प्रथ्यपदैकं तु द्वारादि यजनार्थिकम् ।
एतत्सर्वं विधानोक्तं मार्गेणैव समाचरेत् ॥ 1595
उत्तमद्वितयादौ तु क्रमहद्बाह्येऽग्निकार्यकं ॥
मध्यव्यूहस्य चावृत्तौ - - - . . . ॥ 1596
अष्टव्यूहपदे मध्येऽग्निकार्यं समाचरेत् ।
तत्तत्संख्यानि सूत्राणि पातयेत्तु चतुर्दिशि ॥ 1597
द्वि द्वि सूत्रं प्रकर्तव्यं पदमानावधौ बुधः ।
संस्कारार्थं पदैकं तु तद्बाह्यावृतभागके ॥ 1598
चतुर्द्वारं प्रकर्तव्यं शोषवादि पूजनम् ।
एतत्सूत्रविभागेन नवगादिनवांतकम् ॥ 1599
लिंगस्य स्थापनार्थं तु मण्डपं शृणु मद्रवे ।
हस्तमानस्य लिंगस्य मण्डपे रविहस्तके ॥ 1600
द्विद्वि हस्तविवृध्या तु लिंगमानं यथाविधि ।
तत्तन्मानं गृहीत्वा तु मण्डपं कल्पयबुद्धिमान् ॥ 1601
एतत्सर्वं विधानोक्तं समानं सर्वमण्डपे ॥
एकाशीति पदं भाव्यं पदमानविशेषतः ॥ 1602
मण्डपं बहुधा प्रोक्तं पदभागमनेकधा ॥
तस्मादपि पुनः कार्यं एकाशीतिपदं विदुः ॥ 1603
मण्डपं मनसा भाव्यं पदाध्वा रूपभावनम् ॥
किं रूपं मण्डपं भाव्यं वद मे पार्वतीपते ॥ 1604
मण्डपं तु कलारूपं च तुवगन्तु भास्करं ॥
मण्डपावयवं कल्प्य पाञ्चभौतिकरूपकम् ॥ 1605
तन्मण्डपं चतुर्द्वारं चतुस्तोरणभूषितम् ॥
गजाष्टदिग्पशाकाश दशास्त्रं शक्तिसंयुतं ॥ 1606
मण्डपावृत देशेषु कृत्वा तन्मण्डपे बुधः ॥
घटे लिंगे च पीठे च यज्ञाग्न्ये च बेरके ॥ — 1607

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अध्वाण्डुभिः प्रकल्प्यन्ते सर्वाङ्गाणि यत्नात्क्रमात्।
सर्वमन्त्रैश्चाधिवसेद्दधिवासनमण्डपम्॥ 1608
p.2.81) तस्मात्तन्मण्डपं ज्ञात्वा कलारूपं स्मरेद्ध्रुवे।
कलायां सर्वमुत्पन्नं . . . . . मण्डपम्॥ 1609
सकलामन्त्ररूपात्तु तस्मात्तन्मण्डपार्चनं।
पदाध्वा पदभागेषु वर्णाध्वा पदमध्यमे॥ 1610
म . . . . रश्म्यावयवेषु च।
मण्डपावयवद्रव्ये तत्वाध्वा संस्थिताक्रमात्॥ 1611
भुवनाध्वादि ऊर्ध्वान्ति सर्वमच्छाद्य रक्षितः।
कलाध्वा . . . . . सर्वाश्च परिमण्डितं॥ 1612
सर्वं ज्ञात्वा तु तत्रज्ञः सर्वकर्माहिको भवेत्।
यागाङ्गमण्डपं ह्येतत् अर्चनं त्वधुनोच्यते॥ 1613
मध्ये नवपदं वेदी दैविके चाष्टमङ्गलम्।
मानुषे च सद्वे कुण्डं पैशाचे कलशं न्यसेत्॥ 1614
इत्यंशुमान् तन्त्रे यागमण्डपविधिपटलः।

अत्र वक्ष्ये विशेषेण मण्डपे लक्षणं शृणु॥ 1615
पञ्चषट् सप्त हस्ताष्ट नवपङ्क्तिश्च रुद्रकः।
भानुत्रयोदशो मन्वा दश पञ्च च षोडश॥ 1616
एवं हस्तस्य संख्यानि किन्तु हस्तवशाच्छृणु।
यद्धस्तेन तु विस्तारं त्रियामं वा विशेषतः॥ 1617
तद्धस्तेन तु कर्तव्यं चतुरश्रं समन्ततः।
पङ्क्तित्रय समायुक्तं द्वादशं षोडशं तु वा॥ 1618
चतुर्विंशश्च द्वात्रिंशश्चतुरुत्तरषष्टिकं।
गात्रसंख्याविधिप्रोक्तः क्षेत्रमानं तथा शृणु॥ 1619
(यद्धस्तेन तु) यद्धस्तेन तु ~~[illegible]~~ विस्तारं आयामं वा विशेषतः।
तद्धस्तेन तु कर्तव्यं चतुरश्रं समन्ततः॥ 1620
पङ्क्तित्रयसमायुक्तं द्वादशं षोडशं तु वा।
चतुर्विंशश्च द्वात्रिंशश्चतुरुत्तरषष्टिकं॥ 1621
गात्रसंख्याविधिप्रोक्तः क्षेत्रमानं तथा शृणु।
यदुक्तमण्डपे हस्तं विस्तारायतसमम्॥ 1622

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तद्धामेन नवनंदेन त्वेकाशीति पदं भवेत्।
मध्ये त्वेकपदं ब्रह्म परितो षे च दैविकम्॥ 1623
तद्बहिष्षोडशपदं मानुषं पदमुच्यते।
चतुर्विंशत्पदं बाह्ये पैशाचपदमुच्यते॥ 1624
द्वात्रिंशिकं पदं बाह्ये राक्षसं पदमुच्यते।
मध्ये नवपदं वेदि देवब्रह्मपदेषु च॥ 1625
मानुषे च पदे कुण्डं पैशाचान्ये तु तोरणं।
राक्षसादि पदे चैव परिवारप्पटस्तथा॥ 1626
अनलवाकलशान्स्थाप्य निश्चित्रोश्च पदेपदे।
चतुर्द्वारि समायुक्तं चतुस्तोरण भूषितम्॥ 1627
ऊर्ध्वे वितान मानेष्य दर्भमाला समावृतम्।
अष्टमंगल संयुक्तं दिग्ध्वजैश्च विभूषितं॥ 1628
दशायुधसमोपेतः लोकपालैस्समावृतं।
अश्वत्थदल संयुक्तं चूतपत्रैश्च वेष्टितं॥ 1629
श्वेततांबूलपत्रैश्च नारिंगैस्सुफलैर्युतं।
लिकुचैश्च फलैस्सर्वैः रंभास्तंभैस्सपुष्पकैः॥ 1630
P. L. 82) पूगपुष्पैश्च खर्जूरैः नालिकेरसुमैर्युतं।
इक्षुदण्डैरत्नपटै दर्पणांशुक संयुतम्॥ 1631
हेमवस्त्रैश्चित्रवस्त्रैः नानावस्त्रैर्विभूषितम्।
अम्लान मालिका युक्तं सूचिकोद्भव चिह्नकैः॥ 1632
चूर्णैश्च रत्न मृत्स्नाभि रंगवल्यादिभिर्बुधः।
चि) यत्तद्देशो भवेच्चिह्नै मण्डपं भूषयेद्गुरुः॥ 1633
अगरुद्भव धूपैश्च मल्लिकादि सुमैर्युतं।
तरंगैश्च संयुक्तं पताका छत्र चामरैः॥ 1634
एवं मण्डपमाख्यातं वेदिकालक्षणं शृणु।
वेदिकालक्षणम्
इति भीमसंहितायां मण्डपलक्षण विधिपटलः॥ 1635

नव नवके नवकेन सुवेदिना, नवनव-
मध्य पदेकपदेकम्। नवनव कुण्डमणाष्ट- 1636
कयाश्यकं। नवनव दैव तु होम विधिस्स्यात्।
वेद्या विस्तारमानेन चतुर्भागैकमुच्छ्रयम्॥ 1637

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रत्निमात्रं समं वाथ मुष्टिमात्रमथापि वा।
उत्तमं मध्यमं चैव कन्यसं त्विति कीर्तितं॥ 1638
च्यते। अथवा तालमुत्सेधं अधमाधममुच्यते।
षोडश द्वादशाष्टौ वा मानांगुलयेन कारयेत्॥ 1639
उत्तमादि त्रयोक्तं वा दर्पणोदरसंनिभम्।
वेद्या मूले तु परितश्चोपवेदिं प्रकल्पयेत्॥ 1640
चतुरंगुलविस्तारं उत्सेधं तत्समं भवेत्।
देविके च पदाग्रे च ह्युपवेदिं प्रकल्पयेत्॥ 1641
मण्डपे लक्षणं प्रोक्तं कुण्डानां लक्षणं शृणु।
इति कारणे मण्डपवेदिलक्षणविधिपटलः॥ 1642
अन्यत्र परमाद्याथि पदे नवभागके।
कमलती मुखतस्तु चतुस्स्वरः। रसपदी-॥ 1643
द्विपदा हि विदिक्स्थिता बहिरथैकपदा-
स्सकलामयाः। मध्ये ब्रह्मपदे वेदि मंगलाकुर्यं॥ 1644
मानुषे च पदे कुण्डं पैशाचे तोरणं न्यसेत्।
राक्षसे कलशास्थाप्य दशायुधयुतास्तथा॥ 1645
वेदिका मानमात्राभ्यां अंगुलाभ्यां प्रकल्पयेत्।
का कृत्वैकाशीति भागं मण्डपं पण्डितोत्तमः॥ 1646
वे) मध्ये ब्रह्मपदे वेदि वेद्याच्छायोष्टमंगलं।
मानुषे च पदे कुण्डं पैशाचे कलशाः स्थिताः॥ 1647
राक्षसे तु पदे कुर्यात् तोरणं लक्षणान्वितम्।
द्वादशांगुलमारभ्य तालमान विवर्धनात्॥ 1648
सार्धचत्वारि हस्तं तु नवध्याचोच्छ्रयं भवेत्।
चतुरंगुलमारभ्य त्र्यंगुल विवर्धनात्॥ 1649
नवधा चोपवेदीस्स्यात् अंगुलं चाष्टविंशतिः।
नवहस्तं समारभ्य चतुर्हस्तान्तवेदिका॥ 1650
नवांगुलेन संवृद्धा नवधा विस्तृता क्रमात्।
द्वादशांगुलमारभ्य षड् षडंगुलवर्धनात्॥ 1651
यावदाद्यस्त हस्तांतं उत्सेधं नवधा भवेत्।
दर्पणोदरसंकाशं उपवेदी च वक्ष्यते॥ 1652

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p.2.83) चतुरंगुलमारभ्य विंशत्यंगुलमंतकं।
विंशांगुलसवृद्ध्यातु नवधाविस्तृता तुसा॥ 1653
विस्तरार्ध प्रमाणे सर्वत्र समतां कुरु।
अथवा मण्डपं त्रेधा कृत्वा मध्ये तु वेदिकां॥ 1654
रत्निमात्रसमुत्सेधा दर्पणोदरसन्निभा।
अष्टांगुलप्रविस्तारा विस्तारार्धसमुन्नता॥ 1655
वेद्या मूले तु परितः चोपवेदिं प्रकल्पयेत्।
न कुर्याद्उपवेदींतु बाह्ये मध्ये पदं सुधीः॥ 1656
वेदिलक्षणमाख्यातं कुण्डलक्षणमुच्यते।
इत्युपभेदकारणो वेदिलक्षविधिपटलः॥ 1657

पद्मलक्षणं - पद्मलक्षणमाह -

त्रिभागैर्वेदिकामध्ये तालमात्रसमुच्छ्रिता॥ 1658
संसमा दर्पणाभासा स्थलादष्टांगुलोन्नताः।
मण्डपस्यैव मध्ये तु मण्डलं वर्तयेत्क्रमात्॥ 1659
एकहस्तं द्विहस्तं वा त्रिहस्तं चतुष्करं।
चतुरश्रसमं कृत्वा तत्क्षेत्रं वसुभागिकं॥ 1660
भागमेकं न्यसेद्दिक्षु श्रोत्राग्निनैव योजयेत्।
एतन्मानेन कोणेषु लांछयेत्तु क्रमेण तु॥ 1661
तन्मध्यमात्समारभ्य वर्धयेदष्टपत्रकं।
चतुरश्रस्य विस्तारं कौशिकांशेन भाजयेत्॥ 1662
एकेन कर्णिकां कुर्यात् पक्षेनैव तु केसरम्।
शेषं तु दलमानं स्यात् कर्णिकार्धाधिमानतः॥ 1663
स्वल्पे ~~स्वल्पं~~ प्रकर्तव्यं विस्तरे विस्तरमंबुजम्।
पद्मासने बहिर्विधिं पद्ममानेन वा पुनः॥ 1664
वीथीसमं चतुर्द्वारं शोभाचारसमाश्रिताः।
तत्समानौ ~~तु~~ कपालौ तु शोभा तुल्यौ पदोभिकौ॥ 1665
पङ्कजस्य समं वापि चतुर्दिक्षु निवेशनम्।
द्विहस्तं चैकहस्तं वा अत ऊर्ध्वं न कारयेत्॥ 1666
न स्थूलं न तुङ्गं हीनं विक्रमं बिन्दुवर्जितम्।
आसनं देवदेवस्य कामन्तं मोक्षसिद्धये॥ 1667

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इत्युपभेदकारणे वेदिमध्ये पद्मासन-
निर्माण विधि पटलः ३॥

तत्पूर्वे वेदिकां कुर्यात् एकद्वित्रचतुष्करैः।
ह्यर्धरुल्लोच्छ्राय ताश्चादि रत्नस्व त्रियमात्क्रमात्॥ 1668
दर्पणोदरसंकाशं एकमेखलया सह।
एकद्वित्रिक्रमेणैव तस्यविस्तारतोंततः॥ 1669
अन्यत्र॥ दीक्षादौ तु प्रकर्तव्यं वेदिकोपरिमंडलं।
स्वास्तिको सर्वतोभद्रं गौरीतिलकमेव च॥ 1670
पार्वतीकांतमप्येव लिंगाब्ज स्वस्तिकं तथा।
लता लिंगोद्भवं चेति मण्डलं षड्विधं भवेत्॥ 1671
(२) स्वस्तिकलक्षणमाह - प्रागग्रं चमुदगग्रं च पञ्चसूत्रं प्रसारयेत्।
लिंगमेकपदं वृद्धि त्रिपदे पीठमेव हि॥ 1672
चतुर्लिंगसमायुक्तं मुखवर्णैश्च भूषयेत्।
तन्मध्ये श्वेतवर्णन्तु भोगमोक्षफलं भवेत्॥ 1673
एवं स्वास्तिकमाख्यात सर्वतोभद्रमुच्यते।
p.2.84) चतुर्भिः स्वस्तिकैरेव सर्वतोभद्रमुच्यते॥ 1674
सर्वतोभद्रमेवं हि भोगमोक्षफलप्रदम्।
(३) गौरीतिलकमाह॥
प्राक्सूत्रं सप्तदशकं उदक्सूत्रं तथैव च॥ 1675
मध्यवेदपदं श्वेतं चतुर्लिंगं चतुर्दिशि।
लिंगकं पञ्चपीठं च कण्ठकं पं च पीठकं॥ 1676
चतुष्पट्भृंगनेत्रैश्च चतुष्पङ्क्तिः पदैः क्रमात्।
मुखवर्णैश्च संभूष्य दैवदैव पदैः पुनः॥ 1677
विदिक्षु कर्णपुष्पाणि भिन्नवर्णैः प्रकल्पयेत्।
वै) प्रत्येकं सर्पकोणेषु पञ्चविंशत्पदैः क्रमात्॥ 1678
नानाविधैश्च कर्तव्यं लतावर्णैर्मनोरमैः।
गौरीतिलकमाख्यातं भोगमोक्षफलप्रदं॥ ३॥ 1679
पार्वतीकान्तमाह —
प्रागग्रमुदग्रं च द्वात्रिंशत्पदसंयुतं॥ 1680
तस्मिन्मध्ये तु नलिनं अष्टावष्टपदं युगं।
. . . . . विध्यैः पत्रैः तद्बाह्येन विधानतः॥ 1681

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निर्गमार्गलिवर्णै स्यान्नाना चित्र विचक्षणः।
अग्न्यादि पद्मपर्यन्तं श्वेतवर्णैश्च भूषितं॥ 1682
लिंगानि कृष्णवर्णानि द्वाराणि मुखवर्णकैः।
एतत्त पार्वतीकांतं सर्वकर्मसु योग्यकं॥ ५॥ 1683
लिंगाब्जस्वस्तिकमाह - ।
सप्तविंशति भूस्सूत्रैः निहितैः प्रागुदङ्गतैः॥ 1684
त्रिः) सषड्सहाति संख्याभिः षट्शतं पदमुद्भवेत्।
चतुष्षष्टिपदं मध्ये सर्वतोभद्रवत्कृतम्॥ 1685
एकेन परितो वीथिर्द्वाभ्यां द्वारयां तु विन्यसे।
चतुर्दिक्षु क्रमादेव द्वारस्योभय पार्श्वतः॥ 1686
लिंगानि कारयेद्धीमान् वाचा वीरविषक्रमात्।
लिंगपट्टसरोजं च कण्ठं पद्मं च पीठिकाम्॥ 1687
चतुर्भिः पद्मवत्कुर्यात् कर्णपुष्पाणि षोडश।
विदिक्षु स्वस्तिकं चैव पञ्चविंशतिभिः पदैः॥ 1688
पवने बहिरेकेन परितो वीथिका भवेत्।
पदानि तानि शेषाणि त्रिन्नवर्णैर्विभूषयेत्॥ 1689
(5) लिंगाब्जस्वस्तिकं नाम मण्डलं भोगमोक्षदम्।
6) लतालिंगोद्भवमाह =
लतालिंगोद्भवं वक्ष्ये मण्डलानां महत्तरम्॥ 1690
प्रागग्रमुदगग्रं च त्रिंशत्सूत्रं नवाधिकं।
आस्फाल्य कर्णसूत्रेण मध्ये च द्विपदं क्रमात्॥ 1691
पञ्चवृत्तानि कृत्वांतः कर्णिकां केसराणि च।
दलाष्टक दशाग्राणि पीतैः ताम्रैश्च पिंगलैः॥ 1692
सितैः कृत्वांतरालानि रक्तैः कृष्णैश्च पूजयेत्।
दिग्विदिक्सूत्र देशेषु दलानि रचयेत्तथा॥ 1693
तृतीये दलवृत्ते तु सूत्रं तद्वृत्त विस्तृतं।
भ्रामयेद्दर्श्य चंद्रार्धं मध्ये रेखानतिक्रमात्। 1694
आस्फालये द्वौ व्राधार्ध द्वा - - पार्श्वयोस्तथा।
विभज्य पञ्चमं वृत्तं त्रिधा कृत्वा रुणैस्सितैः॥ 1695
पूरयित्वा चतुष्कोणं बहिरेकेन वीथिकां।
सितानि कृत्वा कोणानि पूरयेदरुणप्रभैः॥ 1696

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(P.2.85) द्वाराणि तद्बहिः कुर्यात् मध्ये सूत्रचतुष्टयं।
तालाष्टकं च लिंगानां चित्रवर्णैः प्रकल्पयेत्॥ 1697
कंपौ कर्णौ च कंपौ च लिंगांशौ चानुपूर्वशः।
षट्चतुश्चतुष्पद्भिः कुर्याद्वाराण्यां च विस्तृतं॥ 1698
द्वारेष्वेषां ततिस्तुल्यं पदेनैव समुन्नतिः।
किन्तु लिंगोन्नतिद्वार्यां द्वारकर्णोन्नतिस्त्रिभिः॥ 1699
(पदैः) पार्श्वदेशेषु लिंगानां तालुखण्डांस्त्रिभिः क्रमैः।
त्रयोदश पदं ग्राह्यं इत्येकं पीठपार्श्वयोः॥ 1700
वेदाग्रं नवभिर्दिक्षु निर्गदैक पदा च सा।
द्वारवाप्यन्तराळेषु कुर्यात्सप्तपदैर्लताम्॥ 1701
ऊर्मादि वर्णवल्यादि कोणेषु पदसप्तकं।
विविध्यान् न प्रवल्लि तत्पार्श्वेषु द्विसप्ततिः॥ 1702
पिण्डैश्च द्विलता वापि भिन्नवर्णैस्तदंतरे।
कंपकर्णाकृति पिण्डी संपत् सर्पाकृतिर्लता॥ 1703
दौ लिंगादीनि पीतानि ताम्रैस्ताम्राणि सितानि च।
सितैस्तानि सितैर्वापि भूतादाभिर्विदध्यात्॥ 1704
परतः शिष्टं पदं श्वेतेन पूरयेत्। लतालिंगो-
द्भवं ह्येवं भुक्तिमुक्तिफलप्रदम्॥ भद्रकमाह- 1705
वेदैश्चतुष्षष्टिपदेषु मध्ये पद्मं च वेदीपद-
गोन्कभागैः। द्वाराणि दिक्षु द्विपदं कपालं- 1706
स्यात् कोणबन्धोन्यपदैश्च भद्रकम्।
षड्सहस्रे। क्षेत्रे विंशति वेदभागरचिते मध्ये-॥ 1707
कलाभिः कञ्जं, द्वार्यां गात्रकविल्लिके
श्रुतिपदे विश्वेश्वराणां प्रति। तत्राब्जोक- 1708
पल स्वस्तिकानि च तन्नावक्रादिकैराबहि-
द्वारं पञ्चसमं कपोल गळकान्ये कैकके-1709
शां पार्श्वयोः। शिष्टैः कोणमर्धेन्दुभ-
श्चपद प्रतिवीथिका मध्यं शशि रक्तं स्वर्णाभिके- 1710
सर हरितं भू कोणाश्च ऊर्मिलिपा। चित्रं
गात्रकमिन्दुवीथि च समं पत्रं च पाण्डूत्पलं- 1711

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रक्तं स्वस्तिकमस्त्रकाणिमुखभं द्वारं . . . ।
कैरिणं । क्षेत्रे प्रणवतीकृते स्वरपदे मध्ये -॥ 1712
म्बुजं बाह्यतो रेखागात्रक वीथिकेष्टकरश्रो -
दिक्षु पंकजान्यष्टभिः । द्वाराण्यष्टरुजांतर -॥ 1713
स्थितपदैः साङ्गान्यथो वीथिका, दिक्ष्वाब्ज -
कलानि दिक्षु मुनिभिः द्वाराणि बाह्यान्तरे ॥ 1714
वीथी पूर्ववदष्टदिक्षु कमलं सद्वांशकैरंतरे,
द्वाराण्यष्टपदस्थितैरपि बहिस्स्याल्लोकपा -॥ 1715
स्त्राचिनी । द्वार्यां स्वस्तिकमष्टदिक्षु कमलं -
सद्वांशकैरन्तरे । द्वाराण्यष्टपदस्थितैरपि -॥ 1716
बिन्दून् फलं वा बहिर्द्वाराणि ईशपत्राश -
दिग्विभि हरिस्थाने नेत्रगोन्ध्रो पुरम् । गौरी -॥ 1717
लतामाह - सूत्रैस्संति दशात्मकैरुभयतो -
गौरीलतामाह्वयं मध्ये वेदपदैर्विदिक्षु -॥ 1718
P.2.86) वा पदैर्भूताम्बुजानि निन्यसेत् । लिंगं पद्म -
सरोजकर्णिकमलं पद्मं क्रमाद्द्विपदैः, ॥ 1719
वर्णाभूरिविशेषच्चकोणकलितैः भूतैर्पदैः -
स्थुलता ॥ - स्वस्तिकमाह —
स्यात्स्वस्तिकं चाष्टपदेषु चैकान् कोणात्स -॥ 1720
मारभ्य पदत्रयेषु मध्यस्थ कोष्ठांतपदेन -
वेदकोष्टपदान्विलप्यान्यपदानि वैवम् -॥ 1721
श्रीमन्मतंगे = द्वात्रिंशत्पदभाजितेतु नलिनं मध्ये -
चतुर्बाह्विभिः । तद्बाह्ये त्रिपदैश्च पीठमथ -॥ 1722
तत्रैकेन वीथि इरित । दिक्षु द्वारमुदिक्षये -
रुभयतो वा चावरैर्विषुक् । लिंगं बाह्य ॥ 1723
पदेन वीथि नितरा चित्रं ह्युमाकान्तकम्
क्षेत्रे रुद्रपदीकृते ग्रहपदैर्मध्ये सितं पङ्कजं ॥ 1724
कुर्यात् कोणचतुष्टयेषु पदैः स्वर्णप्रभान्स्वस्तिकान्
दिक्ष्वादित्यपदेषु पयोलवलयैः लिंगानि ॥ 1725
पीठानि तच्छेषं भिन्नरजो विलोप्यमतुलं ।
भद्राश्च यन्मण्डलं । क्षेत्रे वेदविभाजिते -। 1726

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रतिष्ठोत्सवमात्रार्थं अभिषेकमथाचरेदिति।
ज्ञानरत्नावल्यामपि।
गृहस्थो ब्रह्मचारी वा दीक्षावाधिकारिणौ इति॥ 1425
कामिकोक्तप्रकारेण चतुर्वर्णव्यतिरिक्तां-
निर्वाण दीक्षां विना इतर दीक्षायामपि- ॥ 1426
कुण्डमण्डलादिम् (म) कृत्वा मानं दीक्षां च-
p-2-73) चाक्षुषि दीक्षां च योजयेत्। किरणे॥ स्पर्शा- ॥ 1427
योग्यानां जनानां मानस दीक्षामेव योजयेत्।
दीक्षै॥ -- ४॥ माच, ततः परं, निष्क्राम च ॥ 1428
पराचैवं व्यपरा च तथैव च। सद्यो निर्वाण-
दात्री वा स द्यो निर्वाण दायिनी॥ 1429
मानसी च क्रमादेवा द्वादशविधं भवेत्।
सापेक्षायां च दीक्षायां सबीजा त्रिविधं भवेत॥ 1430
तथा च निरपेक्षायां निर्बीजा च चतुर्विधा।
असङ्क्रान्यजातीनां कारुकाणां विशेषतः॥ 1431
तथा संकरजातीनां नाध्वशुद्धिर्विधीयते।
अध्वशुद्धिर्विधातव्या सच्छूद्राणां द्विजातिवत्॥ 1432
तत्रापि नादरहितैः प्रणवेन विहीनकैः।
जातिप्रइज विहीनैश्च - तत्त्वावरुणपद्धतौ ॥ 1433
निर्वाणद्वय बीजाय नमस्सोमाय शंभवे।
अत्र संगृह्यते बीज द्वयं दीक्षाप्रतिष्टयोः॥ 1434
सपाशत्रय विश्लेषं शिवत्वं व्यज्यते यथा।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा॥ 1435
तस्माच्छक्तिश्च ज्ञानं च वैराग्यमिति चात्मनः।
दीक्षा तस्यैव चिह्नानि पशोस्त्वेतानि रंजसा॥ 1436
कश्चिद्रूनो मलिनो भिन्नो कर्ता भोक्ता स्वकर्मणा।
शरीरस्थं विभुर्नित्यं सका . . . . ॥ 1437
. . . . नृशाय प्रमात्मकमेस्य-
स्येत्यै . . . . तः पशुपशोरत्र - 1438
अनात्मप्रख्यायोगो भोगान्कर्मणाम्।
समयादि पराच्छे मुक्तिन्यस्यायथान्यतः॥ 1439
ततः सुखादिकं कृत्स्नं भोगं कृत्वा स्वकर्मतः।
संसारि स पशुर्बन्धी मुक्तिपाशत्रयान्वितः॥ 1440

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रतिष्ठोत्सवमात्राणां अभिषेकमथाच रेवति।
ज्ञानरत्नावल्यामपि।
गृहस्थो ब्रह्मचारी वा दीक्षानाधिकारिणौ इति॥ 1425
कामिकोक्तप्रकारेण चतुर्वर्णव्यतिरिक्तां-
निर्वाण दीक्षां विना इतर दीक्षायामपि- ॥ 1426
कुण्डमण्डलादिम् (म) कृत्वा मानं दीक्षां च-
P-2-73) चाक्षुषि दीक्षां च योजयेत्। किरणे॥ स्पर्शा- ॥ 1427
योग्यानां जनानां मानसदीक्षामेव योजयेत्।
दीक्षौ॥-- ४॥ मा च, ततः परं, निष्काम च ॥ 1428
पराचैवै व्यपरा च तथैव च। सद्यो निर्वाण-
दात्री वा स द्यो निर्वाण दायिनी॥ 1429
मानसी च क्रमादेवा द्वादशविधं भवेत्।
सापेक्षायां च दीक्षायां सबीजा त्रिविधा भवेत॥ 1430
तथा च निरपेक्षायां निर्बीजा च चतुर्विधा।
असञ्जक्रान्यजातीनां कारुकाणां विशेषतः॥ 1431
तथा संकरजातीनां नाध्वशुद्धिर्विधीयते।
अध्वशुद्धिर्विधातव्या सच्छूद्राणां द्विजातिवत्॥ 1432
तत्रापि नादरहितैः प्रणवेन विहीनकैः।
जातिप्रइजविहीनैश्च- तत्त्ववरुणपद्धतौ ॥ 1433
निर्वाणक्षय बीजाय नमस्सोमाय शंभवे।
अन्न संगृह्यते बीज क्षयं दीक्षाप्रतिष्ठयोः॥ 1434
स पाशत्रय विश्लेषं शिवत्वं व्यज्यते यथा।
क्रिया सा कथ्यते दीक्षा भक्तिवैराग्यलक्षणा॥ 1435
तस्माद्भक्तिश्च ज्ञानं च वैराग्यमिति चात्मनः।
दीक्षा तस्यैव चिह्नानि पशोस्त्वेतानि रंजसा॥ 1436
कश्चिद्रक्तो मलिनो भिन्नो कर्ता भोक्ता स्वकर्मणा।
. . . . ॥ 1437
शरीरस्थो विभुर्नित्यं सका . . . . . .
. . . . नृशाय ध्यमात्मकं मेम्य-
स्थैत्यै . . . . तः पशुपशोरन- 1438
अनात्मध्यरूयायोगो भोगान्त्यकर्मणाम्।
समयादिपराच्छे मुक्तिन्यश्यायथान्यतः॥ 1439
ततः सुखादिकं कृत्स्नं भोगं कृत्वा स्वकर्मतः।
संसारि स पशुर्बन्धी मुक्तिपाशत्रयान्वितः॥ 1440

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिधा सोऽयमनुग्राह्य सकलप्रभृत्याकलः।
मलैकबलसंबद्धो विज्ञानकल उच्यते॥ 1441
निराधारोऽन्य साधारो शिवस्यानुग्रहो द्विधा।
यो) निराधारो ह्ययोस्तेषां साधारस्सकल उच्यते॥ 1442
आचार्यनिरपेक्षेण क्रियते शंभुनैव या।
तीव्रशक्तिनिपातेन निराधारोऽस्य सा मता॥ 1443
शिवेन दीक्षिताचार्यो द्विधा शक्तिनिपातनात्।
स्वयमेवानुग्रहादि स एव सकलानपि॥ 1444
शिवस्यानुग्रहान्दीक्षा जायते कृतकर्मणां॥
साचानकेविधिप्रोक्ता तत्प्रपंचोऽयमुच्यते॥ 1445
चाक्षुषी स्वस्य दीक्षा च वाचकी मानसी तथा।
शास्त्री च योगदीक्षा च हौत्रीन्यादिरनेकधा॥ 1446
चक्षुरुन्मूलयत्तत्वं ध्यात्वा शिष्यं समीक्ष्यते।
पाशबंधविमोक्षाय दीक्षा या चक्षुषी भवेत्॥ 1447
निधाय दक्षिणे हस्ते शिवं ब्रह्मांगसंयुतम्।
संस्पृशेच्छिवमूर्धादि स्पर्शदीक्षा भवेदियं॥ 1448
तत्वे चित्तं समाधाय बृंहितांतरतेजसः।
उच्चरेत्संहिता मंत्रा भागदीक्षेयं प्रकीर्तिता॥ 1449
मानसं विधिमाश्रित्य मानसीत्यभिधीयते।
P.L. 74) शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता॥ 1450
योगेन योगदीक्षा स्यात् जीवत्वे साऽव्यवस्थिता।
रजः कुण्डपती हौत्री सा द्विभेदा किलोदिता॥ 1451
समा साज्ञ द्विधा ज्ञेया दीक्षातंत्रैरिहोच्यते।
... ज्ञानभवत्येका क्रियावत्यपरा स्मृता॥ 1452
विनेज्यां कर्ममादि मनोव्यापारमात्रतः।
2 (क्रम) विनेज्यां कर्ममादि मनोव्यापारमात्रतः॥ 1453
दीक्षा ज्ञानवति प्रोक्ता सम्यक् तत्वावबोधिका।
ज्ञानलवती धातु क्रियाकौशलसंभवा॥ 1454
क्रियावत्यपि सानेक निर्बीजा च सबीजिका।
तत्र निर्बीजिका या सा पुत्रस्समयिनो परं॥ 1455
सबीजा तु भवेद्दीक्षा साधकाचार्ययोरपि।
अन्यनिर्बीजिकादीति प्रोक्ता सा क्षिप्रसारिका॥ 1456

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एका निर्वाणदा सद्यो द्वितीया देहपाततः।
बाल बालिश वृद्ध स्त्री भोगभुग्व्याधितात्मनाम्॥ 1457
भवेन्निर्बीजका दीक्षा समयाचारशुद्धितः।
विदुषां च समर्थानां सबीजा परिकीर्तिता॥ 1458
सबीजा च द्विधा भिन्ना प्रथमा शिवधर्मिणी।
चाक्षुष्यादि विभेदेन या दीक्षा समयी स्मृता॥ 1459
निराधारेण गुरुणा सद्यो निर्वाणदा कृता।
साधारणे तु तासां चेत् मुक्तिदा देहपाततः॥ 1460
साधकाचार्ययोः सोक्ता देशकालादि भेदतः।
धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकं॥ 1461
वी) सान्निध्य शोध्यते यत्र सैवोक्ता शिवधर्मिणी।
अधर्ममात्र संशुद्धे द्वितीया लोकधर्मिणी॥ 1462
नित्य मात्राधिकारित्वात् समयीन्यन्त पुत्रके।
दीक्षा निराधिकारैव नैमित्ता नयकारिणी॥ 1463
साधकाचार्ययोः सोक्ता नैमित्ये काम्यकर्मसु।
सर्वत्रैवाधिकारित्वात् साधिकारैव सा तयोः॥ 1464
यत्र रुद्रपदे योगी योगो यत्रेश्वरे पदे।
शिखाच्छेदो न यत्रास्ति दीक्षा सा समयी द्विधा॥ 1465
यत्र पाशशिखाच्छेदो योगश्शिवपदे भवेत्।
निर्वाणाख्या तु सा सैव पुत्रकेणाभिषेततः॥ 1466
साध्यमंत्राभिषेकं च साधके सा प्रकीर्तिता।
सर्वविद्याभिषेकेषु भवेत्साचार्यगोचरे॥ 1467
शिव संस्कार युक्तस्य यच्छिवत्व समर्पणं।
क्रियाया वाथ भक्त्या वा दीक्षा सर्वा मता॥ 1468
दीक्षया मुच्यते देही त्रिविधाद्भवबंधनात्।
सा च दीक्षाध्व संशुद्धिः स चाध्वा षड्विधस्स्मृतः॥ 1469
इति वारुणे॥ दीक्षा भौतिक नैष्ठिकीयमभिधात्वा-
वस्थाद्विधा लौकिका। देवो ध्वाष्टगुणाद्दिदेष्ट- ॥ 1470
चि) भुवने सद्योगदा साधके। अन्यस्स्याच्छिव
धा) धार्मिणी यमभिद्दा त्वाद्या सबीजा हेया॥ 1471

विकमित: प्राचीदुभाग्यां न्यसेत्। मध्ये-
भागमितस्त्यजनपिपदैरर्धेन्दु मन्तमुरव्म॥ 1727
कृत्वोर्ध्वेद्विपदं गत्वं तु परतः पक्षं तु सौम्यं-
पदं, कृत्वाणि यमान्यसेच्च कमलं.. स्य-॥ 1728
(श्रि) टंकं मतम्॥ कारणे॥ श्रृंगारतिलकमाह-
शतैरन्तःपद्मं सहिर विथुगाराकृतपदं-॥ 1729
गारयामुद्धवानोदिशि पद्मानि वसुभिः।
रसादष्टौ शंसून सहि रवि तयैकेनसरणि-॥ 1730
स्त्रयस्त्रिशत् सूत्रैरिति भवति श्रिंगारतिलकं।
शिवमण्डलमाह — द्विरष्टपदभागजं खपद-। 1731
वीथिबाह्ये च चतुष्षण्डकैर्नयनाभिर्षिर-
पद कृताष्टलिंगाकृतं। वितिरम रवदाम्बुज-॥1732
मनुपदप्रवेशं बहिर्वदन्ति शिवमण्डलं विधि-
वद्व्य सूत्रैः कृतम्॥ शशिमण्डलमाह- ॥1733
विरसूत्रपदान्तरे नवपदैः पद्मं स्वरैशं-
कादिष्वष्टौ . . . . पदैस्सरे . . . .॥1734
रं पदैः सप्तभिः। कोणे तत्व . . . रवेदपद-
कैलिंगानि चत्वारि यभागतं हि मध्यशर-॥1735
भिः र्व . . . अम्। पार्श्वलिंगयुगं तु वेदर-
सने पदाख्याय षड्भिः क्रमात्। लिंगपद्मसरोज-॥1736
कर्णिकमलं पीठं च कुर्यात्ततः। तलंगोभय-
पार्श्वके श्रुतिपदैः कर्णा प्रसूनं चतुष्कोष्टे-॥1737
लिंगन्तु षष्ठिकपदैः रमस्य कोणेष्वपि।
मध्ये वेद पदाम्बुजं युगचतुष्पड्भिश्च लिंगं-॥1738
तन्मा। कोणेषु त्रिपदं विचित्रितपदं राश्याह्वयं-
मण्डलं। नन्द्यावर्तमण्डलमाह —— ॥1739
प्रागग्रमुदग्रं च भावसूत्रं प्रसारयेत्।
p. 2. 87) श्वेतपद्मं च तन्मध्ये रवाद्योद . . . स्मृताः॥ 1740
एवं तत्वपदं ग्राह्य परितो वीथिका पदम्।
बाह्ये चैव पदैश्च विभिन्नवर्णैश्च सूजयेत्॥ 1741

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कोणेषु पद्ममालिख्य पञ्चवर्णैरलंकृतम्।
तत्र द्वादशकजावृत्तं चैव नन्द्यापुष्पंच रक्तवत्॥ 1742
अन्तरे श्वेतपुष्पंच नंद्यावर्तमिति स्मृतं।
नंद्यावर्तमितिख्यातं भद्रमण्डलमुच्यते॥ 1743
वल्लीतिलकमाह—
षड्त्रिंशत्सूत्रमध्ये नवपदं मण्डलं ततः।
बहिर्वीथिकैर्वा दिक्षु द्वादशं वा पंकजान्यु-॥ 1744
भयतस्तस्तैः पदैः पार्श्वयोः। कुर्याल्लिंग-
श्चतुष्टयं रसपदैः कोणेकलिंगाक्षुरैः, अंतः-॥ 1745
कोणचतुष्टये पदपदैश्चत्वारि लिंगानि च।
चारुत्वकवस्त्रं स्त्रं किल भानुमध्येऽरुणं-॥ 1746
षोडश कवर्णलिंगं। कोणेषु लिंगं सुरवर्ण-
युक्तं लिंगार्धयुक्तं कमलासनस्थं॥ 1747
लक्ष्मीमण्डलमाख्यातं सोमाख्यपतिरुच्यते।
सोमाख्यपतिमण्डलमाह—
षट्षट् सूत्रपदान्तरे नवपदैः पंक्तस्थैः-॥ 1748
वीथिका। त्र्यष्टाष्टेषु पदैः सरोरुहयुगं-।
द्वारं पदैः सप्तभिः। कोणे तत्वपदेषु वेद -॥ 1749
पदकैः लिंगानि चत्वार्यथो- तत्वकर्णगतं-
हि मध्यमुडुपं विचित्र वर्णैर्विचित्रीकृतं॥ 1750
तत्सोमाख्यपमाख्यातं कर्पूरतिलकं शृणु।
कर्पूरतिलकमाह — —॥ 1751
मध्ये शंकुन्यसेद्धीमान् भ्रामयेत्वसुसूत्रकं।
तन्मध्ये श्वेतवर्णन्तु प्रथमस्य चतुर्दलं॥ 1752
मुनिसंख्यावसानं तत् तत्र द्विगुणपत्रकं।
श्वेतवर्णदलास्सर्वे रक्ताश्चोपदलास्स्मृताः॥ 1753
कृष्णवर्णं तु रेखायां पीतवर्णा समाहृतं।
दलाग्रे वाऽथ तन्मूले श्याममेवं विधीयते॥ 1754
कर्पूरतिलकं प्रोक्तं पद्मभद्रमथ शृणु।
पद्मभद्रमाह — पूर्ववद्भ्रामयित्वाथ, दशसूत्रं-॥ 1755
क्रमेण तु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दलक्रमं यथा पूर्वं दलोपदलसंयुतम्।
रक्तवर्णदलाश्चैव दलाग्रे पीतवर्णकम्॥ 1756
श्वेतवर्णाश्च रेखायां आवृतं कर्णिकं।
दलमूले विशेषेण श्याममेवं विधीयते॥ 1757
टाकाशेभ मलं कृत्वा पञ्चवर्णक्रमेण तु।
दलक्रमं यथा पूर्वं दलोपदलसंयुतम्॥ 1758
~~रक्तवर्णदलं~~ – मञ्जुलभद्रं —
पञ्चपत्रं समाख्यातं मञ्जुलं त्वधुनोच्यते॥ 1759
मञ्जुलभद्रमाह —
पार्श्वे लिंगयुगं तु वेदरसप·· दिक्षु षड्भिः-
क्रमात्। लिंगं पद्मसरोजकर्ण- मलपीठं च-॥ 1760
कुर्यात्तदा। तल्लिंगश्चोभयपार्श्वगैः श्रुतिपदैः
कर्णप्रसूनं चतुष्कोष्ठे लिंगयुगं हि षष्टि-॥ 1761
चपदैः अन्तस्थकोणेष्वपि। मध्ये वेद-
पदांबुजं युगचतुष्षाष्टिश्च लिंगं तथा॥ 1762
कोणे त्रित्रिपदं विचित्रितमिदं स्यान्म-
P. 2.88) ण्डलं मञ्जुलं॥ सुभद्रमण्डलमाह –॥ 1763
प्राच्यामुदगं च· · · · सूत्रसंख्या
चतुर्दशा पञ्चविंशात् पदं मध्ये तालं च-। 1764
स्वस्तिकं कुरु। पूर्वादि वीथ चतुर्दिक्षु-
द्वारं प्रत्येकं· - · ·तद्द्वारो द्वयम -॥ 1765
पार्श्वे सुलिंगं प्रतिविशेषतः। जगति-
कर्णपद्मे च लिंगमष्टपदैश्च रहित। लिंगावि-॥ 1766
मुखवर्णानि कलावर्णान्तु धारकं। कोणे
नवपदं पद्मं हृदयादिनिमं शुभं। कर्ण- 1767
पुष्पपदं ग्राह्यं एकैकं भावसंख्यया-
लिंगपार्श्वे विशेषेण भिन्नवर्णैरलंकृतं॥ 1768
षोडशं पीठपार्श्वे तु परितो वर्णभिन्नकैः।
एवं सुभद्रमाख्यातं श्रीविशालं ततः श्रृणु॥ 1769
सर्वतत्वात्मक मण्डलमाह —
षट्त्रिंशत्पद भाजिते विकृतिभिः मध्ये= 1770
लतामालिखेत॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गौर्याः पद्मयुतं बहिः प्रतिदिशं लिङ्गानि-
ति त्रीणि च। कोणेषु स्थितषट्पदैः सरसिजं- ५ । १७७१
लिङ्गान्तरे बिन्दुशशाङ्कं बाह्यपदेन .... ।
. . . . . . सर्वतत्वात्मकं मण्डलम्॥ १७७२

कैलासकांतमाह–

ततः कैलासकांताख्यं मण्डलं त्वष्टनाकृत्य।
एकाधिकं च चत्वार प्रागादुत्सूत्रनिर्गमम्॥ १७७३
मध्ये शतपदं पद्मं चतुश्शाला समन्वितम्।
कालां तु सितवर्णन्तु पार्श्वो द्वौ वसुलिङ्गकौ॥ १७७४
लिङ्गानि सुखवर्णानि कलावर्णं चतुर्दिशि।
पद्मं वा स्वस्तिकं वापि चतुष्कोणेषु कल्पयेत॥ १७७५
शेषाणि भिन्नवर्णानि बाह्ये ह्येकपदं बुधः।
कुर्यात् कैलासकान्ताख्यं मण्डलं देशिकोत्तमः॥ १७७६
एवं कृत्वा विशेषेण शेषं युक्त्या प्रकल्पयेत।

पार्वतीकांतमाह=

षट्त्रिंशत्षट्पदे मध्ये चतुष्कोष्ठे पदांबुजे॥ १७७७
चतुर्दिक् द्विपदं ज्ञेयं कोणे त्वेकपदं बुधः।
चतुर्विंशतिधा वृत्ये लिङ्गं षण्णवति बुधः॥ १७७८
गं) सदाशिवं समभ्यर्च्य गन्धपुष्पस्रगादिभिरिति।
पञ्चवर्णचूर्णविधिमाह — उपयेदकारणे॥ १७७९
पीतशुक्लारुणं कृष्णं वर्णानां रजःस्मृतं।
पीतं हरिद्राचूर्णं स्यात् शालिपिष्टेन शुक्लकं॥ १७८०
गैरिकं चूर्णं चेष्टका चूर्णं रजो रक्तं विधीयते।
तुषांगारचूर्णैस्तु कार्यं कृष्णं रजस्तु वा॥ १७८१
वामी ज्येष्ठा च रौद्री च भवानी च रजोधिपाः।
सर्वदोषनिवृत्यर्थं कृष्णवर्णं प्रसारयेत॥ १७८२
आलिखेच्चूर्णं पीतादैः कनिष्ठांगुलनाहतः।
सूत्रांतरं यवं प्रोक्तं .. स्वाङ्गुलांतरं स्मृतम्॥ १७८३
अप सव्येन मुक्त्यर्थी भुक्त्यर्थं सव्यकेनवा।
सर्वसिद्धिकराग्रेण श्रीकामी मुष्टिना लिखेत॥ १७८४

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्णिकां पीतवर्णेन रक्तवर्णेन केसरम्।
दव्वा सिद्ध्यै दव्वाग्राणि श्वेतवर्णेन लेखयेत्॥ 1785
p.2.89) लेखां संलेख्य रक्तेन कृष्णेनांतरमालिखेत्।
यदि वारुणलेखां तु कृष्णरक्तेन लेखयेत्॥ 1786
श्वेतेन वाथ रक्तेन बहिर्वीथीं प्रसारयेत्।
द्वाराणि द्वारं वर्णानि शोभाश्चाप्युपशोभिताः॥ 1788
सर्ववर्णैस्समालिख्य रात्रौ चैवाधिवासयेत्। 1789
इति पञ्चवर्णचूर्णविधिः—

ज्ञानरत्नावल्यां मण्डलविधाने पञ्चवर्ण-
भेदमाह—
यवगोधूमजैः चूर्णैश्शालितण्डुलजैस्सितः॥ 1790
या तु सिन्धूरजं रक्तमन्यत्पत्वेष्टकं भवेत्।
गव्यैः) कृष्णं रजस्तुषैर्दग्धैः अंगारैर्वासुचूर्णितैः॥ 1791
हरिद्रासंभवं पीतं गैरिकोद्भूतमेव च।
हरितैश्चूर्णितैः पत्रैः हरितं च प्रकल्पयेत्॥ 1792
अभावे सर्ववर्णानां तण्डुलैः श्यामकादिभिः इति।
अजिते वास्तुपूजामाह—
अतःपरमिदं वक्ष्ये वास्तुपूजां विधानतः॥ 1793
पुराभूत्पुरुषः कश्चित् भुवनत्रयभीषणः।
भुवनानि शरीरेण छादयन् भीमविक्रमः॥ 1794
तं दृष्ट्वा सर्वदेवाश्च भीताह्यासन् परस्परं।
संप्राध्यायी तु संभूय गृहीत्वाथ मयोमुखम्॥ 1795
अष्टेभ्यो बाहवः पृष्ठे सहसैव न्यपादयन्।
स एव वास्तुरित्युक्तः सर्वांगानि सुरासुरैः॥ 1796
यदि तेषां यदा पूजा सुराणां न विधीयते।
तदा देवास्तदंगानि हित्वा तच्यांति वै ध्रुवं॥ 1797
गतेषु तेषु तद्वास्तु क्षीयते नात्र संशयः।
क्षयहेतुस्तदंगानां विक्षेपोऽत्र भविष्यति॥ 1798
तस्मात्तद्वास्तु देहस्थान सुरानर्चयेत्सुधीः।
ईशाने तु शिरो वास्तोः पादौ निर्ऋति गोचरे॥ 1799

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुक्षिब्रह्मशरीरं च त्वेवमंगानि कल्पयेत्।
अन्येष्वंगेषु ये देवाः ते पूजायां पराभृताः॥ 1800
यत्र प्रासादमन्यद्वा क्रियते तत्र देशिकः।
भूमिं निम्नोन्नतं सम्यक् कृत्वोपलिप्य च॥ 1801
गोमयेन पुनः कृत्वा पुण्याहं तत्र देशिकः।
सितपिष्टान्तसूत्रेण प्रासादसमविस्तरम्॥ 1802
ततोदीची मुखानि च } प्राङ्मुखानि च सूत्राणि ~~संलक्ष्येव~~ ततोदीचीमुखानि च।
दश सूत्राणि संलक्ष्येदेकाशीति पदेषु च॥ 1803
ब्रह्मा नवपदं भूमौ वास्तुमध्ये विशेषतः।
समर्चको विवस्वांश्च मित्रश्च पृथिवीधरः॥ 1804
. . . . प्रोक्तो विदिक्षु च।
P.2.90) आपश्चैवापवत्सश्च सविता सावित्र एव च॥ 1805
इन्द्रश्चेन्द्र जयश्चैव रुद्रो रुद्रजयस्तथा।
एते द्विपदभोक्तारः चाष्टौ देवाः प्रकीर्तिताः॥ 1806
आग्नेयादिषु कोणेषु प्राक्पश्चिम सदाश्रयाः।
बाह्यस्य वीथिकान्देवान् क्रमशोऽन्य वदामि ते॥ 1807
ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः।
आदित्यस्सत्यको भृंगश्चान्तरिक्षश्च पूर्वगाः॥ 1808
अग्निः पूषा च वितथो गृहक्षतियमो तथा।
गंधर्वो भृंगराजश्च मृगश्चैव तु दक्षिणे॥ 1809
पश्चिमे निरृति प्रोक्तो ततो दौवारिकस्तथा।
सुग्रीवः पुष्पदन्तश्च वरुणश्चासुरस्तथा॥ 1810
शोषश्च पावयक्ष्मा च तेचाष्टौ कल्पितास्सुराः।
उत्तरे च तथा वायुः नागो मुख्यस्तथैव च॥ 1811
भल्लाटकश्च सोमश्च वृषभश्चादितिरेव च।
दितिश्च क्रमशश्चैव द्वात्रिंशत्संप्रकीर्तिताः॥ 1812
ब्रह्माण्डमध्यमे पूर्वं पूजयेद्देशिकोत्तमः।
पाद्यमाचमनीयैश्च गन्धपुष्पैस्सुधूपकैः॥ 1813
दीपैश्च परमां तन्तु चरुन्तस्य निवेदयेत्।
समर्चकस्य इडद्वाणं मु आज्ञे तु विवस्वतः॥ 1814

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गुल्माब्जमित्रसंज्ञस्य . . . . . कुलुत्थकैः।
माषं निष्पावगोधूमं मधुरश्यामकैरपि॥ 1815
मिश्रं चरुं क्रमेणैव दद्यादत्र जयांतकम्।
द्वात्रिंशानामथेशानप्रमुखानां चरुं क्रमात्॥ 1816
पृथक् ससर्पिकं दद्यात् तेषां वर्णं वदामि ते।
मन्त्रान् ब्रह्मादिकानां तु क्रमेणैव वदामि ते॥ 1817
ओंकारमादितः कृत्वा ह्रा ह्रा ह्रादिति चोपरि।
श्री वास्तोष्पतये ब्रह्मणे नमः। इत्ययं ततो भवेत्॥ 1818
अन्येषामपि सर्वेषां स्वनामाद्यंत बीजकम्।
प्रणवेन सहोच्चार्य चतुर्थ्यन्तैश्च नामकम्॥ 1819
. . . . मन्त्रबलिं हरेत्।
चरकी च विदारी च पूतना पापराक्षसी॥ 1820
एताश्चतस्रो बाह्यस्थाः शक्तयः पदवर्जिताः।
चतुर्भुजजटामौलिं कमण्डल्वक्षधारिणं॥ 1821
वामहस्तं तु जानूर्ध्वे सव्यहस्ते तले स्थितं॥
हेमाभमब्जजं यक्षा गन्धाद्यैरुपचारकैः॥ 1822
दध्याज्यं गुडसंमिश्रं शुद्धान्नेन बलिं क्षिपेत्॥
चतुर्भुजयुताब्जे तु खड्गखेटकधारिणः॥ 1823
कृताञ्जलिपुटास्सर्वे ध्यात्वा स्वस्वपदे स्थिताः॥
तत्तत्स्वनाममन्त्रेण स्वाहान्तैः प्रणवादिभिः॥ 1824
उच्चार्य गन्धपुष्पाद्यैः संपूज्योक्तबलिं क्षिपेत्॥
बाह्ये चरक्यादीनां . . . . बलिं क्रमम्॥ 1825
प्रागादिषु क्रमात्तासु मांसोदनबलिं हरेत्॥
बलिं समाप्य पश्चात्तु शल्योद्धारं समाचरेत्॥ 1826
समन्तैकपदे तत्र होमस्थानं विधीयते।
सैकतं स्थण्डिलं तत्र कृत्वा पूर्वमतन्द्रितः॥ 1827
P. 2. 91 स्थण्डिलादिस्रुवान्तानां कृत्वा शुद्धिं यथाविधि।
पञ्चसंस्कारमादौ तु कृत्वा तत्र हविर्भुजः॥ 1828
ब्रह्माणं तत्र चावाह्य ब्रह्माग्निरिति चिन्तयेत्।
पूजयित्वा च गन्धाद्यैः ततो होमं समाचरेत्॥ 1829

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भुक्त्वा तथा यथापूर्वं परिधीनं तु पावकम्।
समिदाज्य चरूणां च प्रत्येकं तु शताहुतिः॥ 1830
ब्रह्मणे प्रथमं कृत्वा सर्पिषा केवलं ततः।
समर्कादि देवानां चतुर्णां च यथाक्रमम्॥ 1831
हुत्वा दशाहुतिं तेषां स्वाहान्तांश्च स्वनामतः।
आपादिना मन्त्राष्टानामष्टौ प्रत्येकमाहुतिः॥ 1832
ईशानप्रमुखानां च प्रत्येकं पञ्च पञ्च च।
पूर्णाहुतिं ततो दद्यात् ब्रह्ममंत्रेण देशिकः॥ 1833
एकमात्र प्रयोगेण स्वनामपदमंत्रतः।
चरकीप्रभृतीनां तु जुहुयाद्देशिकोत्तमः॥ 1834
परिषिच्य ततश्चाग्निं उद्वास्यान समापयेत्।
पदं प्रति विशेषेण अन्यथा दैववर्णकैः॥ 1835
चित्रीकृत्य च संपूज्य यथावदनुपूर्वशः।
इत्यजिताख्ये महातंत्रे वास्तुपूजापटलोष्टमः॥ 1836

— शिवाय नमः —

केदारव्रतमाहात्म्यम्

केदारव्रतमाहात्म्यं सर्वकल्याणकारणम्।
प्रवक्ष्यामि जगद्भूत्यै मुनिप्रवरनिर्मितम्॥ 1837
यत्सवान्यै पुरा प्रोक्तं गौतमेन महर्षिणा।
आप्तं शङ्करदेहार्धं देव्या यद्व्रतचर्यया॥ 1838
यद्व्रतं कुर्वतां लोके संभवंति विभूतयः।
आरोग्यमायुः कीर्तिं च जायते शृणुतामिदं॥ 1839
एकविंशति वाराणि चरक्येतद्व्रतोत्तमं।
असौ विन्दति कल्याणं इहचामुत्र च ध्रुवं॥ 1840
स्त्रीचेत्समाचरेत्वेतत् सौभाग्यं कीर्तिमेव च।
आयुः श्रियं च लब्ध्वैव भर्तृलोके महीयते॥ 1841
तस्माद्द्विजो वा राजा वा वैश्यो वा शूद्र एव वा।
स्वयमप्यन्यथान्येन नानार्थां सहितान् तत्समाचरेत्॥ 1842
अस्ति पूर्वोत्तरे भागे पृथिव्यां पृथिवीधरः।
कैलास इति विख्यातः श्रीमान् लोकनमस्कृतः॥ 1843

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

राजते विमलैः शृंगैः नवरत्नविचित्रितैः।
तटित्पुंजविशंकाभैः शारदाभ्रैरिवावृतः॥ 1844
नानाद्रुमलताकीर्णैः नानापुष्पफलान्वितैः।
नानाविहगसंघुष्टो नानानिर्झरसंयुतः॥ 1845
तालैस्तमालैर्हिंतालैर्वकुलैस्तिलकैरपि।
अशोकैः कर्णिकारैश्च चंदनैर्देवदारुभिः॥ 1846
नालिकेराम्रपनसपूगपुन्नागचंपकैः।
एतैरन्यैश्च तरुभिः शोभितैः पुण्यकाननैः॥ 1847
एतस्य मध्यशिखरे योगिबृन्दनिषेविते।
यक्षकिन्नरगंधर्वसिद्धविद्याधरैर्वृते॥ 1848
P.L.92) सदा वसति विश्वात्मा पिनाकी प्रमथैर्वृतः।
अंबिकासहितः श्रीमान् सर्वदेवनमस्कृतः॥ 1849
एकदा वरपर्यंके रुद्राणीसहितः प्रभुः।
कला प्रकुर्वन् विविधास्सुराणां दर्शनं गतः॥ 1850
इन्द्राद्या लोकपालाश्च नारदाद्याः सुरर्षयः।
सनन्दनसनकाद्याश्च योगिनस्तमुपासते॥ 1851
अग्निर्वायुस्तथादित्यः चन्द्रमास्सह तारकैः।
ब्रह्मर्षयो वसिष्ठाद्याः ते सर्वेऽपि सिषेविरे॥ 1852
रंभा तिलोत्तमा चैव सहजन्या च मेनका।
याश्चान्या देववनिता उपतस्थुः पिनाकिनं॥ 1853
मातरश्चांबिकाद्याश्च कार्तिकेयो गजाननः।
नंद्यादयो भूतगणाः सारूप्यमभिसंश्रिताः॥ 1854
एवं प्रवर्तमानायां सभायां रुद्रसन्निधौ।
नारदप्रमुखास्तत्र जगुः तेन प्रचोदिताः॥ 1855
तेषां प्रवृत्ते मधुरे गीते सर्वमनोहरे।
वादित्रलयसंयुक्ताः ननृतुश्चाप्सरोगणाः॥ 1856
तासामप्सरसां मध्ये रंभा सर्वांगसुंदरी।
मधुरं लास्यमकरोत् सर्वगीर्वाणसंमता॥ 1857
तत्र भृंगि ऋषि नमि समये शिवसंमतः।
उत्थाय विकटनृत्तं अकरोच्छिवसंनिधौ॥ 1858

ततः प्रवृत्ते हासे च सुराणां शिवयोः पुरा।
महान् कलकलश्चैव शब्दः कुहरपूरणः॥ 1859
एवं प्रहसने वाक्ते तमाभाष्य हरोऽब्रवीत्।
स) साधु भृंगिरिट सम्यक् कृतं प्रहसनं त्वया॥ 1860
इत्युक्त्वा भगवान् तस्मै प्रसादमकरोत्प्रभुः।
हरः प्रसादात्सुप्रीतः सुरैर्बहुमतो भवत्॥ 1861
हरं प्रदक्षिणं कुर्वन् विनादेकं समाहितः।
ततो देव्यब्रवीत् वाक्यमेवमुद्वीक्ष्य संमिता॥ 1862
मदङ्गं परिहृत्यासौ कृतवान्यां प्रदक्षिणं।
प्रणामे च किमेतस्य कारणं परमेश्वर॥ 1863
ब्रूहि मे तत्वतस्सर्वं श्रोतुं कौतूहलं हि मे।
तत्रैव मुक्ते भगवान् बभाषे शशिशेखरः॥ 1864
योगिनो न नमन्ति त्वां परमार्थमिदं प्रिये।
शक्तिं शिवं समुद्वीक्ष्य शिवमेवं समाहिताः॥ 1865
ये भजंते प्रिये तेषां त्वया नास्ति प्रयोजनं।
इत्युक्त्वाऽथ महेशेन प्रीलिता परमेश्वरी॥ 1866
शक्तिं भृंगिरिटेर्देहात् आदत्त रुषिता भृशं।
शक्त्या विना कृतः सोऽपि त्वगास्थि विषमांसधृक्॥ 1867
स्नायुः ग्रन्थि जटालुस्सन् निस्सारो विकरोऽभवत्।
ततः तु देवि कुपिता देवतात्रिप्रसादिता॥ 1868
P. 2. 93) जगाम मुक्त्वा कैलासं तपसे गौतमाश्रमं।
सिंहैर्नागैश्च शार्दूलैः हरिणैश्च निषेवितं॥ 1869
पन्नगैर्गरुडैश्चैव विमुक्तान्योन्यमत्सरैः।
नानाद्रुमलताकीर्णं सेवितं परमर्षिभिः॥ 1870
सर्वलोकप्रियकरं सर्वकामफलप्रदम्।
गौतमोऽपि महातेजा समित्कुशफलानि च॥ 1871
अन्यानि होमयोग्यानि वनादादाय चागतः।
स्वस्याश्रमस्य पूर्वस्यां शोभामुद्वीक्ष्य दर्शितां॥ 1872
किमिदन्ताव सारण्यं अधिकं शोभितं महत्।
इति चिन्तां समाविष्टो प्रविशन्नाश्रमं मुनिः॥ 1873

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रविश्य परमोद्विग्नां भवानीं प्रेक्ष्य दर्शितः।
अर्घ्यं पाद्यं च पूजां च चकारास्यै समाहितः॥ 1874
ततः कृत्वासनं तस्यै सुप्रसन्नां शिवप्रियाम्।
कृताञ्जलिरपृच्छत्तां अत्रागमन कारणम्॥ 1875
वि) पृष्टा च मुनिना देवी विषादस्य च कारणं।
रौत) प्रणाममकरन्तस्य कथयामास पार्वती॥ 1876
एवमुक्त्वा तु भगवान् प्रणतं मुनिमब्रवीत्।
भगवन् हरदेहार्धं यादृशेनाप्यते मया॥ 1877
तादृशं मे व्रतं ब्रूहि विधिवद्योगिसत्तम।
वक्ष्येयं अहमत्रैव तन्मे ब्रूहि महामुने॥ 1878
एवं भगवान्यगदितो गौतमो भगवानृषिः।
संवीक्ष्य शिव शास्त्राणि पुराणानि च सर्वशः॥ 1879
सुनिश्चित्य फलं श्रीमान् केदारव्रतमुत्तमं।
आचचक्षे मुनिवरः स महात्मा महातपाः॥ 1880
अपर्णाया ब्रवीद्विप्रः व्रतस्यास्य विधिक्रमं।
कथं कथय भद्रं ते यथा शास्त्र प्रचोदितं॥ 1881
एवं ब्रुवाणां तां देवीं उवाच मुनि सत्तमः।
मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे समाहितः॥ 1882
क्षौमैः कार्पासजैर्वापि पट्टोत्थैर्वा यथारुचिः।
हस्ते कृत्वा प्रतिसरं एकविंशति सूत्रकैः॥ 1883
द्वौ हस्तौ संपुटीकृत्य तदोरं दक्षिणे करे।
पञ्चाक्षरेण मंत्रेण विश्वेत्वेति धारयेत्॥ 1884
तत आरभ्य कर्तव्यं अमावास्या विधिक्रमं।
नित्यं प्रातः समुत्थाय कृत्वाचाचमनादिकं॥ 1885
केदार देव पूजां च नित्यं कुर्याद्विशेषतः।
उपोष्य रजनीमेकां कृत्वा भक्तस्य भोजनं॥ 1886
ततः पर्व दिने प्राप्ते स्नात्वा नियतमानसः।
P. L. 94) आचार्यं च समाहूय शास्त्रे सुविचक्षणः॥ 1887
संपूज्य विधिवत्तस्मै दक्षिणां संप्रदाय च।
तेन वृन्देन निर्दिष्टं व्रतचर्यं समाचरेत्॥ 1888
विविक्ते रुचिरे देशे धान्य राशिं निधाय च।
तस्योपरि विधातव्यः पूर्णकुम्भस्सुसत्कृतः॥ 1889

संवेष्ट्य सूत्रजालैस्तु एकविंशतिसूत्रकैः।
क्षौमेण वा दुकूलेन वाससा वा नवेन च॥ 1890
नवरत्नैः पञ्चरत्नैः स्वर्णं वाथ यथाबलम्।
निधाय गंधपुष्पाद्यैः अर्चयित्वा यथाविधि॥ 1891
आवाह्य देवं तत्रैव प्रतिष्ठाप्य यथाविधि।
केदार देव पूजां च कुर्यादपि विशेषतः॥ 1892
कुंकुमागरुकर्पूर कस्तूरी चंदनादिकान्।
गंधांश्च विविधान् देवि पुष्पाणि सुरभीणि च॥ 1893
भूषणानि विचित्राणि निवेद्य समाहितः।
बिल्वपत्रं तपस्वी च तुलसीकरवीरकम्॥ 1894
एकपत्रारविंदञ्च विष्णुक्रान्तिस्तथैव च।
अपामार्गकुशादूर्वा श्वेतार्कं हेमधत्तूरकं॥ 1895
नंद्यावर्तं श्रियावर्तं पलाशं चातिपुष्पकं।
श्रीदेवीनामपुष्पं च पुन्नागं वकुलं तथा॥ 1896
चंपकं पङ्कजं चैव नीलोत्पलं तथैव च।
पुष्पैरभ्यर्च्य विधिवत् धूपदीपादिभिश्शिवं॥ 1897
गोधूमपिष्टसुकृतानेकविंशति संख्यया।
गोलकान् घृतसंपक्वान् स्थापयेद्देवसंनिधौ॥ 1898
अपूपं पिष्टकांतं वा पायसं गुलसंयुतम्।
दधिमत्कृतसंयुक्तं अनेकव्यंजनैर्युतम्॥ 1899
फलैस्संपूज्य परितः कदलीपनसाम्रकैः।
सर्वं निवेद्य देवाय दत्वा चाचमनादिकम्॥ 1900
तांबूलं च निवेद्यैव स्तोत्रं कुर्यादभीप्सितम्।
एवं प्रकारैः पूजाभिः निवेद्यस्तोत्रपाठकैः॥ 1901
शिवस्य लीलाकथया रात्रिशेषं व्यपोह्य च।
ततः प्रातः समुत्थाय कृत्वा नित्यादिकां कुरु॥ 1902
वृषेश्वरं समभ्यर्च्य पाद्यमाचमनादिकं।
प्रदक्षिणनमस्कारं स्तोत्रं कुर्याद्यथेप्सितं। 1903
आचार्यपूजनं कृत्वा वस्त्रभूमिधनानि च।
हस्ते प्रतिसरं ग्राह्य जलमध्येपि निक्षिपेत्॥ 1904

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

केदारदेवमभ्यर्च्य कुंभं संग्राह्य पाणिना।
केदारदेवमभ्यर्च्य कुंभोदैरभिषिंचयेत॥ 1905
P.L.95) मुआलं दापयेत्तस्मै धूपदीपादिकं क्रमात्।
ततः शेषजलं ग्राह्य प्राशयेदुदकान्यपि॥ 1906
व्रतं समाप्य विधिवत् प्रीणयस्व त्रिलोचनं।
ततः प्रीतो महादेवः सर्वैस्सुरगणैस्सहि॥ 1907
आगत्य स्वशरीरार्धं भवान्यै दास्यति ध्रुवं।
एतद्भवानी सुप्रीता श्रुत्वा गौतमभाषितं॥ 1908
यथा निर्दिष्टमृषिणा तथा सर्वं समाचरेत्।
ततः प्रीतमना भूत्वा भगवान् वृषभध्वजः॥ 1909
आगत्य विबुधैस्सार्धं ददौ तस्यै परिशिवः।
ततः प्रीता भवानी तु शंकरार्धं समेत्य च॥ 1910
एवं प्रसादयामास लोकानां हितकाम्यया।
देवप्रसादात्त्रैलोक्यं चरत्वे तद्व्रतोत्तमं॥ 1911
यो यत्प्रार्थयते बुद्ध्या तत्सर्वं स समाप्नुयात्।
इति प्रसादितो भूत्वा भगवानंबिकासखः॥ 1912
तथेत्युक्त्वा सुरगणैः तत्रैवान्तरधीयत।
ततः चित्रांगतो नाम्ना गंधर्वः शिवभक्तिमान्॥ 1913
व्रतचर्याक्रमं लब्ध्वा नंदिकेश्वरपार्श्वतः।
मनुष्यविषयं प्राप्य तेषामुपदिशाम्यहं॥ 1914
इति निश्चित्य मनसा जगामोज्जयिनीं पुरीं।
वज्रदंताय महके ददौ चैतद्व्रतं शिवम्॥ 1915
व्रतमेतमनुष्ठाय समस्तान् भवाङ्किवि।
तस्मिन् पुरे वसत्येकः शिवगुप्त इति श्रुतः॥ 1916
बभूवतुः तस्य सुते शिवभक्ते मनोहरे।
ततोऽभूतां वैश्यसुते तस्यां च परिकन्यके॥ 1917
एकां पुण्यवतीं प्राहुः अन्यां भाग्यवतीं विदुः।
ते कन्ये पितरं प्राप्य वचो निगदतुः प्रिये॥ 1918
केदारदेवनामस्य व्रतं कर्तुं प्रसीद नौ।
तारयामेवं निगदिते पिता वचनमब्रवीत्॥ 1919

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वत्से श्रुतं दरिद्रोऽहं कथमासाद्यते व्रतं।
सामग्री तस्य न हि मे युवाभ्यां तन्निमुच्यताम्॥ 1920
दि) इति पित्रा समाविष्टे कन्येऽब्रूतां पुनर्वचः।
अनुज्ञाते त्वया तात कर्तुमिच्छावहे व्रतम्॥ 1921
अनुज्ञेयं च नितरामावयोः परमं धनम्।
इत्युक्तेन तेन वैश्येन कृतानुज्ञे च कन्यके॥ 1922
P.L. 96) ततः कांचिद्गुचिरे देशे वटवृक्षे समाश्रिते।
कृत्वा प्रतिसरं तत्र निश्चितव्रते बभूवतुः॥ 1923
एतयोः निश्चयं प्रीतः तत्साहाय्यं ददौ हरः।
व्रतचर्यां समाप्याथ प्रीतेऽन्ते च बभूवतुः॥ 1924
ततः प्रीतो महादेवः समेत्य शिवया सह।
ततां कन्यकयोः प्रीतः रूपमप्सरसां ददौ॥ 1925
अनेकमायुरैश्वर्यं दत्वा चांतरधीयत।
ततः ते पितरं प्राप्य चक्राते तस्य वन्दनम्॥ 1926
पितान्चाशीर्वचः चक्रे संपत्तिर्भवतिवशुभे॥
अत्र पुण्यवती वव्रे चोज्जयिनीपतिः॥ 1927
वैश्यस्तु तस्य निर्बन्धात्तस्मै तां महिषीं ददौ॥
अत्र भाग्यवतीं वव्रे वसत्काञ्चीपुरे नृपः॥ 1928
तां च तस्मै वैश्यवरो ददौ चोलनृपाय च॥
इति दत्वात्मजे वैश्यस्समृद्धोन्यवसत्सुखं॥ 1929
साम्राज्य संपदं प्राप्य पुत्रं लब्ध्वा महौजसः॥
साम्राज्यं संपदं प्राप्य पुत्रं लब्ध्वा महौजसः॥ 1930
ते कन्ये नितरां हर्षमवापतुरनिन्दिते।
अत्र भाग्यवती नाम मैश्वर्यमदमोहिता॥ 1931
काले गते बहुतिथौ बहुमेतदुपेक्षया।
सौभाग्यहीना पुत्रेण भक्त्या निर्जिता पुरात्॥ 1932
वनसंचारदुःखेमा जगाम शबरालयम्।
ततः पुत्रं समाहूय वाक्यमेतदुवाच ह॥ 1933
उभयोर्मे विधानेन ज्येष्ठा मज्जयनीपतिः।
तान्दृष्ट्वा धनमादाय शीघ्रमागच्छ पुत्रकः॥ 1934
इति मातृवचः श्रुत्वा जगामोज्जयिनीं प्रति।
गत्वा निवेदयामास पुण्यवत्याह पुत्रकः॥ 1935

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मातुर्विवासनं राज्यात् वनवासं च दुःसहः।
ततः पुण्यवतीं श्रुत्वा ददौ तस्मै महद्धनम्॥ 1936
धनमादाय सुप्रीतः प्रययौ मातरं प्रति।
गच्छन्नपि हृदस्तेन दैवेना दृश्यरूपिणा॥ 1937
पुनर्गत्वा धनं ग्राह्य गच्छतः तस्य तद्धनं।
देवो गत्वा जगाहैनं पुनर्गत्वा सुतास्तथा॥ 1938
सा तद्विज्ञाय पुत्रेण कारयामास तद्व्रतम्।
व्रतीते धनमाहृत्य गच्छन् पूर्वधनं हृदम्॥ 1939
संप्राप्य परमप्रीतिः तत्र स्थित्वा महात्मनः।
तां प्राप्य पुत्रसंप्रीतौ ददौ मात्रे महद्धनम्॥ 1940
संप्राप्य महतीं सेनां गजाश्वरथसंकुलां।
जगाम काञ्चीनगरीं पुत्रप्रत्युद्गतोऽभवत्॥ 1941
माता पित्रा च सहिता चिरं भूमाववर्तत।
P. 2. 97) इति तस्य माहात्म्यं शृणोतीतु प्रतिक्रमात्॥ 1942
यः पुमान् तस्य वरदो भवेत् केदारनायकः।
आयुःकरं पुष्टिकरं श्रीकरं च यशःकरम्॥ 1943
महादेव्यै समुद्दिष्टं गौतमेन महात्मना।
आत्मनो हितमाकांक्षन् व्रतमेतत्समाचरेत्॥ 1944
महतीं संपदं प्राप्य शिवलोके महीयते।
इति स्कान्दे पुराणे केदारमाहात्म्यं समाप्तम्॥ 1945
हरिः ओं शुभमस्तु

महेशं वृषभारूढं लिङ्गमूर्तिधरं शिवम्।
नागभूषं शूलसंगं वराभयचतुर्भुजं॥ 1946
शुद्धस्फटिक ध्यायेत्केदारनायकम्।
एवं ध्यात्वा स्वरूपं तं एकविंशति निवृतिः॥ 1947
पूर्णकुंभं न्यसेत्तत्र हैमवस्त्रसमन्वितम्।
आगच्छ भगवान् सर्वान् जगन्नाथ महेश्वरं॥ 1948
पूजां गृहाण देवेश पार्वती प्राणवल्लभा।
इत्यावाह्य मंत्रं सौवर्णं सर्वतो भद्रं सर्व- ॥ 1949
रत्नोपशोभितं सिंहासनं गृहाण त्वं नाना-
विध जगन्मयः। इत्यासनमंत्रं —— ॥ 1950

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुरासुरार्चित पादेश जगज्जय जटाधर।
पाद्यं गृहाण देवेश भक्तानाम भयप्रद॥ 1951
इति पाद्यमंत्रं –
सर्वेश सर्व विश्वेश सुरेश्वर महेश्वर।
जगद्गुरो महादेव गृहाणाचमनं शिवं॥ 1952
इत्याचमनमंत्रम्
सर्वज्ञ सर्ववरद शिवाय वद शंकर।
स्नानं गृहाण देवेश गृहाण गरकंधर॥ 1953
इति स्नानमंत्रम्।
दिगंबर जगन्नाथ अंधकासुर मर्दन।
वस्त्रं गृहाण देवेश जगत्ताप निवारण॥ 1954
इति वस्त्रमंत्रं –
यज्ञेयं यज्ञफलदं दक्षयज्ञ विनाशन।
यज्ञोपवीतं देवेश गृहाण गरकंधर॥ 1955
इत्युपवीतमंत्रं –
चन्दनागरुकर्पूर कस्तूर्यादि महेश्वर।
गन्धं गृहाण देवेश गजचर्माम्बरेश्वर॥ 1956
इति गंधमंत्रं –
यक्षराक्षसभूतेश दक्षाध्वरविनाशन।
यक्ष राक्षस सर्वेश गृहाणाक्षतमीश्वर॥ 1957
इत्यक्षतमंत्रम् –
सदानंदन सर्वज्ञ सोमांकुर मनोहर।
पुष्पं गृहाण देवेश सर्वकामार्थ सिद्धिद॥ 1958
इति पुष्पमंत्रम्
P.L.98) गुग्गुलं सततं काश्च नानागंध विमिश्रितं।
मंदार कुसुमामोद धूपं प्रतिगृहाण मे॥ 1959
इति धूपमंत्रम् –
त्रिणेत्र त्रिपुरारातै त्रिशूलधर शंकर।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह॥ 1960
इति दीपमंत्रम् –
त्रिणेत्र त्रिपुराराते त्रिशूलधर शंकर।
दध्नं सर्पितं गुळसंयुक्तं पूरकाद्यैस्समन्वितं॥ 1961
प्रगृहाण ककेदार देव नैवेद्यमुत्तमम्।
इति नैवेद्यं — ॥ 1962

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम्।
कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यतां॥ 1963
इति तांबूलमंत्रं –
वृषयज्ञं चरणं चैव गृहाण वृषभेश्वर।
कैलासगौर भगवान् नंदिकेश वरप्रद॥ 1964
इति नंदिकेशवरप्रदम्-
प्रदक्षिणनमस्कारम्। 1965
त्रिणेत्र त्रिजगतानंद पशूनां पापनाशन।
भूतिभूषणसर्वांग केदारेशनमोऽस्तु ते॥ 1966
नमश्शिवाय शर्वाय शङ्कराय कपर्दिने।
सर्पयोगाय उग्राय नमश्चाध्वरकेतवे॥ 1967
ईश्वराय महेशाय नमश्चेन्द्रखण्डिने।
नमः प्रमथनाथाय नीलकण्ठाय शंभवे॥ 1968
नमस्त्रिपुरकालाय त्र्यंबकाय त्रिशूलिने।
महादेवाय भीमाय भवानीपतये नमः॥ 1969
नमः केदारदेवाय नाम भूनित्यमुच्यते।
इति दूर्वार्चनमंत्रं। 1970
अक्षौ तका - - - - - - - प्रासकम।
- - - - - छुह्निं एकविंशति तंतुकं॥ 1971
तत्संख्याग्रन्थि संयुक्तमर्चयित्वा तु दोरकं।
इति तैलार्चनमंत्रं।
व्रतं करोमि देवेश त्वद्भक्तिस्वपरायणं॥ 1972
तस्याचिं निघ्नमे यातु समाधिस्त्वत्परायणं।
इति दोरसन्धमंत्रम्।
पूरिका घृतसंयुक्तं हलतस्संज्ञा - - - -॥ 1973
- - - - - अनंत ददाते हृश्च मे शिवः।
इति शिवाय मे नमः - ॥ 1974
नमस्ते देव देवेश नमस्ते सुखद प्रभो।
गौरीप्रिय नमस्तुभ्यं श्री केदार नमोऽस्तु ते॥ 1975
इति स्तोत्रम्
इति केदारपूजाविधिस्समाप्तः। 1976
एकविंशति नामार्चनमाह—

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ओं भवाय नमः। ओं शर्वाय नमः। ओं रुद्राय
नमः। ओं शंभवे नमः। ओं शांताय नमः। ओं- ॥ 1977
महादेवाय नमः। ओं शंकराय नमः। ओं कृत्ति-
वाससे नमः। ओं त्रिपुरांतकाय नमः। ओं भीक- ॥ 1978
ण्ठाय नमः। ओं पार्वतीपतये नमः। ओं विरू-
पाक्षाय नमः। ओं पिनाकिने नमः। ओं कामारये- ॥ 1979
p. 2-99) नमः। ओं भीमाय नमः। ओं सर्वक्रियाय नमः।
ओं वृषभारूढाय नमः। ओं ब्रह्मणे नमः। ओं- ॥ 1980
ईश्वराय नमः। ओं उग्राय नमः। ओं हाँ केदा-
रनाथाय नमः। मंत्रं 21)
वृषेश्वर नमस्तुभ्यं उमेशाय नमो नमः॥ 1981
कालकण्ठ नमस्तुभ्यं पापघ्नाय नमो नमः।
महादेव नमस्तुभ्यं सुरेश्वर नमो नमः॥ 1982
कपालीश नमस्तुभ्यं सर्वेश्वर नमो नमः।
इत्येकविंशतिमंत्रैरर्चयेत्परमेश्वरं॥ 1983
लिंगोत्पत्तिमतो वक्ष्ये शृणु वारिजलोचन।
पुरुषस्य तु यच्चिह्नं पुरुषव्यक्तिकारणं॥ 1884
सदाशिवस्य तल्लिंगं शिवलिंगमिति स्मृतं।
कूटस्थांतं महादेवं सर्वकारणकारणम्॥ 1985
त्वद्वयो ममादिस्तु तस्यात्यादिं सदाशिवं।
एवां मगाद्तमसौ सर्वज्ञापि सर्वगौ ॥ 1986
मां वेत्तुम समर्थौ च नारायणपितामहौ।
परस्पर बलोद्रेकात् दर्पमोह समन्वितौ॥ 1987
मत्तोऽधिको न्यो नास्तीति परस्परगतैषया।
जिघांसू तौ तिव्रौ रुष्टौ प्रभवे समुपस्थितौ॥ 1988
ततस्तु युवयोर्मोहमीदृग्भूतं सुरेशयोः।
संवीक्ष्य सर्वदेवादि ब्रह्मशब्दतनुश्शिवः॥ 1989
बोधार्थं युवयोश्चापि ज्वलनस्तंभरूपधृक्।
वं) यो तिष्ठत्परमेशानो मध्ये त्वार्चि संयुतः॥ 1990
युवां तेन परं गङ्क्ष विस्मयंतौ सुरेगवौ।
किमिदं लिति संचित्य तत्परीक्षासमुद्यतौ॥ 1991

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गताद्दृष्टमध्यस्थाच्च लिंगरूपस्य तस्यहि।
हंसक्रोध्यशरीरेण तत्पयन्तिदिदृक्षया॥ 1992
सर्वलोकेश्वरौदेवौ . . . कृत्वाध्यकौ।
नत्वा स्तुत्वान्न देवेशं युवां तत्पार्श्वयोऽस्थितौ। 1993
युवयोर्भक्तिमन्वीक्ष्य सर्वदेवेश्वरःशिवः।
ईश्वरस्तु तदा तत्र ज्ञानकं युवयोरपि॥ 1994
विसृज्यत्योपदेशं तु . . . . . . ।
. . . महादेवमीशानं सुरनायकम्॥ 1995
अहं रुद्रो युवांचैव सर्व तस्य प्रसादजः।
तस्य लिंगमिदं तावदुहं रुद्रोन संशयः॥ 1996
. . . . ।
P. 2·100) जयामोऽपि देवेशं पूजितो लिंगमूर्धनि॥ 1997
अज्ञानजास्यं स सर्वज्ञ सदा मोहोपशांतये।
अस्मात्पूजाविधि दृष्ट्वा चतुर्दशविधि जगत्॥ 1998
पूजयिष्यति लिंगं तत् पूजाकोयो यथामति।
इत्युक्त्वा सह लिंगेन तिरोऽभूत्परमेश्वरः॥ 1999
लयं गच्छंति भूतानि संहारे निखिलानि च॥
निर्गच्छंति यतश्चापि लिंगोक्तिस्तेन हेतुना॥ 2000
अस्मिन् समर्चिते लिंगे सर्वदेव समर्चितं।
एतत्कर्मत्व दीयत्वात् ज्ञातदेवं पुरा त्वया॥ 2001
तथापि कथितं विष्णो तन्त्रस्यार्थक्रमागतं।
इत्यजितारव्ये महातंत्रे लिंगोत्पत्तिपटलः॥ 2002
कामिके – बाणलिंगं } बाणलिंगविधि वक्ष्ये श्रूयतां रविसत्तमः।
महानदी समुद्भूतं सिद्धक्षेत्रादिसंभवम्॥ 2003
पाषाणं परया भक्त्या लिंगवत्पूजयेत्सदा।
शैवं लिंगं समाख्यातं बाललिंग समाकृतिः॥ 2004
श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितं।
स्वभावात्कृष्णमेवं तु सर्वजातिषु सिद्धिदं॥ 2005
नर्मदासंभवं शैवं बाणलिंगमितीरितं।
स्वायंभुवं यथा पूज्यं सर्वलिंगोत्तमोत्तमं॥ 2006
बाणलिंगं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकं।
उत्पत्तिं बाणलिंगानां लक्षणं लेशतः शृणु॥ 2007

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नर्मदा दैविका वाथ गंगा यमुनयोस्तथा।
सन्ति पुण्यनदीनां च बाललिंगानि षण्मुख॥ 2008
इन्द्रादि पूजितान्यत्र तत्रिह्नैः चिह्नितानिच।
आर्पितानि षडग्राणि वर्णाकानि विशेषतः॥ 2009
इन्द्रलिंगानि तान्याहुः साम्राज्यार्थप्रदानि तु।
असितं हिम कीलालमुष्णं स्पर्शात्कि करोत्यलम्॥ 2010
आग्नेयं शक्तिसंकाशं अथवा शक्तिलाञ्छितम्।
इदं लिंगपरं स्नाप्य तेजसोऽधिपतिर्भवेत्॥ 2011
दण्डाकारमतं याम्यमथवा शैरवाकृतिः।
यदर्चयेत्तं मुहूर्तेन निर्णीतं जायते तदा॥ 2012
. . . . /
वारुणं वर्तुलाकारं साँगं वा द्वीपवर्चसं॥ 2013
पृथ्वी सुस्था दुस्वज्ञेत्व मावोयान्योप्सु मध्यमे॥
कृष्णसूत्रं तु वायव्यं सधूमध्वज भूषणम्॥ 2014
P. 2. 101) मस्तके स्थापितं तस्य सचैलं निहितं तु वा।
निर्वर्तितेऽपि च लत्यत्र शत्रोरुच्चाटने मतं॥ 2015
गदाकारं मध्यगुरुकैः बेरं सस्य मध्यगं।
दिने वाप्यथवा रात्रिं सस्थानो वृद्धिवर्धनं॥ 2016
त्र्यक्षं शूलाङ्कितं रौद्रं हिमकुन्देन्दुवर्चसं।
चतुर्वक्त्रमयं वापि विष्णुर्पं जायते ततः॥ 2017
वैष्णवं शंखचक्राङ्कं गदाब्जादि विभूषितं।
श्रीवत्स कौस्तुभाक्रान्तं कौस्तुभासनाङ्कितं॥ 2018
वैनतेय समाकारं श्रीभूदेवि समाङ्कितम्।
वैष्णवं नाम तत्प्रोक्तं सर्वैश्वर्यफलप्रदम्॥ 2019
सालग्रामादि संस्थं तु शंखाङ्कं श्रीनिकेतनं।
पद्माङ्कं स्वस्तिकाङ्कं च श्रीवत्साङ्कं विभूषयेत्॥ 2020
पद्मवर्णं तु यल्लिंगं पद्माङ्कं वा कमण्डलम्।
दण्डाक्षसूत्रचिह्नं वा ब्राह्मं शान्तिमिदं मतं॥ 2021
शशिवर्णमिहाकालं नन्दीशं पद्मरागवत्।
पुष्यरागमिदं शार्वं मृत्युञ्जयं सिद्धिपूजितम्॥ 2022

मौक्तिकाभं नीलनिभं रुद्राद्यैः प्रपूजितम्।
गुह्यकैः) वसुदैत्येन्द्र - क्षेश गुह्यगैर्यातुधानकैः॥ 2023
नानावर्णं लोकवर्णं अब्जनीलोत्पलप्रभं।
इत्येते लक्षणं प्रोक्तं परीक्ष्य तत्वकोविदैः॥ 2024
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते।
तदा बाणं समाख्यातं शेषं पाषाणसंभवं॥ 2025
नद्यां वा प्राप्तिपेद्भूयो यदा तदुपपद्यते।
बाणलिंगं तदा विद्धि शेषं दुःखाप्यमं भवेत्॥ 2026
पङ्कजं जम्बूफलाकारं कुमुदाकारमेव वा।
कुक्कुटाण्डसमं लिंगं गोस्तनाकारमुत्तमं॥ 2027
अन्ये बाणं समाख्याति यन्ना बाणमलादिषु।
बाणस्सदाशिवो बाणो बाणो बाणासुरोऽपिवा॥ 2028
बाणलिंगमिति।
तेन तस्मै कृतं लिंगं बाणलिंगमुदाहृतं।
कर्कशे बाणलिंगे तु पुत्रदारक्षयो भवेत्॥ 2029
छिद्रपीठे पूजिते तस्मिन् भृंगाभं रोगवत्तदा।
एकपार्श्वक्षते चेनु पुत्रदारधनक्षयः॥ 2030
शिरसि स्फुटिते बाणे व्याधि मरणमेव वा।
अन्यजातिविलग्ने तु सर्वगोत्रक्षयो भवेत्॥ 2031
चित्रलिंगे चार्चिते बाणे विदेशगमनं भवेत्।
~~चिते बाणे विदेश~~
लिंगे च कर्णिकां दृष्ट्वा व्याधितो जायते पुमान्॥ 2032
अर्च्यं स्यात् कपिलं लिंगं मुनीनां मोक्षकरं हितं।
(P.2.102) लब्ध्वा कपिलं लिंगं गृही नैवार्चयेत्क्वचित्॥ 2033
तीक्ष्णाग्रं वक्रशीर्षं च त्र्यश्रलिंगं विवर्जयेत्।
अतिस्थूलमतिकृशं स्वल्पं स्वल्पनान्वितम्॥ 2034
गृही विवर्जयेत्तादृक् तन्मुमुक्षो यतेर्मतं।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम्॥ 2035
तत्सपीठमपीठं वा मन्त्रसंस्कारवर्जितम्।
सिद्धिमुक्तिप्रदं बाणं सर्वप्रासादपीठकम्॥ 2036
बाणलिंगं यदा हस्ते तदौ सुषुम्नकं वहेत्।
त्रिपञ्चसप्तवारं वा कलासाम्यं न जायते॥ 2037

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बव्य) तदा बाणं समाख्यातं शेषं पाषाण वर्जयेत्।
नद्यां वा प्रक्षिपेच्छ्रयो यद्वानदुपलभ्यते ॥ 2038
तदा बाणं समाख्यातं मनोवाक्क्लेशदायकं।
स्थूलं शिरः कृशं पादं उन्नतं तु मुखं भवेत्॥ 2039
दत्तवान् लिंगकोटीनां चतुर्दशमहेश्वरः।
तानि संपूज्य कालांते बाणश्चैत्तेषु विन्यसेत्॥ 2040
महेन्द्रे मलये सह्ये नेपाळे वारिपात्रके।
सालग्रामे तु श्रीशैले कालिन्द्यां जठरेऽपि च॥ 2041
अन्यासां पुण्यसरितां जठरे तु विशेषतः।
इति कामिके बाणलिंग विधि पटलः॥ 2042

श्री तनुनाळेश्वराय नमः—

बाणशैव्यादि लिंगानां परिणाहेन विस्तृता।
तन्त्र्यंशेन समुच्छ्राय पिण्डिका नस्य भाजिता॥ 2043
नेत्रेणांघ्रि सुतल्पादि रूपेण युगळं गळः।
कर्णपट्टी तु रूपेण जलधारां करेण तु॥ 2044
व्यास[illegible]त्र्यंशेन नाळं स्यात्कचिद्दैर्घ्येन वामतः।
इति संक्षेपतः प्रोक्तं बाणलिंगलक्षणम्॥ 2045
सितलिंगे सिता रेखा रक्ता रक्ते प्रशस्यते।
पीतपीतं तथा ज्ञेयं कृष्णे कृष्णांतरा शुभा॥ 2046
अधमं चोत्तमं प्रोक्ता हीने वर्णोत्तमोत्तमा।
इन्द्रायुधं निभमुखा सर्ववर्णे प्रशस्यते॥ 2047
कृष्णे - - - - - - कदेति कीर्तिता।
महिषाक्षं च नाशासा माषमाहिषनासिवत्॥ 2048
पञ्चसूत्रमाह—
लिंगनाहसमपीठविस्तरं विस्तृतस्य शर-
वेद तुंगकं। तुंगकार्धमथ मुखायतं गोमुखं न- 2049
म न कर्णनाहकं।
लिंगहीने महोव्याधि नाळहीने धनक्षयं।
विस्ते) तुंगका~~[illegible]~~ गोमुखा~~[illegible]~~। रोगं स्यात्-॥ 2050
कर्णाधिक्ये तु कुक्षिरुक्। पीठाधिक्ये-
क्रियाश्चैव आयुश्री पुत्र नाशनम्॥ 2051

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

. . . . . . गोनाशं भार्यनाशं च . . . नाहकं।
p.2.103) अथो पीठविहीने तु भ्रातृणां नाशनं भवेत॥ 2052
स्फटिकलिंगलक्षणमाह—
वर्ज्यं कर्कशलक्ष कुब्जमगरुं स्थूलं शिखाग्रं-।
कृशम्। त्र्यश्रं दैर्घ्यं वितायलक्षण सुषुत्रा -॥ 2053
सन्न जातिवतम्। रेखा बिंदु कलंक शुक्ति-
चिपीडं लिंगत्स्फुरत्स्फाटिकं, पीठं वास्फटिकं-॥ 2054
सकर्णिकमिदं सर्वं मुमुक्षोः शुभम्।
यकारं लिंगमित्युक्तं पकारं नाळमेव च॥ 2055
शिकारमूर्ध्वपद्मं तु मकारं कर्णमुच्यते।
अथो पद्म नकारं तु वाक्षारं लिंगरूपकम्॥ 2056
आवाहयेत्ततो देवं सद्यो जातेन मंत्रतः।
स्थापयेद्वामदेवेन अघोरेण तु सन्निधिः॥ 2057
पुरुषेण निरोधं च ईशेन स्वागतं भवेत।
इति लिंगलक्षणविधिस्समाप्तः॥ 2058

शिवस्य लक्षणं समासात् शृणु षण्मुख।
शिवं परात्परं सूक्ष्मं नित्यं सर्वगमव्ययम्॥ 2059
अनिन्द्रितमनौपम्यं अप्रमेयमिहोच्यते।
तत्परं शिवमित्युक्तं परादूर्ध्वं परात्परं॥ 2060
सोमातीतं सुसूक्ष्मं हि नित्यं कारणशून्यकं।
व्यापं सर्वगतं प्रोक्तं अक्षीणमव्ययं भवेत॥ 2061
अप्रमेयमनाकारं अदृश्यंत मनोपमम्।
प्रमाणहतमित्युक्ताद प्रमेयमिति स्मृतम्॥ 2062
निष्कल्व ज्ञाद्विशेषेण त्व नाम यमिति स्मृतं।
इत्येतैर्लक्षणैर्युक्तं शिवरूपमिहोच्यते॥ 2063
सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणं।
योगिनामुपकाराय स्वेच्छया चिन्त्यते शिवं॥ 2064
तच्छिवस्य पराशक्तिः सहस्रांशेषु जायते।
तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः॥ 2065
आदिशक्तिसहस्रांशे इच्छाशक्तिसमुद्भवः।
तस्मिन् शक्तौ सहस्रांशे ज्ञानशक्तिसमुद्भवः। 2066

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ज्ञानशक्ति सहस्रांशे क्रियाशक्तिसमुद्भवः।
एताश्च शक्तयः पञ्च निष्कलाश्चेति कीर्तिताः॥ 2067
दं) शिवसृष्टिरिति प्रोक्तं शक्तीनां सृष्टिरुच्यते।
योगिनां च यतीनां च ज्ञानिनां मन्त्रिणां तथा॥ 2068
ध्यान पूजानिमित्ताय निष्कलं सकलं भवेत्।
प्रथमं शिवसादाख्यं अमूर्तन्तु द्वितीयकम्॥ 2069
तृतीयं मूर्तिसादाख्यं चतुर्थं कर्तृनामतः।
पञ्चमं कर्मसादाख्यं पञ्चसादाख्यमुच्यते॥ 2070
सदाशिवं च ईशं च ब्रह्मचैवेश्वरस्मृतं।
ईशानश्चैव विज्ञेयो तत्त्वभेदा प्रकीर्तिताः॥ 2071
(P.2-104) शिवः सदाशिवो ज्ञेयो मूर्तिरीशानमुच्यते।
मूर्तिब्रह्ममिति प्रोक्तं कर्ता वैश्वेश्वरः स्मृतः॥ 2072
कर्मभीशानमित्युक्तं इत्येवं हि द्विधा भवेत्।
परात्परं परं चैव सूक्ष्मात्सूक्ष्ममेव हि॥ 2073
स्थूलं चैव तु सूक्ष्मं हि शिवादि- रिलक्ष्यते।
एतेषु पञ्चतत्त्वेषु विशेषमधुनोच्यते॥ 2074
तत्त्वमूर्तिप्रभावं चात्र भेदं विद्यते क्रमात्।
शिवादि तत्त्वमित्युक्तं ~~इत्येवं परिलक्ष्यते~~॥ 2075
मूर्तिं सदाशिवादयः॥
तयोर्योगेन तद्रूपं तद्रूपं भावमुच्यते॥
भावं सादा~~शिवा~~ख्यमित्युक्तं इत्येवं परिलक्ष्यते॥ 2076
सन्ततं शिव भावत्वात् सादाख्यमिति कीर्तितं।
निष्कलं देहरहितं सकलं देहमुच्यते॥ 2077
देहि देहस्य संबन्धात् भावरूपमिति स्मृतम्।
सर्वेषां ज्ञानपूजार्थं सकलं निष्कलं भवेत्॥ 2078
पञ्चसादाख्य तत्त्वं तु .... स्थूलरूपकम्।
एवं ज्ञात्वा विशेषेण सर्वकार्यं समाचरेत्॥ 2079
एषां वर्णं च रूपं च समासाच्छृणु षण्मुख।
शान्त्यातीता परा शक्तिः तस्या पर्यायवाचकः॥ 2080
परा - - - - - ... सादाख्य संभवं।
पराशक्त्युद्भवा ... उत्वाच्चिव मुच्यते॥ 2081
तद्रूपं सूक्ष्ममित्युक्तं ... प्रयोदीरितस्मृतं।
विद्युद्रूपमिवाकाशे प्रत्यक्षं सर्वतो ....॥ 2082

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

. . . . तत्त्वानामखिलालयम्।
. . . . . मेवोक्तं अमूर्तेश्च तथैव च॥ 2083
. . . . . शांति च तस्याः पर्यायवाचकाः।
आदिशक्ति दशांशेन अमूर्तिस्तु समुद्भवम्॥ 2084
. . . . अमूर्तत्वादमूर्तश्चेति कीर्तितम्।
अमूर्तत्वात् कला हीनं तद्रूपं लिंगवद्भवेत्॥ 2085
सूर्यकोटिप्रतीकाशं ज्योतिस्तंभाकृतिर्भवेत्।
तस्याश्चान्तर्गतो मूर्तिः मूर्तितत्त्वादिगोचरं॥ 2086
एतद्वै दिव्यलिंगं तु मूलस्तंभमिहोच्यते।
लिंगे वै सर्वमुत्पन्नं वयं तत्रैवचोच्यते॥ 2087
अमूर्तिरिति विख्याता समूर्तिं तु तथा शृणु।
इच्छाशक्तिश्च विद्या च तस्याः पर्यायवाचकः॥ 2088
तच्छक्तेस्तु दशांशेन यथा मूर्तिरिहोच्यते।
इच्छा मूर्तिगुणत्वाच्च तस्मान्मूर्तिरुदाहृता॥ 2089
P. L. 105) मूर्तित्वात् कलायुक्तं रूपं चेति प्रकीर्तितम्।
ज्वालाग्निसदृशाख्यादिव्य लिंगाकृतिर्भवेत्॥ 2090
तस्याश्चैक भागे तु एकवक्त्रेण संयुतम्।
त्रिणेत्रं चारुवदनं सर्वावयव संयुतं॥ 2091
द्विहस्तं च द्विपादं च सर्वलक्षण संयुतं।
दक्षहस्तेन शूलं च वामहस्ते कपालकम्॥ 2092
सर्वावयवसंयुक्तं सर्वाभरणभूषितम्।
सर्वज्ञानगुणोपेतं लिंगमूर्तिरुदाहृतम्॥ 2093
मूर्तिसादाख्यमेवोक्तं कर्तृसादाख्यमुच्यते।
ज्ञानकर्तृस्वभावत्वात् कर्तृनामेति कीर्तितं॥ 2094
ज्ञान स्फटिक रूपत्वात् स्फटिकाभं तदुच्यते।
दिव्यलिंगं महादीर्घं महास्थूलं तथोचितम्॥ 2095
तस्य मध्यस्थितं मूर्ति राशेः कारणम्।
चतुर्मूर्धा चतुर्वक्त्रा नेत्रद्वादशान्वितम्॥ 2096
चतुरस्रं चतुर्नासि वसुश्रोत्र समन्वितम्।
अष्टहस्तं द्विपादं च सर्वलक्षणसंयुतम्॥ 2097
त्रिशूलं परशुं खड्गं अभयं दक्षिणे करे।
पाशं नागं च घण्टां च वरदं वामहस्तके॥ 2098

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वालंकारसंयुक्तं सर्वाभरण भूषितम्।
एवमेव परोपेतं लिंगाकारमिहोच्यते॥ 2099
कर्तृसादाख्यमेवोक्तं कर्मसादाख्यमुच्यते।
लिंगं शंभुरिति ज्ञेयं पीठं शक्तिरुदाहृता॥ 2100
६य) बिंदुमध्यगतं तत्वं तत्वमध्ये गतश्शिवः।
तस्माच्छिवमयं लिंगं सर्वतत्वालयं स्मृतम्॥ 2101
लिंगे तु जायते तत्र जगत्स्थावरजंगमम्।
तस्माल्लिंगं विशेषेण कर्मरूपमुदाहृतम्॥ 2102
कर्मोदये तु सृष्टिस्स्यात् क्रिया कर्म इतिर्भवेत्।
एतत्कर्मेशरूपं च सृष्टिस्थितिलयावहम्॥ 2103
पञ्च सादाख्य संयोगात् कर्मसादाख्यमुच्यते।
शिवसादाख्य भेदेन शिवरूपं समाश्रितम्॥ 2104
अमूर्तिस्तु स्वभावेन शिवसादाख्यमाश्रितं।
मूर्तिरूपे विशेषेण त्वमूर्त्यादीन् समाश्रितं॥ 2105
कर्तृसादाख्य मूर्तिं हि रूपे मूर्तिं क्षिप्यां विदुः।
कर्मरूप क्रमेणैव कर्तादिवसमाश्रितम्॥ 2106
प्रतिवक्त्रं क्रमेणैव एकैकं तु समाश्रितं।
P. 2. 106) स्मृ) तस्मात्कर्मस्वरूपं च मूर्त्यादिराश्रितां विदुः॥ 2107
सर्वतत्वात्मकं रूपं सर्वाधारमिति श्रुतं।
तत्वे तु मूर्तिपिण्डत्वात् पिण्डाकारमुदाहृतम्॥ 2108
पिण्डस्थं पिण्डमध्यस्थं पिण्डेन तु पुटीकृतं।
पिण्डेन पिण्डितं पिण्डं पिण्डरूपमिहोच्यते॥ 2109
एतच्छिवमयं पिण्डं सर्वतत्वमयं विदुः।
पञ्चमूर्त्तिं पञ्चवक्त्रं पञ्च तत्वात्मके विदुः॥ 2110
मूर्तीनां मूर्ति देहेन गुणपञ्चात्मकैर्युतम्।
ना देहे तु समासेन सर्वतत्वान्यसंभवान्॥ 2111
तस्य वक्त्रे तु संक्रान्ता सिद्धांता जानि शिवं विदुः।
सर्वज्ञानमयं देवं सर्वकारणकारणम्॥ 2112
स्यात्) एवं लिंगे तु कर्मस्यात् निष्कलं सकलं शिवं।
देहस्थं सकलं ज्ञेयं निष्कलं देहवर्जितम्॥ 2113
देहं यात्र कलोपेतं धातुभेदमिति स्मृतम्।
तत्करादिच तुर्याश्च सुसूक्ष्मे तु प्रकल्पयेत्॥ 2114

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वांगिरिच संपूर्णं सर्वावयव संयुतम्।
एवं तु स्थिति मात्रेण मूर्ति सकलरूपभृक्॥ 2115
भावे तु लिंगपीठे तु . . . . सकलं निष्कलं।
स्रौ . . . . . . स्थितं देहे मांसोऽस्थि रुधिरं न हि॥ 2116
इन्द्रचापमिवाकाशे दर्पणे प्रतिबिंबवत्।
इत्येवं मनसा कल्प्य निष्कलं सकलं भवेत्॥ 2117
. . . .।
शक्तिमाया सवर्णांच नादं संभृतिरेव च॥ 2118
एते दश गुणा प्रोक्ता तेषां लक्षणमुच्यते।
त्रिगुणं शूलमित्युक्तं शक्तिपरशुमुच्यते॥ 2119
खड्गमीशप्रतापोऽयं अभेद्यं वज्रमिष्यते।
ईशस्यानुग्रहं चैवं अभयं तु प्रशस्यते॥ 2120
शक्तिस्स्यान्नागरूपं च पाशं माया स्वरूपकं।
विपर्णमंकुशं चैव घण्टानादात्मकं विदुः॥ 2121
संभारमग्निरूपं चैव पाशानां यस्य सत्कृतिः।
एतैर्वा गुणरूपं च सांगं चेति प्रकीर्तितम्॥ 2122
अङ्गभावमिति प्रोक्तं तस्य रूपमिहोच्यते।
कुन्देन्दु स्फटिकाभासं जटामकुटमण्डितं॥ 2123
पञ्चवक्त्र समायुक्तं पञ्चवर्णसमन्वितम्।
दशबाहुः . . . तद्वद्द्विपादं पद्मसंहितम्॥ 2124
शूलं परशुखड्गौ च वज्रं चाभय दक्षिणे।
पाशमंकुशं चैव घण्टा वह्निश्च वामके॥ 2125
P.2-87) सर्वलक्षण संयुक्तं सर्वाभरण भूषितम्।
दिव्यांबरधरं देवं ऊर्ध्वबाहुं महोज्वलम्॥ 2126
दिव्यगंधानुलिप्तांगं दिव्यवस्त्रेण वेष्टितं।
शांतरूपमिदं प्रोक्तं विशेषमधुनोच्यते॥ 2127
कर्मेशं पूर्ववक्त्रं स्यात् कर्तृ तद्दक्षिणं भवेत्।
अपरं मूर्तिवक्त्रं स्यात् अमूर्तं चोत्तराननम्॥ 2128
ऊर्ध्वं तु शिवसादाख्यं पञ्चसादाख्यमुच्यते।
ईशानादीनि मूर्धानि सृष्टिरेवाकृति भवेत्॥ 2129
प्राग्वक्त्रं पूर्वसु दृष्टं पश्चिमायां तु पश्चिमं।
दक्षिणायां मुखं याम्यं उत्तरायां तथोत्तरे॥ 2130

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं पञ्चात्म तत्वाञ्च सर्वकारण कारणम्।
लिंगरूपमिदं प्रोक्तं इति शास्त्रस्य निर्णयम्॥ 2132
एतत्तत्वे कर्मरूपत्वात् कर्मकर्मेति कारयेत्।
कर्मादीनि कलादीश्च कर्मचेति निगद्यते॥ 2133
तस्माद्वै स्थापनादीनि कर्म कर्मेति कारयेत्।
लिंगे वा स्थण्डिले वापि मण्डले हृदयेऽपिवा॥ 2134
ध्यात्वा सदाशिवं पूज्य विधिवत्स्थापनं कुरु।
कर्तादीनां च कर्मौ तु स्थापनादीनि कारयेत्॥ 2135
योगिनां मंत्रवत् ज्ञेयं वक्त्र देव भर्ग विदुः।
एतैश्च लक्षणैर्युक्तं कर्म सादाख्य मुच्यते॥ 2136
शिवादि कर्मपर्यन्तं क्रमेण परिकीर्तितं।
सादाख्य लक्षणं प्रोक्तं महेशं शृणु तत्वतः॥ 2137
कर्मेशस्य सहस्रांशो महेशस्य समुद्भवः।
महेशं सकलं विद्यात् सृष्टि स्थिति लयात्मकं॥ 2138
पञ्चविंशति भेदानि तन्मूर्ति पञ्चविंशतिः।
पञ्चविंशति संप्रोक्तं एकवक्त्रं त्रिणेत्रकम्॥ 2139
एतच्छिवमयं पिण्डं रूपभेदमतः शृणु।
प्रथमं सोमधारीं च द्वितीय मुमयासह॥ 2140
तृतीयं तु वृषारूढं चतुर्थं नृत्त कारणं।
पञ्चमं विवाहमूर्तिं षष्ठं पाशुपतं तदा॥ 2141
गंगाधरं सप्तमं चैव अष्टमं त्रिपुरांतकं।
नवमं गौरि संबादं दशमं गौर्यनुग्रहं॥ 2142
उमया सहितं पश्चात् गुहोमा सहितं तथा।
त्रयोदश मुमासार्धं सुखासीनं चतुर्दश॥ 2143
कंकालं केशवार्धं च षोडशं त्रिपुरांतकं।
किरातं सप्तदशं चैव अर्धनारीश्वरं तथा॥ 2144
. . . . ।
भिक्षाटनं त्रयोविंशत् चतुर्विंशतिकालकं॥ 2145
P.L. 196) सुखासीन मुमाशांति पञ्चविंशति भेदकं।
महेशभेदकं प्रोक्तं रुद्रभेदमतः शृणु॥ 2146

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रोक्तं महेशभेदं तु रुद्रभेदं ततः परम्।
सहस्रांशं महेशस्य रुद्रोद्भवं ततः शृणु॥ 2147
चतुर्भुजं त्रिणेत्रं च जटामकुटमण्डितं।
ज्वालाग्निसदृशप्रख्यं गंगाशूलधरस्थितं॥ 2148
वरदाभयसंयुक्तं रुद्ररूपमिति स्मृतं।
तद्देवस्य सहस्रांशे ब्रह्माविष्णुसमुद्भवम्॥ 2149
तदत्र दक्षिणांशे तु ब्रह्मा भुक्तसृष्टिकारणम्।
तज्जीववामपार्श्वे तु विष्णुस्स्वामी तत्रैव च॥ 2150
आदित्यो दक्षिणे नेत्रे चंद्रो वै वामनेत्रके।
जातवेदो ललाटे आस्ये वेदास्समुद्भवाः॥ 2151
प्राणे वायुसमुत्पन्नो श्रोत्रे कृतयुगादयः।
गण्डे गणेशसंभूतो हृदये षण्मुखस्तथा॥ 2152
नाभौ वै द्वादशादित्या सर्वलोकऋषिसंज्ञकाः।
रुद्राश्चैव तु सर्वे वै पश्चात्स्त्रे क्षेत्रपालकम्॥ 2153
विद्यांगाश्चैव देवाश्च मूलाधारे समुद्भवाः।
कटिदेशेषु वसवो गुह्यदेशे भवादयः॥ 2154
ऊर्ध्वोश्चाश्विनौ जातौ तद्देशे तु समंगलौ।
धर्मादि धर्मदेवाश्च जठरे तु दशायुधाः॥ 2155
द्छुरिका बीजमुख्याश्च पादयोः पङ्कजस्तथा।
अङ्गिरक्षोगणास्सिद्धा नानाविद्यास्तथैव च॥ 2156
गंधर्वाश्चाप्सरसो चैव पादमूले समुद्भवाः।
अष्टाविंशति कोटयस्तु देवा रोमेषु चोद्भवाः॥ 2157
यत्स्थाने गण्येषां तत्स्थाने चलयं भवेत्।
तत्वानामासनं तत्र तच्चिह्नाकृतिरुच्यते॥ 2158
स शिवे प्रणिपातस्तु प्रणवस्सर्वकारणम्।
रुद्रो ब्रह्मादि देवोऽयं ईश्वरस्थितिचेश्वरम्॥ 2159
शिवात्सदाशिवो भूतं तस्माच्चैव महेश्वरः।
महेश्वरो शिवो रुद्रो रुद्रो विष्णुसमुद्भवाः॥ 2160
विष्णोर्ब्रह्मा समुद्भूतः कृत्वा देवैस्समुद्भवः।
तस्माद्वै देवतादीनां शृणुष्व कनकार्जुन॥ 2161
शिवस्य लक्षणं प्रोक्तं शैवोत्पत्तिविधिं शृणु।
इति रौरवे महातंत्रे पञ्चसादाख्य विधिपटलः॥ 2162

आगमांतरे पञ्चसादाख्यस्वरूपमाह—
प्रथमं शिवसादाख्यं मूर्तन्तु द्वितीयकम् ॥ 2163
तृतीयं मूर्तिसादाख्यं चतुर्थं कर्तृनामतः ॥
पञ्चसादाख्यमुच्यते ॥
P. 2.79) **स्वयंभुः** शिवसादाख्यं मूर्तं बाणलिंगकं ॥ 2164
अर्हंतु मूर्तिसादाख्यं दैविकं कर्तृनामतः ।
स्थापितं कर्मसादाख्यं पञ्चसादाख्यमुच्यते ॥ 2165
सद्योजातकलाचाष्टौ वामदेवे त्रयोदश ।
अघोरस्य च कलाचाष्टौ पुरुषस्य चतुष्कलौ ॥ 2166
सद्योजातकलाचाष्टौ वामदेवे त्रयोदश ।
ईशानस्य कलाः पञ्च अष्टत्रिंशत्कलाः स्मृताः ॥ 2167
अष्टत्रिंशत्कलान्यासं विधिना कारयेत्ततः ।
पञ्चकं पञ्चवक्त्रेषु हृदये कण्ठद्वयांसकौ ॥ 2168
उदरे नाभिपृष्ठे च गुदरस्याघोरमष्टकं ।
गुदे लिंगे च ऊरू द्वे जानु द्वे द्वयजंघयोः ॥ 2169
बीजद्वये च कण्ठे च पार्श्वके त्र त्रयोदश ।
पादद्वये च पाणि द्वे नासिका शिरसिबाहुकौ ॥ 2170
इत्यष्टत्रिंशत्कलान्यासविधिः ।

दीक्षया मुच्यते मुच्यते देही त्रिविधाज्ञावबंधनात् ।
सा दीक्षा विसंशोध्य सचाध्वा षड्विधस्मृतः ॥ 2171
वर्णास्तु भुवनैर्व्याप्ता तत्त्वैर्व्याप्तानि तानि च ।
कलाभिस्तानि तत्त्वानि इह कला क्रमात् ॥ 2172
शोध्यजीय विभाव्यैवं पञ्चपञ्चाध्वगर्हिता ।
निवृत्तिश्च प्रतिष्ठा च विद्याशांतिश्च नामसि ॥ 2173
व्याप्तानि कर्णता लुभ्र ब्रह्मरंध्रां विधिक्रमात् ।
निवृत्तौ पार्थिवं तत्त्वं चिन्त्यमेकं क्षमक्षरम् ॥ 2174
कालाग्निप्रभृतीनां च पुरमष्टोत्तरं शतम् ।
अन्यत्पादान्महादेव पादावधि विलोमतः ॥ 2175
व्योमव्यापि पदान्यष्टाविंशतिः परिसंख्यया ।
सद्योजातश्च हृदयं द्वौ मंत्रौ परिकीर्तितौ ॥ 2176
गुणागंधादिशब्दान्ता पञ्चब्रह्मा च कारणे ।
प्रतिष्ठायां पदानि त्रयोविंशति संख्यया ॥ 2177

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

~~सद्योजातश्च हृदये~~
प्रकृत्यंतानि तत्वानि ज्ञातव्यानि स्वभावतः।
त्रयोविंशति वर्णाश्च हादिदान्ता विलोमतः॥ 2178
मंत्रा पदैश्च वर्णैश्च तानि व्याप्तानि सर्वतः।
ज्ञातव्यान्यमरेशादि षट्पञ्चाशत्पुराणि तु॥ 2179
महेश्वराख्यव्यंतः पदानामेकविंशतिः।
शिरोवामश्च मंत्रौ द्वौ चत्वारस्तु गुणा मताः॥ 2180
रसादिश्शब्दपर्यन्ता . . . . रणम्।
विद्यायां सप्त तत्वानि पुरुषा . . . . . . दि॥ 2181
. . . भुवनानां च विज्ञेया सप्तविंशतिः – ।
ध्याना . . . . . व्यापि रिति पदादितः॥ 2182
पदानां विंशतिर्मन्त्रौ शिवाघोरौ व्यवस्थितौ।
अकारादि चकारांता वर्णाश्च सप्तविंशतिः॥ 2183
. . . . . . वस्पशाश्च शब्दाश्च गुणा रुद्रस्तु कारणं।
(P.L. 110) शांतौ तु त्रीणि तत्वानि विद्येश्वर सदाशिवाः॥ 2184
गखकाश्च त्रयो वर्णाः मन्त्रौ वक्त्रौ तनुच्छदौ।
वाममाख्या पुराण्यष्टौ दशैव परिसंख्यया॥ 2185
दी) नित्ययोगिनि इत्यादिन्यैका दश पदानि च।
व्योम व्यापीनि इत्यंतान्युक्तानीह विलोमतः॥ 2186
गुणशब्दश्च शब्दौ द्वौ ईश्वरस्तत्र कारणम्।
शान्त्यातीत कलायां तु शिवतत्वं व्यवस्थितम्॥ 2187
निवृत्यादि पुरा ण्यत्र भवन्ति दशपञ्च च।
ओमित्येकपदं मंत्रं मंत्रेशान शिवास्त्रगः॥ 2188
विसर्गाद्या अकारांता वर्णाष्षोडश कीर्तिताः।
भवत्येको गुणाश्शब्दः कारणं तु सदाशिवः॥ 2189
इत्यध्वानं विचिन्त्याथ षडध्यापिनी परा।
इयत्ताया समादेशः कथ्यते ते विभागशः॥ 2190
सद्यो वामस्तथा घोरो पुरुषेशान इत्यिवः।
शिखावर्मास्त्र मूलं च मंत्राध्वा समुदीरितः॥ 2191
ओं व्योम व्यापिने व्योमरूपाय – सर्वव्यापिने –
शिवायानंताय – अनाथाय – अनाश्रिताय –॥ 2192

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्रुवाय - शाश्वताय - योगपीठसंस्थिताय
नित्ययोगिने ध्यानहराय - ओं नमश्शिवाय - ॥ 2193
सर्वप्रभवे शिवाय - ईशानमूर्धाय - तत्पु-
रुषवक्त्राय - अघोरहृदयाय - वामदेवगु- ॥ 2194
ह्याय - सद्योजातमूर्तये - ओं नमो नमः -
गुह्यादिगुह्याय, गोप्त्रे - अनिधनाय - 2195
सर्वयोगाधिकृताय - ज्योतिरूपाय - पर-
मेश्वरस्थवराय - अचेतनाचेतन व्योमिन् - 2196
व्योमिन् - व्यापिन् व्यापिन् - अरूपिन् - अरू-
पिन्। प्रथम प्रथम तेजस्तेज - ज्योतिज्योति - 2197
अरूप - अनग्नि अधूम - अभस्म - अनादे -
नानानाना - धू धू धू धू - ओं भूः ओं भुवः ओं - 2198
सुवः, अनिधन - निधन, निधनोद्भव - शिव -
शर्व, परमात्मन् महेश्वर, महादेव, सद्भावेश्वर - 2199
महातेज, योगाधिपतये - मुञ्च मुञ्च - प्रथम -
प्रथम, शर्व - शर्व - भव - भव - भवोद्भव - सर्व - 2200
भूत - सुखप्रद - सर्वसान्निध्यकर - ब्रह्मविष्णु -
रुद्ररूपपर - अनार्चितार्चित - असुतास्तुत - 2201
पूर्वस्थित पूर्वस्थित - साक्षि साक्षि कुरु कुरु।
पतंग पतंग - पिंग - पिंग - ज्ञान ज्ञान शब्द शब्द - 2202
सूक्ष्म सूक्ष्म - शिव - सर्व सर्वद - ओं नमश्शिवाय -
ओं नमो नमः। शिवाय नमो नमः। ओं दाका - ॥ 2203
इीति पदैरेवं पदाद्वा परिकीर्तितः। अकारा-
दि क्षकारांता वर्णाद्विवा समुदाहृताः। 2204
कालग्निरुद्र कूश्माण्डहाटकं ब्रह्मवैष्णवं।
रौद्रश्च भुवनाभ्यंतब्रह्माण्डस्य स्थितानिषडु ॥ 2205
कपाली शाहवजो बुद्धो वज्रदेह प्रमर्दनः।
विभूतिरव्ययश्शास्ता पिनाकी त्रिदशाधिपः॥ 2206
अग्निरुद्रो हुताशश्च पिंगलः खादको हरः।
ज्वलनो दहनो बभ्रुनु भस्मांतकक्षयांतक॥ 2207
याम्यो मृत्युहरो धाता विधाता च तथापरः।
कर्ता योक्ता च धर्मो धर्मपतिस्तथा॥ 2208

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निरृतिर्मारिणो हन्ता क्रूरदंष्ट्रो भयानकः।
ऊर्ध्वकेशो विरूपाक्षो धूम्रलोहितदंष्ट्रिणः॥ 2209
बलश्चातिबलश्चैव पाशहस्तो महाबलः।
श्वेतोऽथ जयभद्रश्च दीर्घबाहुर्जलान्तकः॥ 2210
मेघनादस्सुनादश्च दशमः परिकीर्तितः।
शीघ्रो लघुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः॥ 2211
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः।
निधीशो रूपवान् धन्यस्सौम्यदेहो जटाधरः॥ 2212
लक्ष्मीधृक् रत्नधृक् श्रीधृक् प्रसादश्च प्रकामः।
विद्याधिपेशो सर्वज्ञो ज्ञानभृद्वेदपारगः॥ 2213
सुरेश सर्वज्येष्ठश्च भूतपालो बलिप्रियः।
वृक्षो वृषधरोऽनन्तः क्रोधनो मारुताशनः॥ 2214
ग्रसनो दुंबरी शौच फणीन्द्रो वज्रदंष्ट्रिणौ।
शंभुर्विभुर्गणाध्यक्षः त्र्यक्षः त्रिदशेश्वरः॥ 2215
संवाहश्च विवाहश्च नभो लिपुस्त्रिलोचनः।
वीरभद्रो भद्रकाली सर्वोर्ध्वे भुवनत्रयम्॥ 2216
कपालीशादयः प्राच्यां अग्निरुद्रादनले।
याम्याद्या दक्षिणे भागे शीघ्राद्या वायुगोचरे॥ 2217
उत्तरेशानि इशाद्या ईशो विद्याधिपादयः।
वृषादयस्त्वधो भागे शंभुमुख्यास्त्वधोर्ध्वतः॥ 2218
P. 2.102 ब्रह्माण्डस्य बहिर्देशे दशदिक्षु व्यवस्थिताः।
एवं कालाग्निमुख्यानां पुराणां परिसंख्यया॥ 2219
निवृत्त्याख्यकलायां तु ज्ञेयमष्टोत्तरं शतं।
अमरेश प्रभासं च नैमिशः पुष्करोऽषाढः॥ 2220
मुण्डस्तथा भारभूतिश्च लगुलीश्वरः।
हरिश्चन्द्रोऽथ श्रीशैलो जल्पेशाम्रातिकेश्वरौ॥ 2221
मध्यमेशो महाकालो केदारो भैरवस्तथा।
गयाञ्चैव गुरुक्षेत्रो नाखलो नखलस्तथा॥ 2222
विमलेशोऽट्टहासश्च महेन्द्रो भीमकेश्वरः।
पादो रुद्रकोटिरविमुक्तोऽथ महाबलः॥ 2223

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गोकर्णो भद्रकर्णश्च स्वर्णाक्षस्थाणुरित्यपि।
पिच्छकण्ठो ह्विरण्डश्च माकोटी मण्डलेश्वरः॥ 2224
कालांजनश्शंकुकर्णः स्थूलेश्वरः स्थलेश्वरः।
पैशाचं राक्षसं याक्षं गान्धर्वं चैत्रमेव च॥ 2225
सौम्याश्चैव तथा ज्ञेया प्राजेशं ब्राह्ममष्टकं।
अकृतश्च कृतश्चैव भैरवं ब्राह्मवैष्णवम्॥ 2226
कौमारं च तथा चौमं श्रीकण्ठं चाष्टमं तथा।
अमरेशादि चाष्टत्वे हरिश्चंद्रादि तत्त्वसि॥ 2227
गयादिवायुतत्वे च व्योम्नि वस्त्रापथादि च।
चगण्डा... ...शेषं... चात्मं मंत्रस्थितं॥ 2228
प्रकृतावकृताद्येव षट्पञ्चाशत्पराणि च।
ज्ञातव्यानि प्रतिष्ठायां अमरेशादिनामभिः॥ 2229
वामे हि तथोग्रश्च भवेशानेकवीरकाः।
प्रचण्डो मापतिश्चाजोऽनंतश्च शिवदावच॥ 2230
क्रोधश्चण्डेश्वरः ज्योतिः संवर्तश्शूरकस्तथा।
पञ्चान्तकैकवीरौ च शिखेदश्चामरस्तुतिः॥ 2231
वामदेवो ध्रुवश्चैव भवश्चाप्येकपिंगलः।
एकेक्षणस्तथेशानः तथैवांगुष्ठमात्रकः॥ 2232
वामादि पुरुषे रागे पञ्चाण्डादि तु पञ्चगम्।
मायिने) नियत्यादिषु क्रोधादि महाद्युत्यादि मायिये॥ 2233
वामादीनां पुराणां तु विद्यायां सप्तविंशतिः।
वामाज्येष्ठा च रौद्री च काली कलविकारिणी॥ 2234
p. 2-103 बलविकरणी चैव बलप्रमथिनीत्यपि।
सर्वभूतदमन्यैव मनोन्मनीत्यनिन्दकः॥ 2235
सूक्ष्मं शिवोत्तमं चैकनेत्ररुद्रस्त्रिमूर्तयः।
श्रीखण्डं च शिखण्डी च तथैवान्यः सदाशिवः॥ 2236
वामादीनि विद्येश सदेशेषु स्थितानि च।
..पशांतौ वामादिमुख्यान्यष्टादशभुवनानि तु॥ 2237
निवृत्तिश्च प्रतिष्ठा च विद्याशांतिस्तथैव च।
शान्त्यातीतेऽन्धिका चैव दीपिका रोचिका तथा॥ 2238
मोचिका चोर्ध्वगा चैव व्यापिनी व्योमरूपिणी।
अनंता चाप्यनाथा च अनाश्रिता च तथा परा॥ 2239

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निवृत्यादीन्यतीतायां पुराणि दश पञ्च च।
एवं पञ्च कलापत्ति भुवनानां शतद्वयम् ॥ 2240
चतुर्विंशोत्तरं सुक्तं भुवनाध्वनि वर्णितः।
अत्र तत्वानि षट्त्रिंशत् पृथ्व्यं तेजोमरुद्वियत् ॥ 2241
गंधो रस रूपस्पर्शौ शब्दोपस्थौ च पायुश्च।
पादौ पाणी च वाङ्नासा जिह्वा च चक्षुस्त्वचः श्रुतिः ॥ 2242
मनोऽहंकार बुद्धिश्च प्रकृति पुरुषस्तथा।
रागो नियति विद्येच कलाश्च कालाश्च मोहिनी ॥ 2243
विद्या च सादाख्याशक्ति शिव इति स्मृतः।
निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथा परा ॥ 2244
अतीतेति कला विडि समदेश षडध्वनः।
इति दीक्षाविधिस्समाप्तः— 2245
श्री तन्त्रनालेश्वराय नमः।
नाभौ च हृत्फलौ च मूर्ध्नि पञ्चकला न्यसेत्।
मूर्ध्नि पञ्च चतुर्वक्त्रे ललाटे नेत्रयोर्द्वयोः ॥ 2246
कर्णद्वयोः णपाश्वे तु गंधौ एद्वितयोरपि।
दन्ते च शीर्ष शिबुके जिह्वे च तालु मूलके ॥ 2247
ण्ठे) कर्णे च हृदये चैव स्तनौ द्वौ नाभि देशके।
स्फिग्द्वये नाभिदेशे च पायौ बीजद्वयेन तु ॥ 2248
आधारे दक्षिणांसे वा संध्योग्रे चांगुलेन च।
पर्वे च तलमध्ये च तलपृष्टे च विन्यसेत् ॥ 2249
देशके। वामबाहु च दोसल्या अग्रे चांगुल पर्वयोः।
तलमध्ये च पृष्टे च विन्यसेत्तु विचक्षणः ॥ 2250
पादसन्द्वयौ च चांगुल्ये पादांगुष्टे तलद्वये।
पर्वे च विन्यसेद्येवं षट्पञ्चार पुराणि च ॥ 2251
अतःथा प्रतिष्ठायां अमरेशादि नामभिः।
वामभीमस्तथोग्रश्च भवेशानेकवीरकः ॥ 2252
प्रचण्डो मापतिश्चाजो ऽनंतो शिव एव च।
कु) क्रोधश्चण्डो क्षितिश्चैव संवत्सर एव च ॥ 2253
पञ्चान्त कैकवीरौ च शिवेदश्च महाद्युतिः।
P.L-104) वामादीनां पुराणां तु विद्यायां सप्तविंशतिः ॥ 2254
वामा ज्येष्ठा च रौद्री च काली कल विकारिणी।
बलविकरणी चैव बल प्रमथिनीत्यपि ॥ 2255

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वभूतदमन्यैवं मनोन्मन्यनिदकः ~~मध्यनिनन्तेनम्~~।
सूक्ष्मशिवोत्तमश्चैकनेत्र रुद्र मूर्तयः॥ 2256
~~श्रीकण्ठश्च~~ शिखण्डी च तथैवान्यस्सदाशिवः।
वामादीनि विद्येश सदेशेषु स्थितानि वा॥
पश्चान्तो वामादि मुख्यानष्टा दश भुवनानि तु। 2257
निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथैव च॥ 2258
mistake शान्त्यातीतेऽन्धिकाचैव दीपिका रोपिका तथा।
मोचिका चोर्ध्वका चैव व्यापिनी व्योमरूपिणी॥ 2259
अनंता चाप्यनाथा च अनाश्रिता च तत्परा।
निवृत्यादीन्यतीयाँ पुराणि दश पञ्च च॥ 2260
~~शिखण्ड्या~~ शिखण्डी च तथैवान्य स्सदाशिवः।
वामादीनि तु विद्येश सदेशेषु स्थितानि च॥ 2261
शांतो वाम मुखाद्यष्टा दशैव भुवनानि च।
निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथैव च॥ 2262
शान्त्यातीतेऽन्धिकाचैव दीपिका रोचिका तथा।
मोचिका चोर्ध्वगाश्चैव व्यापिनी व्योमरूपिणी॥ 2263
अनंता च अनाथा च अनाश्रिता तथा परः।
निवृत्यादीन्यतीतायाँ पुराणि दश पञ्च च॥ 2264
निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथैव च।
शांत्यातीत कलापञ्च षडध्वा समुदीरिता॥ 2265
कला च भुवनं वर्णं मंत्रं च पदमेव च।
तत्वमेतत्समुद्दिष्टं स्थितिक्रममिहोच्यते॥ 2266
नाभौ च हृत् ~~कण्ठ~~ कालौ च मूर्ध्नि पञ्च कलान्यसेत्।
मूर्ध्नि पञ्च चतुर्वक्त्रे ललाटे नेत्रयोः द्वयोः॥ 2267
कर्णद्वये घ्राण पार्श्वे गण्डयो एद्वयोरपि।
दन्ते च शीर्षं चिबुके च जिह्वायाँ तालुमूलके॥ 2268
कर्णे च हृदये चैव स्तनौ द्वौ नाभि देशके।
स्फिक् द्वये गुह्यदेशे च पायौ वाजिद्वयेन च॥ 2269
आधारे दक्षिणांसे वा स्वंध्याग्रे चांगुलौ च ..।
पूर्वे च तन्मध्ये च तत्पृष्ठे च विन्यसेत्॥ 2270

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामबाहौच संध्यौ चांगुले पर्वदेशके।
तलमध्येच पृष्ठेच विन्यसेत्तु विचक्षणः॥ 2271
पादसन्ध्ये च चांगुल्ये पादांगुष्ठे तलद्वये।
पर्वेच विन्यसेत् पाद वामसंध्याग्रमेव च॥ 2272
चांगुल्ये तलपृष्ठे च पर्वमध्ये च विन्यसेत्।
कटिद्वये पार्श्वयोश्च हंसपाली द्वयेऽपि च॥ 2273
पिठरे जठरे मेढ्रे बाहौ च कूर्परद्वये।
जत्रु शंखद्वये चोरू मूलमध्ये तदग्रके॥ 2274
जानुद्वये च जंघे च नासिकाग्रे कटिप्रिमध्ये-
द्वपद्वये॥ वर्म दं द्वभ्रुवोर्मध्ये कक्षद्वये विशेषतः॥ 2275
P. 2. 115 मूर्धादि पादपर्यन्तं व्यापकं हस्तपादुके।
हृदयस्थितिसंख्या च भुवनानि च विन्यसेत्॥ 2276
मूर्ध्नि ललाटे चक्षुश्च कर्णयोश्च द्विगण्डयोः।
नास्यामोष्ठद्वयोश्चैव दन्तपङ्क्तिद्वयोरपि॥ 2277
जिह्वायां तालुरन्ध्रे च स्वरान् षोडशकान् न्यसेत्।
कवर्गं दक्षिणे हस्ते च वर्गं वामहस्तके॥ 2278
टवर्गं दक्षिणे पादे तवर्गं वामपादके।
पफौ पार्श्वद्वयोश्चैव पृष्ठे नाभौ च जाठरे॥ 2279
हद्वौ मूलौ रगाख्यौ वक्षौ हृदये रविच हस्तौ।
पादौ च ससस . . . र्व . . . प . . . द्वेकरान्यसेत्॥ 2280
मन्त्रन्यासमाह—मूर्ध्नि वक्षे च हृदये गुह्यपादे च-
विन्यसेत्। इच्छिरः चिबुका वर्म नेत्रास्त्रे विन्य- 2281
सेन्मनुम्। ब्रह्मांगं विन्यसेन्मंत्रं न्यासमित्युच्यते-
बुधैः। पदन्यासमाह- मूर्ध्नि नवपदं - 2282
न्यस्त्वा मध्यादि दिशासु च। ललाटे-
बिन्दुके नेत्रे द्वये श्रोत्र द्वयेऽपि च। नासिद्वये-2283
कपाले च मूर्ध्नि आस्ये च विन्यसेत्।
जिह्वे पादद्वये चैव करपत्संधि शाखयोः॥ 2284
श्रोत्रद्वये च पार्श्वे च हस्तपाद द्वयेऽपि च।
ऊरुजंघा द्वये चैव कोणे च शिरस्तथा॥ 2285

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बाहुद्वये च विन्यस्य व्योमव्यापि पदानितु।
तत्वन्यासमाह-
नाभौ च हृदये कर्णौ ललाटे मूर्ध्नि देशके॥ 2286
घ्राणे तु व्यापके जिह्वे पाणिश्रोत्रेरुपस्थके।
पायुं बाहुं च पाणिं च पांसनासौ जि चक्षुषि॥ 2287
व्यापकं श्रोत्रकं चैव हृदयस्य चतुर्दिशि।
मध्ये मूर्ध्नि च हस्ते च पादौ च हृदयेऽपि च॥ 2288
मूर्ध्नौ पञ्चस्व देशेषु तत्वं विन्यस्य बुद्धिमान्।
नाभौ हृत्कर्णपार्श्वे तु ब्रह्मरंध्रं यथाक्रमम्॥ 2289
निवृत्यादीन्यतीतायाँ कलाध्वा विन्यसेत्क्रमात्।
निवृत्तौ पार्थिवं तत्वं चिह्वयमेकं क्षमक्षरम्॥ 2290
कालाग्नि प्रभृतीनां च पुरमष्टोत्तरं शतम्।
अन्त्यात्पदात् महादेव पदान्यपि विलोमतः॥ 2291
व्योमव्यापि पदान्यष्टा विंशतिः परिसंख्यया।
P. 2. 116) सद्योजातं च हृदयं द्वौ मंत्रौ परिकीर्तितौ॥ 2292
गुणादि गंध्या शब्दांतं पञ्च ब्रह्मा च कारणम्।
प्रतिष्ठायां पदादीनि त्रयोविंशति संख्यया॥ 2293
हान्तीदान्तश्च ये वर्णा विलोमस्सुमुदीरितं।
प्रकृत्यंतानि तत्वानि ज्ञातव्यानि प्रगल्भता॥ 2294
ज्ञानव्यान्यमरेशादि षड्पंचाशत्पुराणि तु।
55) महेश्वरादि रूपान्ता पदानामेकविंशतिः॥ 2295
शिरो वामं च मंत्रौ द्वौ चत्वारस्तु गुणा मताः।
रसादि शब्द पर्यन्ता विष्णुरत्र च कारणम्॥ 2296
विद्यायां सर्वतत्वानि पुरुषादीन्यनुक्रमात्।
वामादि भुवनांतं तु विज्ञेया सप्तविंशतिः॥ 2297
ध्यानाहाराय पर्यन्ता व्यापिन्यान्यपदानि च।
पदानां विंशतिर्मन्त्रैः शिखाघोरेष्वरस्थितं॥ 2298
ञकारादि पकारांता वर्णास्सप्तविलोमकाः।
रूपस्पर्शौ स्वशब्दौ च गुणरुद्रस्तु कारणम्॥ 2299
शान्तौ तु त्रीणि तत्वानि विद्येश्वर सदाशिवः।
गकारं च त्रयो वर्णा मंत्र पत्र तन्दुच्छदौ॥ 2300

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वामादीनां पुराण्यष्टादश वै परसंख्यया।
निव्ययोगिन इत्यादि ईशाद्दशपदानि तु॥ 2301
व्योमव्यापिन इत्यंता निहत्यादि विलोमतः।
गुणास्तु स्पर्शशब्दं चादौ कारणमीश्वरं॥ 2302
शांत्यातीति कलायां तु तत्वद्वयमवस्थितं।
निवृत्यादि पराण्यत्र विपन्ति दशपञ्चच॥ 2303
ओमित्येकपदं मंत्रं अस्त्रेशानामिवास्त्रयं।
विसर्गाद्या अकारांता वर्णाष्टादश कीर्तिताः॥ 2304
भवत्येको गुणश्शब्दं मकारं तु सदाशिवम्।
इत्यध्वानं विचिन्त्याथ षडध्वा व्यापिनी परा॥ 2305
ध्यात्वा शक्तिं तमूर्ध्वे तु पाययेत्परमं पदम्।
आद्यंतं मंत्रमुच्चार्य समुच्चार्यमुदीरितम्॥ 2306
प्रणगध्वनिविन्यासं मन्त्रैकैकरणं जपेत्।
अध्वा पञ्चकलाविद्धि परस्परसुयोजयेत्॥ 2307
एवमध्वन विन्यासं देहे बिंबे घटे क्रिया।
नयेत्) अंगेषु अपूर्वविन्यस्त्वा बिंबे पञ्चकलान्न्यसेत्॥ 2308
परेप्येवं समभ्यर्च्य अध्वन्यासंत्रिधा स्मृतं।
षडध्वा लक्षणं प्रोक्तं कलाविधिक्रमेण॥ 2309
इति सूक्ष्मशास्त्रे षडध्वालक्षणपटलः।
P.2.117) आत्मार्थयजनं वक्ष्ये शृणुत्वं तत्प्रयत्नतः॥ 2310
आरोग्यमायुः कीर्तिंच विजयंच फलप्रदम्।
ब्रह्महत्तिविनाशार्थं वीरहत्तिविनाशनम्॥ 2311
गवां हत्तिविनाशार्थं पूजावृद्धिकरं परम्।
सर्वकामफलं प्रोक्तं सर्वयज्ञफलप्रदम्॥ 2312
आत्मार्थयजनं प्रोक्तं न भूतो न भविष्यति।
शुद्धं केवलसंमिश्रं आत्मार्थं त्रिविधं स्मृतम्॥ 2313
शुद्धं वा शक्तिरहितं केवलं शक्तिसंयुतम्।
सौरादि चण्डपर्यन्तं मिश्रं चैव प्रकीर्तितम्॥ 2314
प्रातरुत्थाय मनसा ललाटे भस्म लेपयेत्।
शिवध्यानपराणां च चिन्तयेद्भावयेच्छिवं॥ 2315

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ग्रामे
तस्माद्बहिर्गम्य विण्मूत्रं च विसर्जयेत्।
शौचमाचमनं चैव दन्ततालुं च शोधयेत्॥ 2316
स्नान तर्पणमेवोक्तं वैदिकं प्राङ्मुखं तन्तः।
उत्तराभिमुखो भूत्वा शैवसंक्षिप्तमाचयेत्॥ 2317
आर्द्रवस्त्रं परित्यज्य धौतवस्त्रेण वेष्टयेत्।
दक्षहस्ते जलं धार्य सेचयेत्कास्त्रं लिखेत्॥ 2318
आत्मशुद्धिरियं कृत्वा एकाक्ष - च मंत्रतः।
आपोशनाद्यमंत्रेण तत्वमंत्रत्रयं न्यसेत्॥ 2319
विभूति वामहस्तेन सव्यहस्ताभिमंत्रयेत्।
असुराणां विनाशार्थं त्रिंशीकांश राक्षसं॥ 2320
दि . . . . अस्त्रमनुस्मरन्।
सव्यहस्ते जलं नीत्वा . . . . . कृ लिन्यसेत्॥ 2321
मूर्ध्निचैव ललाटे च कण्ठे कर्णे तथैव च।
हृदये चैव बाह्वौ च नाभौ जान्वोश्च मूर्ध्नि॥ 2322
निष्क निष्कार्धकश्चैव निष्कद्वयं क्रियार्थकं।
विप्रादीनां च वर्णानां भस्मन्यासं समाचरेत्॥ 2323
रुद्रसंख्या च संख्येषु ब्रह्मांगानि प्रकल्पयेत्।
सव्यहस्ते जलं ग्राह्य अस्त्र मंत्र प्रदक्षिणम्॥ 2324
तर्पणं रुद्रसंख्यै श्च ब्रह्मांगैश्चैव मंत्रतः।
आचमनं ततः कृत्वा वैदिकं शैवमेव च॥ 2324
पाद प्रक्षालनं कृत्वा गृहारामे शिवालये।
नदीतीरे तटाके वा पर्वते राजधानिके॥ 2325
नवहस्तं सप्तहस्तं पञ्चहस्तं त्रिहस्तकं।
चतुरश्रायतं यत्तद्यष्टमण्डपं कुरु॥ 2326
मार्जनं प्रोक्षणं चैव गोमयेनानुलेपयेत्।
118) गोचर्ममात्रे तन्मध्ये गोमयेनानुलेपयेत्॥ 2327
आधारशक्तिमभ्यर्च्य तन्मध्ये कटकं न्यसेत्।
तदूर्ध्वे वस्त्रमास्तीर्य ऊर्ध्वे पीठे तु पश्चिमे॥ 2328
तन्मध्ये ऊर्ध्वपीठं स्यात् प्रभामण्डलसंयुतं।
वस्त्राधारं च वस्त्रं च पुष्पाधारेण संयुतम्॥ 2329

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शोभि) नवरत्नविचित्रेण मालाभरणसंयुतम्।
चित्रवस्त्रसमायुक्तं चित्राभरणशोभितम्॥ 2330
छत्रचामरसंयुक्तं व्यजनं तालवृन्तकम्।
खण्डवस्त्रेण संयुक्तं लिङ्गे शोभनसंयुते॥ 2331
जपाकुसुमायुक्तं पुष्पपात्रसमन्वितम्।
शंखाधारं च शंखं च पात्राधारं च पात्रकम्॥ 2332
स्थालिका स्थालिकाधारं पानीयाधारपात्रकम्।
जलद्रोणि समायुक्तं जलोद्धारं च पात्रकं॥ 2333
घण्टां च धूपधूपं च स्थितदीप समन्वितं।
तीर्नि पात्र समायुक्तं आज्यस्थालीं च स्रुक्स्रुवं॥ 2334
पचनपात्रैस्ससंयुक्तं व्यञ्जनैः पात्रसंयुतः।
दर्वीजुष्टं च काष्ठञ्च त्रिपादीं चाग्निसंयुतः॥ 2335
नालिकेरप्रयत्नं च व्यजनं छिन्नशास्त्रकम्॥
क्रमुकं छिन्नशास्त्रं च ताम्बूलाधारपात्रकं॥ 2336
पात्रं संपाद्य विधिवद्द्रव्यसंपाद्यमेव च॥
चंदनागरु कर्पूर कुंकुमं रक्तचंदनम्॥ 2337
हिमतोयं कृष्णगंधं गोरोचन मृगद्वयम्॥
कुसुमं पञ्चपुष्पं च अष्टपुष्पं च पत्रकम्॥ 2338
कङ्कणं लंबमाला च बिल्वदूर्वाक्षिकं तथा।
जलपूरितमेवन्तु जलद्रव्यसमन्वितम्॥ 2339
पाद्यादि द्रव्यसंयुक्तं धूपद्रव्यसमन्वितम्।
आज्यं च शुक्लतैलं च शिरीषं पिष्टचूर्णकं॥ 2340
पञ्चगव्यामृतं चैव नालिकेरकुशं तथा।
कदली दलसंयुक्तं स्नानद्रव्य समन्वितं॥ 2341
वस्त्राणि हानि विविधा वस्त्रं तु प्रयत्नतः।
पञ्चत्रियैक वृत्तं वा ... रुद्रैश्च संख्यया॥ 2342
आवृत्त सहस्रनालं वा पञ्चनालैकनालकं।
दीपज्वाला समायुक्तं गोघृतै ... मेव च॥ 2343
यथेष्टं गोघृतं चैव वृक्षबीजं तु तैलकम्।
द्विप्रस्थादि चतुप्रस्थं शुद्धतण्डुलसंयुतम्॥ 2344
व्यञ्जनं लक्षणं चैव मरीचीजीरकं तथा।
क्रमुकं फलपत्रं च कर्पूरं चूर्णसंयुतम्॥ 2345

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हस्तितं दर्पणं छत्रं चामरं तलवृन्तकम् ।
p. 2.119) द्रव्यं संपाद्यमेवं तु मण्डलस्य समीपके ॥ 2346
आसनं दारुकं चैव सारङ्गं चर्ममेव च ।
व्याघ्रचर्म च रोमं च रक्तकंबलवाससम् ॥ 2347
आसनं कल्पयेद्धीमान् अर्चना क्रममुच्यते ।
उत्तराग्निमुखो भूत्वा रुचिरासनसंस्थितः ॥ 2348
भस्मन्यासं ततः कृत्वा पूर्वोक्तविधिना सह ।
शिरस्ताडनमेवोक्तं दिग्बन्धनं ततः कुरु ॥ 2349
प्राणायामत्रयं कृत्वा भूतशुद्धिं समाचरेत् ।
पञ्चग्रन्थिस्तु छेदेन शिरो पादांतकं न्यसेत् ॥ 2350
अमृताप्लावनं कृत्वा करन्यासांगुलं न्यसेत् ।
शतं) अंगन्यासाक्षरन्यासं श्रीकण्ठं चाष्टत्रि- - ॥ 2351
शिवहस्तं तु संकल्प्य हृत्पद्मे चार्चयेच्छिवं ॥
नाभौ होमं प्रकर्तव्यं भ्रूमध्ये ध्यायेच्छिवं ॥ 2352
आत्मशुद्धिरिति प्रोक्ता सौर पूजादिकं कुरु ।
खेटके भूतलेवापि सौरपूजा यथाक्रमम् ॥ 2353
पूर्वे तु सुमुखं प्राप्य लेपयेद्रविमण्डलं ।
बेरे तु विलिखिते · · यथेष्टमण्डले स्थिते । 2354
उदिव्यं जातमंत्रेण गंधोदैः पात्र पूरयेत् ॥
रक्तचंदन पुष्पं च अर्चयेद्धृदयेन तु ॥ 2355
दक्ष पाणितले धृत्य दर्शनादर्यन्तु सेचयेत ॥
दण्डी च पिंगळी चैव गणेशं गुरुमेव च ॥ 2356
प्रभूतमासनं कल्प्य विमलं सारप द्मजम् ।
दीप्ता सूक्ष्मा जया भद्रा भूत्यैर्विमलमेव च ॥ 2357
विद्युता सर्वतोमुख्य अर्कासनखषोल्कका: ।
नादं वह्निसमायुक्तं द्वितीयस्वरसंयुतम् ॥ 2358
बिन्दुनादसमायुक्तं अनंतं रुद्रसंयुतम् ।
तृतीयस्वरसंयुक्तं नादाख्यशिव संयुतम् ॥ 2359
नमोऽन्तं सूर्यमुच्चार्य सौरसं पूजयेद्गुरुः ।
एकवक्त्रैक हृदयं द्विनेत्रं च द्विनासिकं ॥ 2360
चतुर्भुजसमोपेतं परहस्तांबुजद्वयम् ।
अभयं वरदोपेतं चित्रवस्त्रसमन्वितम् ॥ 2361
· · - - - संयुक्तं रक्तमाल्यानुलेपनम् ।
उत्पलपुष्पमेवोक्तं प्रभामण्डलमण्डितम् ॥ 2362

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भस्मं वा स्थारोहमरुणेन समन्वितम्।
. . . .। 2363
सोमांगारबुधश्चैव गुरुशुक्रशनैश्चरः।
राहुकेत्वन्तकं पूर्वादीशांतं क्रमशोर्चयेत्॥ 2364
क्षीरान्नं दापयेद्धीमान् धूपदीपादिकं वदेत्।
तेजश्चण्डेश्वरं पूज्य प्रणिपत्य क्षमापयेत्॥ 2365
पादप्रक्षाळनं कृत्वा देवाग्रे मण्डलं यजेत्।
D.L.120) सामान्यार्घ्यं च सङ्कल्प्य तेनैव प्रोक्ष्य भूतले॥ 2366
षोडशांगुलमायामं चतुरस्रसमन्वितम्।
वामदेवेन संमर्ज्य दक्षपाणितलेन वै॥ 2367
स्नानशुद्धिः प्रकर्तव्या भूमिर्भूमीति मंत्रतः।
पञ्चगव्यामृते स्नाप्य स्नानद्रव्यं तु विन्यजेत्॥ 2368
देवस्य दक्षिणे पार्श्वे यथेष्टासन संस्थिते।
उत्तराभिमुखो भूत्वा रुचिरासनं कल्पयेत्॥ 2369
भस्मन्यासकरांगुल्यौ अंगन्यासं तु कल्पयेत्।
पाद्यादिरर्घ्यमेवोक्तं पात्रं संपूजयेत्पृथक्॥ 2370
अथवा पात्रमेकं तु पाद्यमाचमनादयेकम्।
पात्रप्रक्षाळनास्त्रेण हृदयेन निरीक्षयेत्॥ 2371
त्रिपादूर्ध्वे न्यसेत् शंखं अवकुण्ठनमाचरेत्।
जलेन पूरयेत्पात्रं ब्रह्मांगं तु मनुस्मरन्॥ 2372
सव्यहस्ताभिमंत्रेण शिवगायत्र्या न्यसेत्।
धेनुमुद्रां च संदर्श्य प्रोक्षयेत्पात्रतो विधिः॥ 2373
शंखमूले धरां देवीं कुक्षौ वरुणदैवतम्।
धारायां घोरदैवं तु वलये सूर्यदैवता॥ 2374
मुखे तु सर्वतीर्थानि प्रदेशे चंद्रदैवतम्।
त्रिपादौ रविदैवत्यं ब्रह्माविष्णुमहेश्वराः॥ 2375
वृत्तमाधारशक्तिश्च इत्येते अधिदैवताः।
पीठशुद्धिस्ततः कृत्वा प्रोक्षये दस्त्रवारिणा॥ 2376
वृषेश्वरं तथा पूर्वे वृषवामे तु भास्करम्।
महेशं अग्निदेशे तु दक्षिणामूर्ति दक्षिणे॥ 2377
गणेशं नैरृते देशे कमलोद्भवं तु पश्चिमे। 2378
षण्मुखं वायुदेशे तु विद्यापीठं तु दक्षिणे॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सौम्ये तु नृत्तमूर्तिं च ईशाने क्षेत्रपालकम्।
कुबेरानिलयोर्मध्ये लिंगोद्भवं तु विन्यसेत्॥ 2379
ल कुलीश्वरं तु तद्धामे गुर्वासनं तु कल्पयेत्।
मध्ये सदाशिवं चैव मध्यं ईशानकेऽपि च॥ 2380
मनोन्मनीं तु तन्मध्ये आसनं तत्र कल्पयेत्।
सर्वदेवासनं कल्प्य स्वस्वमंत्रैस्समर्चयेत्॥ 2381
मूललिंगं समास्थाप्य आसनोर्ध्वे तु विन्यसेत्।
पुष्पमूर्ध्नि विन्यस्य पश्चाद्द्वारं प्रपूजयेत्॥ 2382
मध्यमे तु महालक्ष्मीं नंदि गंगां च दक्षिणे।
महाकालं च यमुनां वा पार्श्वे तु विन्यसेत्॥ 2383
ऊर्ध्वाध्वस्सं प्रपूज्याथ शिवास्त्रं संप्रपूजयेत्।
मर्चयेत्) मण्डपाभ्यंतरे गत्वा नैरृते वास्तुमर्चयेत्॥ 2384
P.L.121) द्वारादि क्षेत्रपालांतं अर्चयेत्स्वस्वमंत्रकैः।
द्वारं पश्चिममेवं तु नैवेद्यं पूर्ववक्त्रके॥ 2385
लिंगं संग्राह्य हस्तेन स्नानवेद्युपरि न्यसेत्।
अर्घ्योदकेन संप्रोक्ष्य वक्त्रन्यासं समाचरेत्॥ 2386
अंगुष्ठादि कनिष्ठांतं पञ्चब्रह्म मनुस्मरन्।
कनिष्ठानामिका मध्ये नवपुष्पं तु संग्रहेत्॥ 2387
अंगुष्ठतर्जनीयुक्तं निर्माल्यं तु विसर्जयेत्।
विसर्जने तु तत्काले पुष्पं मूर्ध्नि च विन्यसेत्॥ 2388
निर्माल्यं तु विसृज्याथ ईशे चण्डाय कल्पयेत्।
शुद्धतोयाभिषेकं च अस्त्रपाशुपतं जपेत्॥ 2389
मूलाधारात्समादाय ब्रह्मरंध्रेषु योजयेत्।
विरूपदेशवद्ज्ञेयं मन्त्रशुद्धिरुदाहृतम्॥ 2390
प्रणवादि नमोऽन्तानि मन्त्रजीवमिहोच्यते।
चलासनं तु संकल्प्य पुष्पं मूर्ध्नि विन्यसेत्॥ 2391
उद्वर्तनं तु ततः कृत्वा शुद्धतोयाभिषेचयेत्।
.. शरीष मुद्ग चूर्णेन पिष्टचूर्णेन मर्दयेत्॥ 2392
शुद्धतोयाभिषेकं च लिंगशोधनमेव च।
पञ्चगव्यामृते स्नाप्य जलेनैवाभिषेचयेत्॥ 2393

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्त्रमंत्रमनुस्मृत्य पुष्पं मूर्ध्नि विन्यसेत्।
क्षीरं दधि घृतं क्षौद्रं नालिकेरोदकं फलम्॥ 2394
इक्षुसारं च गन्धोदं अ्श्लोके नाभिषेचयेत्।
शिवगायत्रिमंत्रेण अर्घ्योदेनाभिषेचयेत्॥ 2395
मंत्रपुष्पं ततो दत्वा मन्नान्नं च निवेदयेत्।
खण्डवस्त्रेण संमृज्य पुष्पं मूर्ध्नि तु विन्यसेत्॥ 2396
पद्मपीठे तु विन्यस्य शिवमंत्रमनुस्मरन्।
पद्मासनं समभ्यर्च्य उपर्युपरि विन्यसेत्॥ 2397
कमलासनं समभ्यर्च्य दलेषु केसरेषु च।
कर्णिकायामनश्चेति बीजैर्यो नम इत्यपि॥ 2398
शक्त्यादि शक्तिपर्यन्तं अर्चयेद्दलाग्रके।
पीठे मनोन्मनीन्यस्त्वा शुद्धस्फटिकसन्निभा॥ 2399
पञ्चवक्त्रैक हृदयं दशहस्तं द्विपादकम्।
दिव्यकश्य दशश्रोत्रं पञ्चनासिकसंयुतं॥ 2400
जटामकुटसंयुक्तं शूलटंकसमन्वितम्।
चित्रवस्त्रसमायुक्तं अभयं दक्षिणे धृतम्॥ 2401
सांकुशं वरदं घण्टां अग्निपाशेन संयुतम्।
चित्रवस्त्रसमायुक्तं चित्राभरणभूषितम्॥ 2402
P.L.122) वर्णचिह्नाक्षरं ध्यानमंत्रं नक्षत्रसंयुतम्।
(छंदांसि) मन्त्रसंख्योदया ऋषि छांदांसि दैवतम्॥ 2403
तन्मध्ये शिवमावाह्य पञ्चावरणमर्चयेत्।
सद्योवाममघोरञ्च पुरुषेशानमेव च॥ 2404
अंबीगणांबिकां चैव गंगागौरी उमा तथा।
पश्चिमे चोत्तरे याम्ये पूर्वेशानके तथा॥ 2405
हृदयं च शिरश्चैव शिखा कवचमेव च।
नेत्रमस्त्र षडंगानि कीर्तनानि क्रमेण तु॥ 2406
वामी नीली च चक्री च पाशांगी खड्गांभिनी।
आग्नेयादिषु कोणेषु बाह्ये ईशानमेव च॥ 2407
गर्भावरणदेवानां स्वनाम्नाचार्ययेत्क्रमात्।
अनंतेशस्तथा सूक्ष्मो शिवोत्तश्चैकनेत्रकः॥ 2408
एकरुद्रस्त्रिमूर्तिश्च श्रीखण्डश्च शिखण्डिनः।
भूमिस्स्वाहा तथा क्षांतिः प्रभा पुष्टिश्रुतिस्तथा॥ 2409

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कीर्तिर्मेधा तथा चाष्टौ विद्येशानां तु शक्तयः।
गौरी चण्डेश नंदीशौ महाकालौ वृषस्तथा॥ 2410
गणेशश्चैव भृंगीशो महासेनो गणेश्वरः।
भद्रा च देवयानी च कुंदर्वी चैव भृंगिणी॥ 2411
वादिनी ह्लादिनी चैव रूपिणी च गणेशिका।
तृतीयावरणं प्रोक्तं चतुर्थावरणं शृणु॥ 2412
इन्द्राग्निश्चैव निरृति वरुण वायवः।
कुबेरीशान विष्णुश्च ब्रह्माणं च क्रमान्न्यसेत्॥ 2413
दैहिनी स्वाह शक्तिश्च कालकण्ठी च दाहिनी।
भोगिनी घोरशक्तिश्च गंभिनी षषणी तथा॥ 2414
लक्ष्मी वागीश्वरी चैव दिक्पालावरणे क्रमात्।
लज्रं शक्तिश्च दण्डश्च खड्गं पाशांकुशौ तथा॥ 2415
गदा त्रिशूलं चक्रं च पद्मं चेति दशायुधं।
प्रसन्नात्मा च कोपात्मा गुणात्मा कोमलात्मनी॥ 2416
विषात्मा विकृतात्मा च महात्मा मंगलात्मनी।
चक्रात्मी चैव पद्मात्मी दश वै शक्तयः क्रमात्॥ 2417
अस्त्रेशावरणं प्रोक्तं क्रमेणैव समर्चयेत्।
वस्त्रेण गन्धधूपं च घृतवारि समन्वितम्॥ 2418
गन्धपुष्पं च मकुटं कङ्कणं लंबमाल्यकम्।
रुद्राक्षमुपवीतं च प्रवालं मौक्तिकं तथा॥ 2419
स्वर्णरत्न विचित्रेण स्वर्णमालाविभूषितं।
ऐन्द्रदेशे तु अव्यक्तं याम्यनियति गोचरे॥ 2420
वारुणे वायुकालाख्यमुत्तरे तु कलाख्यकम्।
ऊर्ध्वच्छन्दं अधश्छन्दं मध्यमे मायवं न्यसेत्॥ 2421
योगासनं तथा प्रोक्तं मध्यमे चार्चयेच्छिवम्।
धूपं च ध्वजदीपश्च नैवेद्योपदंशकम्॥ 2422
गोमयालेपनं कृत्वा देवाग्रे मण्डलं न्यसेत्।
P. 2.1231 तन्मध्ये स्थलिकाधारं पात्रकं न्यसेत्॥ 2423
पचनस्थानमाविश्य पक्वान्नं चैव संग्रहेत्।
अतिपक्वमपक्वं ~~चैव~~ च कृशिरं परिवर्जयेत्॥ 2424
स्थलिकाक्षालनं चैव नैवेद्यं तु प्रपूरयेत्।
व्यञ्जनैराघृतं चैव उपदंशसमन्वितम्॥ 2425

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

फलादि गुळसंयुक्तं क्षीरं दधि च मधर्थितं।
आज्यमाप्लृत संयुक्तं अपिधानं तु वाससा॥ 2426
नैवेद्योत्थपने काले मार्जनं प्रोक्षणं न्यसेत्।
त्रिपादूर्ध्वं न्यसेद्धीमान् बेराणां तु पृथक् पृथक्॥ 2427
प्रोक्षये दस्त्रमंत्रेण ताळत्रयमिहोच्यते।
दिक् संध्यानं ततः कृत्वा धेनुमुद्रां प्रदर्शयेत्॥ 2428
आपोशनाद्यर्घ्यकं दत्वा हस्तप्रक्षाळनं कुरु।
नवपृष्टं गृहीत्वा तु गणेशं तु निवेदयेत्॥ 2429
ततः पुष्पं विसृज्याथ हस्तप्रक्षाळनं कुरु।
प्रभूतं च हविर्दत्वा पानीयं च निवेदयेत्॥ 2430
मनोन्मन्यादि देवानां नैवेद्यं हृदयेन तु।
सदाशिवस्य निर्माल्यं चण्डेश्वरसमीपके॥ 2431
शेषनिर्माल्य सर्वं च ऐशान्ये तु विन्यसेत्।
स्थूलशुद्धिं ततः कृत्वा पुनरर्घ्यं प्रदापयेत्॥ 2432
करोद्वर्तन मेवोक्तं मुखवासं च दापयेत्।
तांबूलं दापयेच्चैव पश्चान्नित्यपवित्रकम्॥ 2433
नित्याग्नि यजनं कृत्वा अंतर्बलिं समाचरेत्।
धूप दीपादिकं दत्वा आरार्तिकमतः परम्॥ 2434
भसितं दर्पणं छत्रं चामरं तालवृन्तकम्।
वेदस्तोत्र समायुक्तं नृत्तगीतं च वाद्यकम्॥ 2435
कनिष्ठानामिका मध्ये पुष्पं संगृह्य बुद्धिमान्।
जपमाला तु नक्षत्रं नाळजं तु शशी भवेत्॥ 2436
पृच्छदपट माच्छाद्य मूलमंत्रमनुस्मरन्
अष्टोत्तर शतं जप्त्वा रुद्राक्षिय संख्यया॥ 2437
जपांते चैव तत्काले पुष्पमूर्ध्नि च विन्यसेत्।
शिखापुष्पं विसृज्याथ प्रदक्षिणमथाचरेत्॥ 2438
पूजा समाप्तिं विज्ञाप्य अर्चयेत् संहितांजलिः।
चुलुकोदकं ततः कृत्वा अर्घ्यं तु विसृजेद्गुरुः॥ 2439
. . . . देवांश्च सर्वमात्मनि योजयेत्।
पूर्ववत्सदनं कृत्वा मूललिंगादि संग्रहेत्॥ 2440
वस्त्रं पुष्पं समाच्छाद्य बेराणां तु पृथक् पृथक्।
पूजा पर्युषितैः द्रव्यैः चण्डेशायार्चयेत्क्रमात्॥ 2441

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्वनिश्चण्डेश्वरायेति हुंफडंतेन बुद्धिमान्।
धूपदीपादिकं दत्वा अर्घ्यं तु विसृजेद्गुरुः॥ 2442
(P-2-124) शिरः कण्ठं चक्षुषी च कूर्परौ हस्तयेच्छिवं। ~~2443~~
एवं दिने तु संपूज्य पूर्ववदुर्चयेत्क्रमात्॥ 2443
नं) निर्माल्यं तु विसृज्याथ लेपनं कारयेद्बुधः।
पराधालयसेवार्थं प्रविशेत्साधकोत्तमः॥ 2444
पादप्रक्षालनं कृत्वा आचम्य विधिनाबुधः।
गोपुरद्वारबाह्ये तु भद्रलिंगं प्रणम्यच॥ 2445
वृषमग्रे वृष पूर्वे वा स्थूललिंगं प्रणम्य च।
अन्तः प्रवेश शिव दर्शने च शिवार्चने॥ 2446
तत्फल ~~दर्शने~~ सिद्धिलाभे। देशिकस्यनुज्ञां
भगवत्प्रसन्नत्वकृपादपञ्च प्रणजाय-॥ 2447
मह्यं। प्रदक्षिण क्रमेणैव गर्भगेहं प्रवेशयेत
सन्ध्यात्रयोपसंध्यौ च अर्चयेत्तदनंतरे॥ 2448
अर्चनाकाल मध्ये तु आगतो देशिको यदि।
तत्पत्रैरर्चयित्वा तु नैवेद्यं दीपमाचरेत॥ 2449
यथा राजासभामध्ये न प्रवेशो मनीषिणाम्।
तद्वदीश्वरसेवार्थं पार्श्वद्वार निवेशनम्॥ 2450
विप्रहीनं तु सेवार्थं अर्धमण्डपमादितः।
वृषभस्याग्रपर्यन्तं सेवास्थानं प्रकल्पयेत॥ 2451
प्रदक्षिण क्रमेणैव महादेवीं प्रणम्यच।
आस्थानमण्डपे गत्वा जपं कृत्वा विशेषतः॥ 2452
ग्रहं प्रविश्य संभोज्य आगमादि पठेद्गुरुः।
इति सूक्ष्मशास्त्रे आत्मार्थपूजाविधिपटलः॥ 2453

मीनाक्षी सुन्दरार्यां नमः

अथ स्वायं भुवे अग्निकायम् — 2454
अथाग्नेयजनं पुण्यं सर्वश्रेयावहं परम्।
आप्यायनं च मंत्राणां प्रवक्ष्यामि यथाक्रमम्॥ 2455
इष्ट्वा देवं यथान्यासं आग्नेयादि शिवं व्रजेत।
द्वादशांगुलमायामं विस्तारोष्टांगुलान्वितम्॥ 2456
षडंगुले तूच्चमानं (तौ) अश्वत्थोमरणीं ग्रहेत्।
सर्वदोष विनिर्मुक्तां शमीगर्भां शुभान्विताम्॥ 2457

गायत्रीमिति तां दद्याद्वा काष्ठां शुष्कां च संग्रहेत्।
विमलानां तथा तस्यां विन्यसेदुत्तरारणिम् ॥ 2458
अंगुष्ठांगुलमानेन संयुक्तां सकलामिति।
द्वादशांगुलमानां वा त्यष्टपद्चतुरंगुलाम् ॥ 2459
दण्डे मथनयोग्ये च तीव्रतायोज्य रज्जुना।
आयसेन दृढं कृत्वा ग्रन्थं मथनमंत्र तु ॥ 2460
सर्वां सर्वात्ममंत्रेण परिजप्त्वा विशुद्धये।
सर्वात्मानं जपन्नेव जनयेज्जातवेदसम् ॥ 2461
जातमात्रे समादाय कुण्डे तु विनियोजयेत्।
चतुरस्रं भवेत्कुण्डं वृत्तं वा हस्तसंमितम् ॥ 2462
नित्यनैमित्तिके काम्ये एवं कल्पः प्रचोदितः।
चतुरस्रं भवेत्प्राच्यां आग्नेय्यां तु भगाकृतिः ॥ 2463
याम्यायां अर्धचंद्रं स्यान्नैरृत्यां तु त्रिकोणकम्।
वृत्तकुण्डं तु वारुण्यां वायव्यां पञ्चकोणकं ॥ 2464
प· · · · तु सौम्यायां ऐशान्यां सप्तकोणकम्।
इष्टिकाभिस्सुपक्वाभिः अपक्वाभिरसंभवेत् ॥ 2465
कुर्यात्कुण्डं तु शास्त्रोक्तं मन्त्रहोमानुरूपतः।
मन्त्राणां वारुणानां तु कुण्डाकारं विधीयते ॥ 2466
वायव्यां वा पताकेवा माहेन्द्राणां तु वज्रवत्।
सप्तजिह्वाकृतिः प्रोक्ता आग्नेय्यां तु गुरूत्तमैः ॥ 2467
मध्यमोत्तमवीर्याणां चतुरस्रं फलप्रदम्।
P. 2. 125) त्रिकोणमल्पवीर्याणां स्त्रीरूपाणां भगाकृति। 2468
अर्धचन्द्रन्तु रुद्राणां सौम्यानां वृत्तमेव हि।
पञ्चकोणं तु मूर्तीनां किंकराणां तथैव च ॥ 2469
विद्याविद्येश्वराणां च पद्माकारमिहोत्तमं।
एतेऽशताधिके होमे मुष्टिरत्निप्रमाणतः ॥ 2470
सहस्रके तु कर्तव्यं समन्ताद्धस्तसंमितम्।
दशसाहस्रके होमे द्विहस्तं सर्वसंमतम् ॥ 2471
ततो लक्षामितो मंत्री चतुर्हस्तं प्रकल्पयेत्।
कोटिहोमे परं श्रेष्ठम ष्टहस्तं प्रमाणतः ॥ 2472
कुर्यात्कुण्डं विधानज्ञः पक्वेष्टा रचितासमं।
सर्वेषामेव कुण्डानां वृत्तं स्यात्सर्वकामिकं ॥ 2473
तस्माद्वृत्तं प्रकुर्वीत द्विधा शास्त्रविधो जनः।
मुष्ट्यरत्निप्रमाणेन पिण्डिका द्व्यंगुला स्मृता ॥ 2474

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हस्तमानसमानेन स्यादाद्यं चतुरंगुलं।
षड्) षडंगुलाङ्कितस्त्वंतं अष्टौ तद्द्विगुणात्मका॥ 2475
अष्टहस्तप्रमाणं वा स्मृत्वा तद्वादशांगुलं।
पिण्डिकार्धेन कर्तव्या योनिं कुर्यात्ततोऽपि वा॥ 2476
सर्वेषामेव कुण्डानां इति शास्त्रेण देशितम्।
अन्यवा पार्थिवं कुण्डं पार्श्वद्वये दृढमावृतम्॥ 2477
(सद्दर्शानद्द्वल्मीक सोषरामृदशोभना।
अहोरात्रे तु संशुद्ध स्वपदेन स्वपदेन परिस्रुता 2478
सद्यादौ तद्बहिः कुर्याद्धस्तमात्रप्रमाणतः।
चतुष्पदे नदीतीरे गिरौ गो-प्रशृङ्गितः॥ 2479
तटाकतीरे केदारे कुशकाशमृदः शुभः।
सम्) श्मशानद्वल्मीक सोषरामृदशोभना॥ 2480
अहोरात्रेण संशुद्ध स्वपदेन परिस्रुता॥
काषायोदकसंक्लिन्ना त्रिफली चूर्णसंयुतं॥ 2481
गंधैः रसैश्च संमिश्रा बिल्वांबुपरिशोषितः॥
कुंकुमगैरिक सिंधूर तिलांजन शिलान्विता॥ 2482
इति संग्राह्य सद्येन वामदेवेन कल्पयेत्॥
सुदीपयेदघोरेण शोषयेदिष्टिकां गुरुः॥ 2483
ईशानेन तु गृह्णीयात् प्रोक्षितां पुरुषेण तु॥
ततस्तां हृदयेनैव खादभूमौ निष्पापयेत्॥ 2484
यत्नेन पाचयेत्कुण्डं यथालोहित मावहेत्॥
त्र) अपक्वां वा द्विकुर्वीत सुदृढं सुमनोहरम्॥ 2485
उल्लेखनं तु कर्तव्य अघोरास्त्राख्यमंत्रतः॥
समिदाग्रेण पूर्वाग्रं उत्तराग्रमथापि वा॥ 2486
सु) तिस्रः पूर्वमुखा रेखा एका वा सौम्यतो मुखी॥
व्याख्यार्थ प्रतिलोमो वा भवेद्द्वाहार्थमेव हि॥ 2487
अंगुष्ठानामिकाग्रेण कृत्वा कारणमेव हि॥
निकुट्टनं च दत्वा च प्रोक्षयेत्कुशवारिणा॥ 2488
चतुष्पथमथास्तीर्य परिधीन्विष्टरान्न्यसेत्॥
गन्धधूपपवित्राद्यैः प्रणवेनाभिमंत्रितैः॥ 2489
ततः सद्येन गायत्र्याप्यरण्याग्निं प्रवेशयेत्॥
सूर्यकोवोद्भवं वापि द्विजदेवगृहोत्थितम्॥ 2490

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्त्रेण शोधनापेतौ पञ्चब्रह्माभिमंत्रितौ।
गर्भाधान विधानत्वमनुकल्पविधिं तथा॥ 2491
गायत्रिया निहितं दर्भैर्वमिनाग्नि विशोधयेत्।
तथा विद्याधिपेनास्तु दद्याद्दीप्यादिकं क्रमात्॥ 2492
गर्भाधाने कृते एवं एवं पुंसवने जलम्।
वामदेवेन मंत्रेण वारुण्यां च तथार्चनम्॥ 2493
सीमंतं दर्भसीमंतं त्यक्त्वाघोरेण मंत्रवत्।
ब्रह्माणं शिरसा पूज्य ततः कर्मसमाचरेत्॥ 2494
जातकर्माग्नि सन्दीप्य पुरुषेण विधानतः।
अर्घ्यं पाद्यं पदास्त्रेण दद्याद्धूपादिकं क्रमात्॥ 2495
ईशानेन च पुष्पाणि दत्वा नामौ विधौ ततः।
शिवसंस्पर्शनं कुर्यात्कवचेनैव पूजयेत्॥ 2496
(P.2-126) शिवाग्निस्तु भवेद्देवं पञ्चसंस्कारसंस्कृतः।
दीक्षा नैमिक वचनै- मित्तिके चैव काल्पे-॥ 2497
पित्र- - -यौ परम्। मूलस्यास्तरणं कुर्यात्।
कुण्डस्य परितः कुशैः। विष्टराणांचवेशंच॥ 2498
परिधीनां निवेशनम्।
हृदयेन शिखोक्तेन सर्वमंत्रानुवर्तनम्॥ 2499
स्रुवादीनां च संस्कारं आज्यस्यापि तथैवच।
ब्रह्मविष्णुपदेश्चैवं मंत्रैः ब्रह्मादिकं न्यसेत्॥ 2500
क्रमेण विधिवत्पश्चात् धूपसंस्कारमेवच।
वैकंकमयी स्रुक् खादिरो वा ध्रुवः स्मृतः॥ 2501
अंगुष्ठपर्वमूलेन तु गायत्र्या ह्रीं गुलयतः।
अंगुष्ठद्वयविस्तीर्णं कर्षपूरण पुष्परम्॥ 2502
(स्रु) हस्तेन विस्मृताश्चासौ मनः प्रीतिकरं परम्।
षट्त्रिंशदंगुलायामं परिणाहे षडङ्गुलम्॥ 2503
(षट्) सहाङ्गुलाग्रवृषप्रस्ता पुष्कराभोगमण्डला।
अग्रपुष्करयोर्मध्ये द्वादशांगुलशोभना॥ 2504
पुष्करामं चतुष्कोणे तन्मूलांगुलसंमितं।
खातं चात्र मुखंचैव द्व्यंगुली कीर्तितः स्रुवः॥ 2505
द्विरेखा तु स्रुचे तस्या स्रुवाद्द्विगुणमुत्तमम्।
प्रताप स्रुक् स्रुवा चाग्नौ चाज्यभागैः कुशैः स्पृशेत्॥ 2506

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अग्रमग्रेण मध्यं च मूलं मूलेन च क्रमात्।
निकृष्यैवं पुरोक्तेन तन्त्रेणैव विधानवित्॥ 2507
तत्रापि श्रावणं कुर्यात् पर्यग्निकरणं पुनः।
पवित्रीकरणं पश्चात् ततश्चोत्प्लावनं भवेत्॥ 2508
कुर्यात्संप्लवनं दर्भैरस्त्रेणोदग्न पश्चिमम्।
प्रोक्षणं च पवित्रेण कृत्वा घोरेण होमयेत्॥ 2509
सद्येन वामदेवेन बहुरूपेण चक्षुषा।
वक्त्रमन्त्रेण रुद्राच्च ईशानेन ततः परम्॥ 2510
होमयेत्बहुरूपेण शक्तेरग्नेस्तथाहुतिः।
एवं सर्वमिदं कृत्वा विधानमनलोचितं॥ 2511
पश्चात्संतापयेद्देवं अग्नौ संस्कार्य पूर्ववत्।
अग्नेर्वर्णं च गन्धं च शिखाशब्दं च लक्षयेत्॥ 2512
सिद्धिसिध्यारम्भिव्यक्ते भावितेनान्तरात्मना।
तप्तकांचन वैडूर्य पद्मरागेन्द्रचापवत्॥ 2513
बन्धूकदाडिमीपुष्प हरितालेन्द्रकोपवत्।
पश्येत्सूर्यस्य संकाशं काश्मीरमचलप्रभम्॥ 2514
नित्यमूर्ध्वगतं शिखं पिण्डितं शिखया शुभम्।
स्निग्धप्रदक्षिणावर्त्य स्थूलपुच्छादितं त्विति॥ 2515
क्षीराज्यबलिहोमादि ह्याज्यगन्धेन गन्धवान्।
दुर्गन्धं कृष्णवर्णं च नीलं पाण्डुरमेव च॥ 2516
कुशस्तोयो मखो रूक्षो दुर्गमो भयदस्मृतः।
(निमीलने) अप्धूपे तु न होतव्यं धूपेऽप्यल्प निलने॥ 2517
प्रदीप्ते लेलिहाने च होमयेत्कार्यसिद्धये।
इति स्वायंभुवे पूर्वसूत्रेऽग्निकार्यविधिपटलः॥ 2518

(P.L. 127) हिमसंहितायां नित्याग्निकार्यम्।
अत्र वक्ष्ये विशेषेण नित्याग्नियजनं क्रमात्॥ 2519
विधिकेना स्थापयेदग्निं पावकं पचनालये।
प. . . चतुरस्रं वा मेखलात्रयसंयुतम्॥ 2520
प्राक्सूत्रं तु न्यसेत्पूर्वं मध्ये तद्दक्षिणोत्तरे।
पश्चात्पश्चिमसूत्रं तु यावत्कुण्डं सुविस्तृतं॥ 2521

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हस्तं वा रत्निमात्रं वा मुष्टिमात्रमथापि वा।
गायत्र्यंगुलहस्तं वा रत्निश्चैव त्रिविंशतिः॥ 2522
द्वाविंशदंगुलं मुष्टिः हुत्तमं मध्यमाधमं।
तन्मानं खादयेद्भूमौ योन्यान्यासादि संयुतं॥ 2523
प्रोक्षयेच्छिवतोयेन पुण्याहं वाचयेत्ततः।
कुण्डे तु स्थापयेदग्निं ~~आसाद्य पार्श्वे~~
अविच्छिन्नं तु रक्षयेत्॥ 2524
एककालं द्विकालं वा त्रिकालं वा यजेद्गुरुः।
यावन्मूलोपचारं तु तावदग्निं सुपूजयेत्॥ 2525
इन्धानाकीर्य गंधाद्यैः दर्भाद्याज्येन संयुतं।
तन्मंत्रेणाग्निमाराध्य परिषेचनमाचरेत्॥ 2526
लोकेशान्स्वस्व दिग्भागे पूजयेत्स्वस्वमंत्रतः।
परिस्तीर्य ततो मंत्री शिवमावाहयेत्क्रमात्॥ 2527
गन्धाद्यैरर्चयेन्मंत्री हिममध्ये विशेषतः।
इन्धनैः पूजयेदग्निं महाज्वालाभिविस्तरम्॥ 2528
प्रोक्षयेच्छिवमंत्रेण परिषेचनपूर्वकम्।
आज्यसंस्कारकर्म कृत्वास्त्रेण मंत्रतः॥ 2529
वाह्निबीजमनुस्मृत्य दद्यादाहरणाहुतिं।
आज्यं समिद्भ्य चरुणा शिवमंत्रेण मंत्रवित्॥ 2530
अष्टादशाहुतिं दद्यात् षोडशीं देशवा गुरुः।
अनलब्रह्म षडंगैश्च होतव्यं सर्पिषा बुधैः॥ 2531
आद्यंतैर्व्याहृतिं हुत्वा स्विष्टांतं कारयेद्बुधः।
इदं विष्णुरिति मंत्रेण त्र्यंबकेनैव मंत्रतः॥ 2532
ब्रह्मजज्ञान मंत्रेण प्रत्येकं षोडशाहुतिः।
प्रणीता कारयेत् सम्यक् ब्रह्मकूर्चं विनाचरेत्॥ 2533
वह्निबीजमनुस्मृत्य दद्यात्पूर्णाहुतिं ततः।
अनलवान्यत्प्रकारेण अग्निकार्यं विजिश्रृणु॥ 2534
आत्मविद्या शिवाख्यैश्च त्रिधा पूर्णां प्रदापयेत्।
शिवाग्निर्जायते तेन सर्वसंस्कारवर्जितः॥ 2535
सकृत्प्रोक्षणमंत्रेण होतव्यं यथाशक्ति विशेषतः।
(अग्निकार्यं स्त्रुचांते तु) स्त्रुक्संस्कारो भवेद्ध्रुवं॥ 2536

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवंभूतस्य कर्तव्यं अर्घ्यपाद्यजले ननु।
मूलमंत्रेण होतव्यं यथाशक्ति विशेषतः॥ 2537
अग्निकार्यं स्रुचांते तु प्राणाग्निं कारयेद्बुधः।
देशिकः प्राङ्मुखो भूत्वा आसनोपरि संस्थितः॥ 2538
संस्तीर्य कदलीपत्रं पात्रशेषं तु निक्षिपेत्॥
पञ्च प्राणाहुतिं हुत्वा प्राणापानादि मंत्रतः॥ 2539
आचम्याथ पुनः कुर्यादापोहिष्ठेति प्रोक्षणं॥
P. L. 128) ततो गर्भगृहं गत्वा शेषकर्माणि कारयेत्॥ 2540
नित्याग्निकार्यमेवोक्तं नित्योत्सवविधिं शृणु॥
इति श्रीमत्संहितायां प्रतिष्ठातंत्रे क्रियापादे॥ 2541
नित्याग्निकार्यविधि षट्त्रिंशत्पटलः॥

— स्वायंभुवे अग्निपूजाविधि पटलः —॥ 2542
अथ वक्ष्ये विशेषेणारुणपूजाविधिक्रमं।
रुरुश्च विकराद्यांश्च देवैर्युद्धं प्रवर्तते॥ 2543
मूर्तेस्सहा) असंख्य देवास्तत्रापि विष्णुमूर्तिसहाश्रयेत्।
असह्यं विष्णुरूपेण शिवमूर्तेस्सहाश्रयेत॥ 2544
देव देव नमस्तुभ्यं सर्वरक्षायते नमः।
इति विज्ञाप्य सर्वश्च तोषयेच्छंभुमादरात्॥ 2545
दक्षिणांते प्रभाते स्यात् तत्काले इदमीश्वरं।
सन्तुष्टे शिवरूपेण राक्षसादीन् प्रदर्शयेत्॥ 2546
असुराणां क्षयं दृष्ट्वा अच्युतादीन् क्रमेण तु।
बाहुराज्ञां समावेश्य लोकरक्षायते नः॥ 2547
सुसंहितरूपं यथाकामि तत्काले शिवमर्चयेत्।
तस्मात् सर्वप्रयत्नेनारुणपूजां समाचरेत्॥ 2548
तत्पूजा द्विविधं येन नित्यनैमित्तिकं भवेत्।
अब्दं प्रति विशेषेण मार्गमासादिते यथा॥ 2549
नैमित्तिकमिति प्रोक्तं तत्पूजात्वधुनोच्यते।
भास्करस्योदयात्पूर्वं त्रिपादेन त्रिनाडिका॥ 2550
~~नैमित्तिकमिति प्रोक्तं~~
वेदायुतं तण्डुलं तु तत्संख्यांश्च ततः शृणु।
द्रोणत्रयं समारभ्य द्रोणश्चैव विवर्धनात्॥ 2551

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिभागांतं यथायोग्यं उत्तमं मध्यमाधमं।
व्यजनं तु चतुर्थांशं तत्समं फलमुच्यते॥ 2552
अष्टांशं घृतसंयुक्तं सूपन्तत्समुच्यते।
पयो दधि गुळादींश्च यथावित्तानुसारतः॥ 2553
अष्टादशमर्धमर्धं वा भुजमेवं प्रकीर्तितं।
नन्द्यावर्तं च दांतं च गंधादीन् संग्रहेत्ततः॥ 2554
पूजोपकरणं येन सर्वं संपाद्य यत्नतः।
भोगांगं निश्चयं चैव द्वाररक्षां समाचरेत्॥ 2555
शीघ्रं नीत्वा कवाटं च अन्तस्थो देशिको भवेत्।
देवं देवीं नमस्कृत्वा विज्ञापनमथाचरेत्॥ 2556
देवस्याज्ञया चैव इमां पूजां समारभेत्।
नित्यस्नानं यथापूर्वं सकळीकृतविग्रहः॥ 2557
प्रथमं विघ्नपूजां च . . . . ।
स्नानद्रव्याणि सर्वाणि स्नानकालेऽभिषेचयेत्॥ 2558
तदंते मन्त्रपुष्पं च गौळमंत्रेण दापयेत्।
प्रथमस्य द्वितीयन्तु चैंद्रमेकं निवेशयेत्॥ 2559
चतुर्थन्तु समुद्धृत्य सप्तमादि द्वितीयकम्।
पञ्चमात्पञ्चमंस्यैव तच्चतुर्थमुदाहृतः॥ 2560
P.2.129) सप्तमस्य त्रयं येन द्वितीयं प्रथमं भवेत्।
चतुर्थस्य द्वितीयन्तु पञ्चमात्प्रथमांतकम्॥ 2561
सप्तमादि समायोज्य गौळामंत्रमिति स्मृतं।
चतुश्चत्वारि संख्यैश्च मंत्रपुष्पं तु दापयेत्॥ 2562
मन्त्रान्ते दापयेच्छुद्धं तन्मन्त्रेणैव बुद्धिमान्।
वर्णादिभिरलंकृत्य स्थलशुद्धिं ततः कुरु॥ 2563
पश्चात्रिपादीं विन्यस्य पञ्चसप्तनवांतकम्।
द्व्यालिक्षणयुक्तेन पात्रमन्येन पूरयेत्॥ 2564
तन्मध्ये चरं कल्प्य पयश्शुष्कं तु पूरयेत्।
अन्यानि रसवस्तूनि मध्वाज्यादि निक्षिपेत्॥ 2565
व्यञ्जनैः पूर्य परितो तदूर्ध्वे स्थापयेद्घृतम्।
इक्षुखण्डं च तिर्यक् च स्थापयेन्नालिकेरकम्॥ 2566
अपूपादीनि सर्वाणि परितश्च समर्पयेत्।
तांबूलं शीतलं तोयं वासितं नवभाण्डकम्॥ 2567

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्रैव विघ्न दैवत्यं एकपात्रे प्रदापयेत्।
अहमस्मीति मंत्रेण देशिकेन जपेत्सह॥ 2568
देशिको दापयित्वा तु कुश्माण्डे नैव बुद्धिमान्।
परिवारामरादींश्च पूर्वोक्तविधिना सह॥ 2569
नैवेद्यं पुरतो न्यस्तं देवदेवस्य शूलिनः।
विनियोगः प्रकर्तव्यो दृष्टिदोषो न विद्यते॥ 2570
अन्नादीनां चतुर्थांशं अपूपस्य दशैककम्।
सुगन्धादि द्रव्य जातानां षुगांशं देशिकाय च॥ 2571
प्रदापयेद्विशेषेण यथा संतुष्टिकारणम्।
निर्माल्यं तु विसृज्याथ स्थलशुद्धिं समाचरेत्॥ 2572
तांबूलं तु निवेद्याथ धूपदीपं ददेद्गुरुः।
मुखवासं तु कर्तव्यं दर्पणादीन् प्रदर्शयेत्॥ 2573
दान्तस्थनं यावत्तावच्चारविंदुश्च मिश्रकैः।
एकपात्रे समाप्य तत्काले शिवमर्चयेत्॥ 2574
श्रीकण्ठाय नमस्तुभ्यं गंगाधर नमो नमः।
पिनाकिने नमस्तुभ्यं शूलपाणे नमो नमः॥ 2575
ते) कपालिने नमस्तुभ्यं विश्वरूपाय ते नमः।
जगत्कर्त्रे नमस्तुभ्यं लोकसाक्षी नमो नमः॥ 2576
ईशानाय नमस्तुभ्यं अंबिकापतये नमः।
दिगंबर नमस्तुभ्यं चित्प्रकाशाय ते नमः॥ 2577
अरूपिणे नमस्तुभ्यं रूपिणे च नमो नमः।
एवं मंत्रं गृहीत्वा तु पुणसंख्या समर्चयेत्॥ 2578
उपचाराणि सर्वाणि पूर्ववत्कल्पितं मया।
वेदाध्ययनमंत्रेण अर्धमण्डपमाविशेत्॥ 2579
p. 2.130) अन्य मंत्रांश्च मर्त्यांश्च द्वारे बाह्ये प्रवेशयेत्।
आचार्यः सुप्रसन्नात्मा बीजमुख्यं शतं जपेत्॥ 2580
चण्ड पूजां विना कार्यमरुण संपिरिहोच्यते।
एवं दिनं तु कर्तव्यं प्रातस्संध्यां समारभेत्॥ 2581
इति स्वायंभुवे अरुणपूजाविधिपटलः।
श्री सहायदाम्ने नमः। कामिके/~~माघमासे~~॥ 2582
माघमासे सिते पक्षे विद्यते या चतुर्दशी।
तद्रात्रिः शिवरात्रिः स्यात् सर्वपुण्य शुभावहा॥ 2583

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्यामेव शिवे पूजा शिवलिंगे शिवानले।
इति कुमारतंत्रे।
मुख्या त्रयोदशी मिश्रा पर्वमिश्राप्यमाध्यमा॥ 2584
मध्यमा शिवरात्रिस्स्यात् अहोरात्रं चतुर्दशी।
कारणे। शिवरात्रिरिति ख्याता सर्वज्ञानोत्तमोत्तमा॥ 2585
पुण्यकालं प्रवक्ष्यामि शृणु तत्र त्रयोदशी।
त्रयोदश्यामुपासीत चतुर्दश्यां तु पारणम्॥ 2586
चतुर्दश्यामुपास्यं हि प्राणहीनशरीरवत्।
त्र्यंबकं चतुर्दश्यां उमाभागे चतुर्दशी॥ 2587
शिवरात्रि संदेहः त्रयोदश्यां तु जागरम्।
त्रयोदश्यां चतुर्दश्यां निशामाश्रितमुत्तमं॥ 2588
चतुर्दशि त्वमाविद्धा प्राणहीनशरीरवत्।
त्रयोदशी भगाकारा चतुर्दशि . . . ॥ 2589
विख्यातव्यं गृहस्थेन दर्शयित्वा तपस्विनां।
त्रयोदशि समायुक्ता चतुर्दश्येव कथ्यते॥ 2590
उपोषणं चतुर्दश्यां पारणं च तथैव च।
तिथ्यंते पारणं कुर्यात् विना शिवचतुर्दशीं॥ 2591
पूर्वविद्धा तु कर्तव्या शिवरात्रिस्सदा बुधैः।
परविद्धां प्रकुर्वाणो नरकं प्रतिपद्यते॥ 2592
अर्धरात्रात्पुरस्तात्तु जया योगो यदा भवेत्।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रिया॥ 2593
रुद्रव्रतेषु सर्वेषु कर्तव्या सुखमातिथिः।
अन्यव्रतेषु सर्वेषु पूर्वविद्धापि वा . . शेत॥ 2594
पूर्णा त्रयोदशिवत् सम्पटिकैका चतुर्दशी।
सा रात्रिः शिवरात्रिः स्यात् तद्रात्रौ शिवमर्चयेत्॥ 2595
नवविंशति नाड्यस्तु त्रयोदश्या . . मात्परम्।
एकोद्दवायं चतुर्दश्यां तद्रात्रौ शिवमर्चयेत्॥ 2596
त्रयोदश्यामुपासीत चतुर्दश्यां तु पारणम्।
विद्धे विद्धे फलं तस्य न जानेऽहं वरानने॥ 2597
ग्रासे ग्रासे भवेत्पुण्यं चतुर्दश्यां तु पारणात्।
पुण्या त्रयोदशीवत् सयाममेकं चतुर्दशी॥ 2598
सा रात्रिः शिवरात्रिः स्यात्तद्रात्रौ शिवमर्चयेत्।
(P.L.131) उपोष्यात्र त्रयोदश्यां चतुर्दश्यां तु पारणम्॥ 2599

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रयोदशी शिवामूर्तिः शिवदेह चतुर्दशी।
तस्मिन्नेव विध्यातव्यं शिवयोगे दितिविदुः॥ 2600
त्रयोदश्यां चतुर्दश्यां मिश्रिते शिव पूजनम्।
पारणं तु चतुर्दश्यां महा.. नं महेश्वर॥ 2601
जागरन् पूजया नीत्वा शिवभक्तानन्तुव्रतः।
माघ कृष्ण चतुर्दश्यां निराहारो महेश्वर॥ 2602
जागरन् पूजया नीत्वा शिवभक्तानागतं।
त्रयोदशी समायुक्ता कर्तव्या चचतुर्दशी॥ 2603
रात्रौ चतुर्दशी युक्ता उत्तमा तु विधीयते।
पूर्वे) वार द्वये गते पक्षी पूर्वे वा चोत्तमेऽपि वा॥ 2604
मिश्रा त्रयोदशी मुख्या व्रतिनां तु चतुर्दशी॥
त्रयोदश्या चतुर्दश्या मिश्रिते शिवपूजनं॥ 2605
यजनं दशयुक्तो वा पुरा पुण्यं विनश्यति।
शिवलिंगं समुद्भूतं सूर्यकोटि समप्रभम्॥ 2606
तदा प्रभृति पुण्यानां सर्वदा शिवयामिनी।
कालशासनहंत्री च सर्वलोक प्रबोधिनी॥ 2607
तस्यां शिव चतुर्दश्यां मध्ययामध्य मध्यतः।
उषा चतुर्दशी रात्रौ शिवसायुज्यकारिणी॥ 2608
द.. चतुर्दशीं पूज्य रौरवं नरकं व्रजेत्।
सर्वासां च तिथीनां च उपवास व्रतादिषु॥ 2609
तिथ्यंते पारणं कुर्याद्विना शिव चतुर्दशी।
हरि-ब्रविष्टवालक्षा कोटि फलं प्राप्य शिव-॥ 2610
सायुज्यमाप्नुयात। त्रयोदशीमाघकृष्ण-।
चतुर्दशी॥
चतुर्दश्या तु संमिश्रा शिवपूजा चतुर्दशी॥ 2611
पार) पुराणां च चतुर्दश्यां कोटि यज्ञ समं भवेत्।
पूर्णा त्रयोदशी रात्रौ याममेकं चतुर्दशी॥ 2612
उपोष्या सा प्रयत्नेन शंभुर्वचनमब्रवीत्।
कालोत्तरे॥ यस्या रात्रौ त्रयोदश्यां याममेकं चतुर्दशी॥ 2613
सा रात्रिः शिवरात्रिः स्यात् तद्रात्रौ शिवमर्चयेत्।
यस्यां त्रयोदशी पूर्णा यामं कृष्ण चतुर्दशी॥ 2614

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सा रात्रिः शिवरात्रिः स्यात् सा भवेदुत्तमोत्तमा।
यस्यां त्रयोदशी पूर्णा याममेकं चतुर्दशी॥ 2615
भुक्तिमुक्तिप्रदा सा च दर्शयुक्ताधमा भवेत्।
कालोत्तरे- पूर्णा त्रयोदशीयुक्ता घटिकैका चतुर्दशी॥ 2616
भुक्तिमुक्तिप्रदा ज्ञेया दर्शयुक्ताधमा भवेत्।
सूक्ष्मे) त्रयोदशी समायुक्ता माघ कृष्ण चतुर्दशी॥ 2617
शिवरात्रिरिति ख्याता सा रात्रिः शंकरप्रिया।
ललिते) उदयास्तमने चैव त्रयोदश्या तथैव च॥ 2618
रात्रौ चतुर्दशीयुक्ता शिवरात्रि शिवप्रिया।
p.L.132) त्रयोदशी शिवा देहे चतुर्दशी शिवैव तु॥ 2619
तयोस्समागमं पुण्यं शिवयोगस्स उच्यते।
त्रयोदशी समायुक्ता चतुर्दशी युता यथा॥ 2620
न कर्तव्या प्रयत्नेन सिनीवालीयुता तथा।
रात्रौ यामद्वयादर्वाक् यस्यां रात्रौ त्रयोदशी॥ 2621
सा रात्रिः शिवरात्रिः स्यात् + - . . . . . . ।
त्रयोदश्यां कलायुक्तां कृत्वा शिव चतुर्दशी॥ 2622
पारणं तु चतुर्दश्यां कोटियज्ञफलं भवेत्।
नवविंशतिनाड्यस्तु त्रयोदशी युता तथा॥ 2623
एकनाडि चतुर्दश्यां तद्रात्रौ शिवमर्चयेत्।
उदयास्तमने चैव त्रयोदश्यां तथैव च॥ 2624
शिवरात्रिरिति ख्याता सा रात्रिः शंकरप्रिया।
रात्रौ यामद्वयादर्वाक् घटिकैका महानिशि॥ 2625
तस्या . . . - . . - - - - . रात्रिकम्।
माघे कृष्ण चतुर्दशी शिवनिशाख्यातम्। 2626
रा) सा रात्रिवरा रात्रौ चेद्दर्शिकर्षपातु महिता-
तुल्या यदीष्टादिमा, ख्याता दर्शायिता - 2627
तदुक्तसमये शंभुं यजेच्चास्तमतः। तस्यामेव-
तु पारणां कृतविधिः कुर्याद्द्विवैवव्रती॥ 2628
स्कंद . . - - - - त्रयोदश्यां भूतप्राह्या
महानिशि शिवरात्रिव्रतं तत्र कुर्याज्जागरणं- 2629
तथा॥ वायुपुराणे॥ त्रयोदश्यास्तमिति-
सं . . - - - विद्धा तु या तत्र शिवरात्रिव्रतं चरेत्॥ 2630

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्मृत्यंतरे॥ प्रदोषव्यापिनी ग्राह्या शिवरात्रि त्रयोदशी।
रात्रौ जागरणं यस्मात - - - - - - - - यत॥ 2631
कामिके॥ निशाद्वये चतुर्दश्यां पूर्वाह्यापरा शुभा।
स्कान्दे॥ कृष्णाष्टमि स्कन्दषष्टि शिवरात्रि चतुर्दशी॥ 2632
. . . . तिथ्यंते पारणं भवेत।
जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च॥ 2633
पूर्वविद्धे प्रकर्तव्या तिथिहरंते च कारणं।
. . . . - - ~~ष्टाष्टमी~~ घाष्टमी च या॥ 2634
पूर्वविद्धैव कर्तव्या शिवरात्रि व्रतं दिनम्।
जयन्ती शिवरात्रि कार्या कार्ये भद्राजयान्विते॥ 2635
. . . . . . योमध्ये सिताया श्च चतुर्दशी।
अनङ्गेन समायुक्ता कर्तव्या सा सदा तिथिः॥ 2636
दशयो . . . . - - - - ।
माघकृष्ण चतुर्दश्यां रविवारोदये भवेत॥ 2637
भौमो वाथ भवेद्देवी कर्तव्यं व्रतमुत्तमम्।
शिवयोगस्य यो . . . - - - मोत्तमम्॥ 2638
शिवरात्रि व्रतं देवी तद्भवे दुत्तमोत्तमम्।
स्कांदे पुराणे॥ उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं॥ 2639
. . . . कृतलक्षैश्च लभ्यते नाथवा न वा।
ब्रह्मा स्वयं चतुर्वक्त्रैः समाप्य हम्॥ 2640
सिद्धे सिद्धे फलं तस्य शक्तो वक्तुं न शक्यते।
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि वै सति वै॥ 2641
संस्थितानि भवन्तीह स्नातायां पारणे कृते।
तिथीनामेव सर्वासामुपवासव्रतादिषु॥ 2642
तिथ्यन्ते पारणं कुर्यात विनाशी च चतुर्दशी।
माघकृष्ण चतुर्दश्यां विशेषमध्युनोच्यते॥ 2643
उदयास्तमनं सर्वं त्रिंशन्नाडी त्रयोदशी।
रात्रौ चतुर्दशीयुक्तं उत्तमं शिवरात्रिकं॥ 2644
इति योगजे॥
शिवपूजाविधि चैव पारणं च चतुर्दशी।
चतुर्दश्यां तु भक्तानां पूजाविधि फलं भवेत॥ 2645

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सुप्रभेदे।

पूर्णा त्रयोदशी रात्रौ कलामात्र चतुर्दशी।
तिथीनां तु पूजानां श्रेष्ठमुत्तममुच्यते॥ 2646
उषःकाले त्रयोदश्यां अस्तमायाच तुर्दशी।
मध्यमं शिवरात्रित्वं अन्येषामधमाधमम्॥ 2647
उदयाद्युदयायां तु अहोरात्रं चतुर्दशी।
मध्यमं तु विधानज्ञः पूजयेत्परमेश्वरम्॥ 2648
उदयास्तमपश्याम महानिशि चतुर्दशी।
मध्यमं शिवरात्रित्वं अन्येषामधमाधमम्॥ 2649
मध्यमं शिवरात्रिस्स्यात् अहोरात्रं चतुर्दशी।
तस्यां पूज्यो महादेवस्स्वात्मनो हित कांक्षिभिः॥ 2650
उदयास्तमयपर्यन्तं अहर्निशि चतुर्दशी।
प्रातरेव ततः कुर्यात् प्राजश्चैव तु दोषभाक्॥ 2651
नागरस्व ण्डे तु माध्याले पूर्व तिथिं च रात्रौ –
प्रवैति योगमयदिज्ञत् दीशि। षडाप्रयुक्ता – 2652
कुर्युः। विन तत्र कुर्युर्हि। शिवस्य रात्रिः पृथक्कृथ्विस्य-
तिथित्रय विषये अधमाधम शिव रात्रौ श्रवण॥ 2653
योगाद्दामादोषो नास्तीत्याह – स हरिः शिव –
रात्रिर्वा अमा दोषो न विद्यते – तस्माच्छ्रवण – 2654
संयोगात् शिवरात्रि व्रतञ्चरेत्। सन्ताने तु।
रसानुसिद्धकनकं शोध्यते वह्नियोगतः॥ 2655
तथाश्रावण संयोगात् अमा विद्धा विशुध्यति।
स्वायं भुवे तु॥ त्रयोदशी भगाकारं लिंगाकारं चतुर्दशी॥ 2656
विख्यातव्याग्रहस्तेन दर्शयुक्ता तपस्विनाम्।
विजयेतु। त्रयोदशी भगाकारा लिंगाकारा चतुर्दशी॥ 2657
विख्यातव्याग्रहस्तेन दर्शयुक्ता तपस्विनां।
सर्वसंगपरित्यागी – – – . विरक्तानाम्॥ 2658
त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी।
अन्ते चैव सिनीवाली त्रिस्पृश्यां शिवमर्चयेत्॥ 2659
अंशुमति॥ शिवरात्रि समुद्दिष्टं तिथि निर्णयमुच्यते।
एतत्तनु विद्धिं पश्चात्प्रोक्तं सिद्धांतमेव हि॥ 2660
पूर्वसिद्धांतमेवं स्यात् सिद्धांतं पक्षमेव हि।
पूर्वसिद्धांतमेवं हि तद्धेतं शृणु सुव्रत॥ 2661

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकमासे द्विपक्षे तु अधिके व्रतमाचरेत्।
उदयादि समारभ्य दीपान्तं च चतुर्दशी॥ 2662
P.2.134) अस्तमनं समारभ्य यावद्विशति नाडिकाम्।
पश्चात्पर्वयुतं सा तु दोषयुक्ता न संभवेत्॥ 2663
तदत्रात्रिशिवरात्रिस्स्यात् शिवपूजां समाचरेत्।
परसिद्धान्तमेवं हि सर्वप्राणिहितावहम्॥ 2664
यावत्क्षयं चतुर्दश्यां पर्वयामं क्षयं भवेत्।
शिवपूजा न कर्तव्या सर्वदोषकरं भवेत्॥ 2665
कृष्णपक्षे विशेषेण पूजनीयः सदाशिवः।
व्रतीनां पारणं कुर्यात् चतुर्दश्यां महत्फलम्॥ 2666
विना शिव चतुर्दशीम्। तिथ्यंते पारणं कुर्यात् ~~चतुर्दश्यां महत्फलम्~~ विना शिव चतुर्दशीम्।
यामत्रयमतीतं चेत् पूर्वाह्ने पारणं कुरु॥ 2667
एवं तिथिक्रमं प्रोक्तं सन्धिक्रममथोच्यते।
अस्तमनं समारभ्य त्रिपादेन त्रिनाडिका॥ 2668
नित्यपूजां समाप्यान्ते शिवरात्रिं समारभेत्।
उदयास्ते त्रयोदश्यां चतुर्दश्यां तथैव च॥ 2669
रात्रौ चतुर्दशीयुक्तं उत्तमं तु विधीयते।
उदयाद्यर्धरात्रं तु अहोरात्रं चतुर्दशी॥ 2670
मध्यमं तु विधानज्ञः पूजयेत्परमेश्वरम्।
उदयास्तमनं चैव चतुर्दश्यां तथैव च॥ 2671
रात्रौ पर्वसमायुक्तं अधमं तु विधीयते।
तिथ्यंतं शांतिदं प्रोक्तं तिथिमध्यं तु भेषजं॥ 2672
तिथ्यादौ कामदं प्रोक्तं संपूजां कर्तुमर्हसि।
रवौ कुंभगते पूर्वं मकरान्तं प्रपूजयेत्॥ 2673
संधेरष्टौ समभ्यर्च्य यामं प्रति विशेषतः।
द्विवारे दिवसे पक्षे यस्मिन् पक्षेऽधिकं भवेत्॥ 2674
तस्मिन् पक्षाधिकं कुर्याच्छिवरात्रौ सुपूजयेत्।
उपभेदकारणे सिद्धान्तमाह — भूमेदा दक्षिणाभागे -॥ 2675
सौरमानं प्रशस्तकं।
उत्तरे भूमिभागे तु चान्द्रमानं प्रशस्तकम्।
विपरीतं महाव्याधिः राजा राष्ट्रभयावहम्॥ 2676
कुंभे तु रवि संप्राप्ते कृष्णपक्षे विशेषतः।
त्रयोदश्यां चतुर्दश्यां संयुक्तां तन्निशिस्तथा॥ 2677

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवरात्रिव्रतं कल्पमपरे हरिपारणम्।
गर्हितं चान्द्रपक्षे तु शिवरात्रिव्रतं यदि॥ 2678
तद्राष्ट्रभूपतीनां च जनानामपि सर्वशः।
ती) शिवरात्रिव्रतीनां च रौरवं नरकं व्रजेत्॥ 2679
जयन्ती शिवरात्रिश्च जन्ममासस्य तारकं।
उपाकर्म च पैत्रं च सौरमाने विधीयते॥ 2680
विमले) प्रदोषे अर्धरात्रं वा या भूत्वाव्याप्य तिष्ठति।
उत्तमा सैव रात्रिस्स्यात् तस्यामेव व्रतं चरेत्॥ 2681
भीम संहितायाम्-
चान्द्रे सर्वव्रतं शस्तं शिवरात्रं विना जनैः।
नोपवास्या शिवरात्रिः परिसंस्थे दिवाकरे॥ 2682
अन्यत्रागमे- कृष्णाष्टमी चतुर्दश्यौ उपवासे तथार्चने।
यायिका निशि सा ग्राह्या ततो पूर्वा समा यदि॥ 2683
दिन क्षये यदा न स्यान्मध्यरात्रे चतुर्दशी।
तदा पूर्वां परित्यज्या कर्तव्या सा नरैः परा॥ 2684
P.2.105) इति शिवपुराणे-
माघस्य कृष्णपक्षे तु तिथिर्यातु चतुर्दशी।
न जया संयुता कार्या दर्शयुक्ता शुभावहा॥ 2685
प्रदोषे वा निशीथे द्वयोर्वा या तिथिर्भवेत्।
शिवरात्रव्रतं तत्र द्वयोस्पृष्टा प्रशस्यते॥ 2686
तदभावे निशीथैका व्यापा सा परिगृह्यताम्।
अर्धरात्र क्षये सा तु पूर्वा भोज्या परा शुभा॥ 2687
द्वयोश्यासंभवे ग्राह्या प्रदोषव्यापिनी तिथिः।
इन्दुवारो भवेदत्र पुण्यं· ·अनंतकमिति॥ 2688
कामिके) दीपावल्यां- यां तिथिं समनुप्राप्य उदयं याति भास्करः।
सा तिथिस्सकला ज्ञेया शुक्ले कृष्णे द्विजोत्तम॥ 2689
इति कारणे- सर्व प्रायश्चित्त विधौ- ।
वैदिकादि क्रियायां तु नेष्यते शिवमंदिरे॥ 2690
पुण्याहाद्यं कर्म चोक्तं इति चेच्छिव चोदितं।
इत्यत्र क्रियते नैव स्वयमीशा प्रवर्तितम्॥ 2691
शिवालये प्रकर्तव्यमित्यादि श्रुतिचोदितं।
अस्ति चेद्वैदिकं कर्म ट्येतत्सिद्धांतवर्त्मना॥ 2692

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कामिकादि प्रभेदेन स्थापिते पूजितेऽपि वा।
नोच्यते वैदिकं वाक्य पुराणस्मृति चोदितं इति॥ 2693
अन्यत्रागमे॥
यस्मिन् काले विरोधोऽस्ति ज्योतिषोक्तागमोक्तयोः।
ज्योतिषोक्तं विहायैव आगमोक्तं समाचरेत्॥ इति॥ 2694
नानागमे शिवरात्रिनिर्णयविधिपटलः- ।
जीर्णो वा प्यथवा भग्ने विध्यानापि न चालयेत्। 2695
नृपतस्कर वह्निभ्यो भयादन्यत्र धारयेत्।
स्वेष्टलिंगे परिभ्रष्टे नष्टे दग्धे हृतेऽपि वा॥ 2696
नरवानरकाकाद्यैः लक्षाघोर जपात्ततः।
लिंगांतरं प्रतिष्ठाप्य भवेच्छुद्धो न संशयः॥ 2697
द्विहस्ताद्दूरवर्तिः पाते व्यंगे लक्ष जपात्ततः।
अकामतो यदा लिंगं विशीर्णं पिण्डिकातुला॥ 2698
प्रागुक्त द्विगुणं कुर्यात् कामतो निष्कृतिर्नहि।
प्रायश्चित्तं कृतं सद्यो यदि श्रेष्ठं प्रकीर्तितं॥ 2699
मध्यं सप्तदिनादर्वाक् पक्षाहादुत्तमं भवेत्।
तस्मान्मासावसानं तु हीनमित्यभिधीयते॥ 2700
मासोर्ध्वे नैव कर्तव्यं यदि शान्त्या समाचरेत्।
दिनानि यानि हीनानि पूजया नित्यसंज्ञया॥ 2701
तदहः संख्यया कुर्यात् प्रायश्चित्तं पुरोहितम्।
एकमासावधिर्यावत् ततः संप्रोक्षणं नयेत्॥ 2702
नान्यथा देवदेवस्य सान्निध्यं द्विजसत्तमाः।
रिपुणा संगृहीतं चेत् लिंगं वा प्रतिमादिकं॥ 2703
तद्राष्ट्रनाशो नृपतिः शत्रुभिः परिपीड्यते।
P. 2. 136 सर्वयत्नात्तदा दद्यात्तत्रैव स्थापनाय च॥ 2704
लब्धं चेल्लिंग बेराद्यं गुह्यदेशे निधाय च।
लिंगोद्घाटनदोषस्य शान्त्यर्थं घोरमंत्रतः॥ 2705
सहस्रं होमयेदाज्य तिलाद्यं चरुणा शतं।
मधुरत्रय संयुक्तं सहस्रं दूर्वया हुतिम्॥ 2706
कृत्वांते स्थापनोक्त्या तु स्थापयेत्पूर्वभूतले।
लक्षणोद्धारणं चाक्षि मोचनं जलवेशनम्॥ 2707

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विहायान्यत्प्रकर्तव्यं स्थापके तत्वदेशिभिः।
अलब्ध्वं लिंगबेराद्यं यदन्यत्स्थापयेन्नवं॥ 2708
मासादर्वाक् तदूर्ध्वं चेत् यावन्मासत्रयावधिः।
प्रत्यहं शांति होमं च कर्तव्यं स्थापनादिकम्॥ 2709
तत्रदूर्ध्वं स्थापनं बाललिंगाद्यैश्चात्र नोदितम्।
तस्मात्सर्वप्रयत्नेन मासत्रितयमध्यमे॥ 2710
संस्थाप्य बाललिंगाद्यं बालस्थापन कर्मना।
गृहीतं त्वनुचोराद्यैः त्वलिंगं कीदृशं तु यत्॥ 2711
प्रतिमा मुखलिंगं वा बाणलिंगादिकं तु वा।
प्रत्यहं चैव मन्वेष्य स्थितं मन्यसे श्रुतम्॥ 2712
तदा युद्धेन जित्वा वा सुलभ्यं बहुयत्नतः।
संवत्सरत्रयादूर्ध्वमलब्ध्वं चेन्मुनिश्वराः॥ 2713
मूलस्थाने यथा प्रवृत्त द्रव्यैः तत्प्रमाणतः।
संस्थाप्य मूललिंगाद्यदर्चयेदर्चनोक्तवत्॥ 2714
अज्ञानं पूर्वमानं चेदाकृति वा बुद्धत्तमैः।
तत्प्रसाद्यानुरूपेण यजमानानुरूपतः॥ 2715
लिंगमापाद्य विधिना स्थापयेदुत्तमत्मना।
बाणलिंगं तु वा तत्र स्थापयेत्सर्वसिद्धये॥ 2716
बेरं वा पीठिकां वापि न्यायेनानेन कारयेत्।
देवीं विहाय देवो वा देवी वा केवला यथाशास्त्रिः॥ 2717
प्रगृहीता चेत् स्थितस्यैवानुरूपतः।
समापाद्येतरं तस्य प्रतिष्ठाञ्च समाप्य च॥ 2718
कल्याणं कारयेदन्ते विधिना देशिकोत्तमः।
स्थापनांते तु बेराद्यं आनीयं चेत्तदन्यके॥ 2719
देशे संस्थाप्य विधिना पूजये नित्यं आदरात्।
पीठं चेत्संव्यजेल्लिंगे नाशवान्येन योजयेत्॥ 2720
पूर्वाकृति यथा पिण्डिस्तथा कुर्यात् पुनः पुनः।
अन्याकृतिर्न कर्तव्या कृता चेत्कर्तृनाशनः॥ 2721
इति कामिके संप्रोक्षण प्रायश्चित्त विधिः॥
श्रीमद्दासदेकस्थान गुरुवंशाम्बुजं वम॥ 2722
दुर्वासस ऋषिं वन्दे तन्मुखांश्च गुरूनपि।
व्यापकेश सर्वेशानः पण्डितोत्तुंग शंकरान्॥ 2723

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सोमेशानादसर्वात्मा शिवयोर शिवात्मिान्।
साधकाद्यैरनुष्ठेय माचारं शिवभाषितम्॥ 2724
p.2.137) तद्विपत्तौ तदाज्ञाय लंघनं स्यात्पशब्दतः।
तेषां तत्परिहारार्थं प्रायश्चित्तं शिवोऽवदत्॥ 2725
तत्सर्वमेकतो द्रष्टुं लिख्यते तच्चोऽधुना।
प्रमादाद्बुद्धिवैषम्यात् द्रव्याणां तु परिक्षयात्॥ 2726
अकृतानां विनष्टानां प्रायश्चित्तं विधीयते।
साधकोक्तं व्रतं कुर्यात् गुरुरब्ध नशा प्रति॥ 2727
द्विगुणं स्ववशस्तानञ्चैसां स्ववशी प्रति।
स्ववशास्य गुणात्र्यंशं विना तत्पुत्रकश्चरेत्॥ 2728
पुत्रकार्धं तु समयी पूर्वोक्तानुक्रमा वना।
दैवात् क्रोधात् तथा मोहात् राजचोरभयादिभिः॥ 2729
दाभि दीक्षैरकामित्वं शैवैर्ज्ञेया तु कामिता।
अशीतिर्यस्य वर्षाणि बालो वा न्यूनषोडशः॥ 2730
प्रायश्चित्तार्धमर्हन्ति स्त्रियो वा व्याधिपीडिताः।
तत्रापि च परिक्लेशं ज्ञात्वा पादं प्रकल्पयेत्॥ 2731
देशं कालं वयश्शक्तिं जातिं भक्तिं क्रियाक्रमम्।
सुविचार्य प्रदातव्यं नोपवासो रुजान्विते॥ 2732
प्रायश्चित्तं समर्थस्य पितृभ्रात्रादिबांधवैः।
तद्विभज्य विधातव्यं द्विगुणं तु परैर्जनैः॥ 2733
सर्वं समाप्तिनामेवं निर्दिष्टं शुद्ध्येत् क्रमात्।
सिद्ध्यर्थं पुत्रकादीनां सिद्ध्यर्थं मंत्रवादिनाम्॥ 2734
अग्रहाभिकायदेशीनां अपाशिष्यते।
दशोर्ध्वत्रितयं यावज्जपस्नानेन शुध्यति॥ 2735
रक्तं पञ्चशतं यावत् सोपवासं तदूर्ध्वकम्।
उपवासद्वयं कार्यं अयुते वायुते सति॥ 2736
दशांशेन जपे होमं विंशांशेन गडुका।
सत्यं व्रतं ब्रह्मचर्यं भूशयानकभोजनम्॥ 2737
अतैल सत्यवादी स्याद्भिक्ष्यान्नौ भोजनालपि।
पञ्चगव्यं तथा पेयं समाप्तौ च तथामतं॥ 2738
गुरु वा लघु वा विद्वान् प्रायश्चित्तं विचार्य च।
गुरूपदेशात् कुर्वीत परोक्षेऽर्थं गुरुः स्वयम्॥ 2739

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रायश्चित्तं चरेन्मंत्री गुरूक्तं शिवभाषितं।
सप्त पंचाभि दशाभि राचार्यैः तंत्रपारगैः॥ 2740
स्वशास्त्रनियताभ्यासैः कुतं स्वगुरुभिर्विना।
नमूक्ष्वै दीक्षितैर्वा नास्तिकै वीथ हेतुकैः॥ 2741
कर्तव्यं शास्त्रसिद्धं महापातकशांतये।
परिगृह्य जपेन्मंत्री संख्याच्छिन्नमतंत्रितः॥ 2742
कल्पोक्तं तु जपं कृत्वा शिवाय विनिवेदयेत्।
शतायुत....दि विंशत्रिंशत्तदुत्तरः॥ 2743
....यावत् पराकाष्ठात् यस्येयं कृतिः।
यथाशास्त्रोपदिष्टं न्यूनं नाधिकं क्वचित्॥ 2744
न्यूनाधिकप्रदानेन देशिको नरकं व्रजेत्।
तस्मात्सर्वप्रयत्नेन यथोक्तं समादिशेत्॥ 2745
भूरत्नधनवस्त्राद्यैः देशिकान् पूजयेत् क्रमात्।
यथाश्रुतं यथादृष्टं निबद्धं गुरुभिर्यथा॥ 2746
p. L. 138) यः सिद्धांतविरोधेन तच्छलं हय विलंघनम्।
दिनपक्षक्षील स्मादि प्रोक्षणं नात्रसंमतम्॥ 2747
प्रायश्चित्तं कृतं सद्यो यदिष्टं प्रकीर्तितं।
मध्यं पञ्चादिनादूर्ध्वं स..द्यालुप्यमं भवेत्॥ 2748
तस्मान्मासावसाने तु हीनमित्यभिधीयते।
अत्यन्तसदृशा देहे राजचोरभयादिषु॥ 2749
अग्निवारिभये तद्वत् प्रवासे सूततद्वयोः।
गुरौ कार्याग्नि देवाग्निकार्येषु नित्यहानि न दोषभाक्॥ 2750
प्रातश्चर्यानि विनाप्यत्र तद्ध्याने द्विगुणं चरेत्।
चतुर्गुणं समाधिश्चेदाचार्यमूलं शतद्वयम्॥ 2751
अपसव्यं अकृत्वा वा नाचा...लमुत्सृजेत्।
उपोष्य पञ्चगव्याशी जपेद्घोरशतद्वयम्॥ 2752
यद्यन्यदिङ्मुखं कुर्यात् कृतं मूत्रं शतं जपेत्।
नासापीडं न्यनीवद्रु नग्नमादि संभवे॥ 2753
प्राणायामत्रयं कुर्यात् प्रणवेन त्रिसङ्ख्या
तदात्वकादिकं पश्येत् अघोरेण शतं जपेत्॥ 2754
प्राकारे तोरणे द्वारे गुआयारचत्वरेऽर्चिते।
चतुष्पथे च शृंगाटे नदीमध्ये च संगमे॥ 2755

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकवस्त्रे तथा कूपे विण्मूत्रं कुरुते यदा।
अकामाच्छिशतं घोरं जपेद्घोरशतत्रयम् ॥ 2756
ऊषरे च जले कृष्टे नदीतीरे द्रुमस्तके।
शकृन्मूत्रं तु यः कुर्याद्दिसौ घ्यघोरशतं जपेत्॥ 2257
अपसव्यो यदा वामे तनुकृद्दय बहिः सृजेत्।
उपोष्य पञ्चगव्याशी जपेद्घोरशतत्रयम्॥ 2758
संध्याकालपरिभ्रंशे शिवैकादशं जपेत्।
संध्यात्रयपरिभ्रष्टे शिवैकादशात्रयम्॥ 2759
सकृत्संध्याविलोपे तु अजाख्ये शतं जपेत्।
त्रिकाललोपात्त्रिगुणं सोपवासस्तु कामतः॥ 2760
तद्धीनं सरुजो जप्त्वा संध्यां वन्देत पूर्ववत्।
सरुजस्नानहीनश्चेत् शिवैकादशकं जपेत्॥ 2761
जप्त्वा संध्यां प्रकुर्वीत निरुज स्नानमाचरेत्।
निरुजस्नानहीनश्च सद्योजातशतत्रयम्॥ 2762
चतुर्थ्यामपि संध्यायां पूर्ववच्च चतुर्गुणम्।
बहु दैवसिके नष्टे होमगस्यूपवासकैः॥ 2763
सरुजस्य सहस्रैकं नीरुजस्यायुतद्वयं।
पुष्पोच्चयनकालेन तृणकाष्ठादि छेदने॥ 2764
विना चंद्रोपरागेण साधनानि व्रतानि च।
पूजयित्वा प्रमादेन गायत्र्याष्टौ शतं जपेत्॥ 2765
मुमुक्षोः सर्वदा शास्ता शिवपूजा न वार्यते।
पने) द्वारपालार्चना हीने पञ्चशुद्धि विलोपने॥ 2766
आसनस्कंद हानौ च दशसंस्कार लोपने।
तदनुक्रमभंगे तु रूपिणं शतशो जपेत्॥ 2767
सद्यो लोपं त्रिधा वक्त्र जप.. पूर्ववशाहरेत्।
पाद्यमाचमनार्घ्याणां लोपे सद्यं नरं जपेत्॥ 2768
p. 2. 139) क्रमाद्दिशा जपे हीने दूर्वापुष्पा.. तादिके।
शतं जपेन्नरं हीने संगादौ हृदयं शतम्॥ 2769
पञ्चगव्यामृते हीने त्यर्घ्य द्रव्य विलोपने।
पूर्वोक्ताहीन्त्वाजप्यं स्नानीये हृदयं शतम्॥ 2770

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हुत्वा गडुक संख्याया मूलं शतगुणं जपेत्।
लिङ्गे गङ्गाभिघाते तु शब्देप्ययुतं जपेत्॥ 2771
प्राण्यंगधूपदाने तु पश्चिमस्य शतं जपेत्।
हीने धूपे च दीपे च नीराजन विलोपने॥ 2772
घोरं शतं जपेज्जले हीने वा पुष्पले शतः।
ईशानं प्रजपेद्ध्यात तद्द्वयं द्विगुणं तत्॥ 2773
तत्र.) केशास्थि पाषिकीटादि दुष्टे नैवेद्य दर्शने।
स्मि) अघोरस्यायुतं कामादकामात्तु शतं जपेत्॥ 2774
नित्य नैवेद्यमानस्य ह्रासे घोरशतद्वयम्।
प्रमादादामिषं देव हुत्वा घोरशताच्छुचिः॥ 2775
रच्छु) अदत्ते दर्पणे छत्रे चामरे च जपेत्तदा।
अघोरस्य शतं कामादकामात्तु तदर्धतः॥ 2776
श्रेष्ठाश्रू रुधिरंसन्ति द्रव्यश्चेत् पूजितः शिवः।
शिवाय तत्तद्द्रव्येषु नखरोमादिदर्शने॥ 2777
पञ्चगव्येन संस्नाप्य जपेद्घोरशतत्रयं।
प्राये वा नियतद्रव्य हीने मूलशतं जपेत्॥ 2778
पूर्वनियमित द्रव्यादाधिक्ये द्रव्यवर्धनम्।
पूज्यमानं यदालिंगं हस्तादि स्पर्शतो मनाक्॥ 2779
चलितं घोरमन्त्रस्य शतं जप्त्वा विशुद्ध्यति।
प्रमादाज्जपभंगे तु तत्संख्या पूर्यतेत्समं॥ 2780
अकामतो जपेच्चैव कामतस्तु चतुर्गुणम्।
ध्या) प्रमादाद्ध्यान विच्छेदे द्विगुणं ध्यानमाचरेत्॥ 2781
आवाहने विसर्गे च रोघ्याद्यर्घमुपयुज्यते।
शिवाग्निपानां पूजांते पाद्येचाचमनीयके॥ 2782
. . . . रेपश्चदर्ध्ये प्रोक्षणादौच तत्तत-।
तेषां . . . . . . -विपत्तिते॥ 2783
शतद्वयात्सहस्राच्च तदर्धाच्छुद्ध्यतेक्रमात्।
स्थण्डिले तु . . . . . स्थापनादि . . . . .॥ 2784
असमाप्ते समाप्ते वा प्रमाणे च विसर्जिते।
उपयाते तु सञ्जाते अर्चा पुष्पादितो मनाक्॥ 2785

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संहृत्य घोरमंत्रेण जुहुयुश्शतपञ्चकम्।
सहस्रं पञ्चका यद्वा सोपवासं तथा जपेत्॥ 2786
सैन्धे ग्नापविसृज्यैवं प्रक्षिप्तेग्नौ शतं जपेत्।
नित्यनैमित्तिके काम्ये जपे निष्कृतिरीरिता॥ 2787
लिंगं यदा शून्यमस्तकं यदि दोषदम्।
तदा घोरशतं जप्त्वा पुष्पाद्यैर्द्विगुणं यजेत्॥ 2788
पूर्वकाला वचितस्थान पुष्पाद्ये समुपस्थिते।
लिंगादौ पूजिते घोरं जप्त्वा त्रिशतमर्चयेत्॥ 2789
P-2-140) पूजायां होमकाले च जपे च विमतिर्भवेत्।
अघ्याग णेशरूपं च तन्मन्त्रस्य शतं जपेत्॥ 2790
एकाह पूजा लोपश्चेत् सहस्रं दक्षिणं जपेत्।
त्रिकाल पूजनं येषां एककालमथापि वा॥ 2791
प्रायश्चित्तं समं तेषां नन्यूनं नाधिकं भवेत्।
त्रिकाल पूजकानां तु द्वैककालविलोपने॥ 2792
सहस्रं रूपिणा कामात् वोपवासस्तु कामतः।
द्वितीयं दिनमारभ्य बहुरूप सहस्रकम्॥ 2793
त्रिशतोत्तरया वृद्धि वर्धयेत्प्रति वासरम्।
विलोपे पक्षपूजायां जपेद्घोरायुत द्वयम्॥ 2794
द्विगुणं मासलोपे द्व्ययुतं वर्धयेत्ततः।
मासि मासि महासेन यावत्संवत्सरावधि॥ 2795
वत्सरोर्ध्वं विलोपेत्तु दीक्षयैव विशुध्यति।
ह्रासयेत्सोमसंख्याच तस्माद्दशगुणं जपेत्॥ 2796
मंत्रार्पितमना भूत्वा सकलीकृतविग्रहः।
होमयेदेकचित्तस्तु मंत्री तन्मयतां गतः॥ 2797
यवैश्च जुहुयान्मंत्री जपे द्वापि समाहितः।
शब्द तत्वोपरि लीनः स्वसिद्धः फलभाग्भवेत्॥ 2798
होमाशक्तोऽपि सामग्री हीनस्तत्काल एव तु।
जप्त्वा दशगुणं होम संख्या भक्त्या निवेदयेत्॥ 2799

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नित्यवद्धोमलोपे तु प्रायश्चित्तं समादिशेत्।
स) निर्वाणे शाम्भवे वह्नौ त्रिरात्रं समुपोषितम्॥ 2800
अयुतं रूपिणो जप्त्वा ततश्शुध्यति साधकः।
व्रतस्य क्रियायाश्च नियमस्य विलोपने॥ 2801
त्या) गायत्र्याष्टशतं जप्त्वा निश्चित्रं तादृशं चरेत्।
न चैकाहन्त्याहं वा पञ्चाहादिकभोजनम्॥ 2802
कृच्छ्र चान्द्रायणादीनि व्रतमित्यभिधीयते।
प्रदक्षिणनमस्कार देवयात्रादयः क्रियाः॥ 2803
अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवः।
अप्रमादश्च तु पञ्चैते नियमाः परिकीर्तिताः॥ 2804
असंपूज्य नैभुंजीयात् शिवमाव्रणसंचरात्।
यदि पापेन भुंजीत स्वैरं तस्य न निष्कृतिः॥ 2805
प्रमादेन तु भुंक्ते तु भुक्तं चैतद् वीर्यं प्रयत्नतः।
स्नात्वा द्विगुणमभ्यर्च्य देवं देवीमुपोष्य च॥ 2806
शिवस्यायुतमभ्यस्येत् ब्रह्मचर्यपुरस्सरं।
परेद्युः शक्तितो दद्यात् सुवर्णादिं शिवाय वा॥ 2807
शिव भक्ताय वा कृत्वा महापूजां शुचिर्भवेत्।
स्वायंभुवे॥ मोहादज्ञानतो वापि अप्रसुप्ते जनार्दने॥ 2808
पवित्रं कारयेद्यस्तु स पापी वाप मोहितः।
पञ्चदिनमनाहारो जपेत्पञ्चायुतं भवेत्॥ 2809
शुद्धिमेवं समरयेति नान्यथा तु कदाचन।
p. 2. 141) भद्राचूदृवं न कुर्वीत सिद्धांते दोषभाग्भवेत्॥ 2810
पक्षद्वयमघोरस्य जप्त्वाचैवं विशुध्यति।
दैवात्तदज्ञानतो वापि नाषाढादि त्रये कृतः॥ 2811
तत्राप्येवं विनिर्दिष्टं प्रायश्चित्तं पुरन्दर।
रोगाग्निवृद्धि संयुक्तः प्रवासी राजपीडितः॥ 2812
उक्तमासत्रये यस्तु न कुर्यात्सूत्ररोहणं।
असौ कन्यागते भानौ जप्त्वा दशाण्डनायुतं॥ 2813

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुर्यात्पवित्रकं शंभोः तुलायां न कदाचन।
लिङ्गे पादेन संस्पृष्टे लंघिते वाऽयुतद्वयम्॥ 2814
अज्ञात्पाद रजस्पर्शे शुद्धिरुक्ता कपर्दिना।
सहस्रलुठिते लिङ्गे द्विगुणं परिवर्तयेत्॥ 2815
शुद्धिश्चमृते लक्षाच्च तु मूत्र पुरीषयोः।
श्लेष्मणोपहते लिङ्गे यदि वा श्लेष्मवारिणा॥ 2816
त्रयुतद्वयुतं वा स्यात् क्रमेण परिवर्तयेत्।
मूत्रोदकेन संस्पृष्टे जपेत्सद्यायुतद्वयम्॥ 2817
रक्तमूत्ररजः शुक्ल दूतैर्युग पञ्चकम्।
तत्संयुक्तोदकस्पर्शात् पादहीनं जपेदिदम्॥ 2818
लक्षं तु विष्ठयास्पृष्टे पादहीनं तदम्भसा।
तद्वन्निर्माल्यगर्तेऽपि पतनाच्छुद्धिमादिशेत्॥ 2819
विष्ठागर्ते निपाते तु लक्षमघोरमघो जपेत्।
शिवसंस्कारहीनैश्च स्पृष्टे लिङ्गे द्विजातिभिः॥ 2820
क्रमाज्जपेदघोरस्य वृद्ध्यैकोत्तरया शतम्।
स्पृष्टे तु दशसाहस्रं - - - - . कदापि॥ 2821
स्पृ . - - . - - - - - . जपेत्।
अयुतद्वय . - - - . रस्यायुतैः - - - .॥ 2822
अस्यायुतैर्वर्णैः दीक्षितैः श्वपचादिभिः।
स्पृष्टे तु द्विगुणैरेभिः जीवलिङ्गे विशुध्यति॥ 2823
रजस्त्री पतिताशौची कर्मारैः स्पर्शिते सति।
शिल्पिभिः बाणचण्डाल रजकाद्यैरथापि वा॥ 2824
स्पृष्टे लिङ्गे तथा पीठे व्यक्ते वाप्युभयात्मिके।
महास्नानं प्रकर्तव्यं तथाघोरायुतं जपेत्॥ 2825
स्वस्त्रोतैर्दीक्षितैः लिङ्गं यथा स्पृष्टं न दोषभाक्।
वामदक्षिणमार्गस्थैः स्पृष्टे लिङ्गे प्रमादतः॥ 2826
अद्भुताच्चयते मन्त्री महास्नानैश्च नान्यथा।
पयोदधि घृतं क्षौद्रं द्विसहस्रफलेन तु॥ 2827

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तक्कोल जातिपुन्नाग श्रीफलानां तथैव च।
तथावर्तो महावर्तो शिवस्याग्रे प्रकल्पयेत्॥ 2228
हस्तादैः पतिते लिंगे त्र्यंगुलादंगुले गुले।
P. 2. 142) वृद्धेः सहस्र वृद्धिः स्यात्सहस्रात्प्रभृतिक्रमात्॥ 2229
साध्ये पतिते लिंगे ताले ताले युतं जपेत्।
द्विगुणं तु निराधारे कल्पयन्यूनाधिके ततः॥ 2230
अकामतो यतो लिंगं च्युतं पुरुषमानतः।
विशीर्णं सर्वभावेन प्रायश्चित्तं तदा नहि॥ 2231
अस्यार्थे ... शलाकाया भेदे पापमहत्तरम्।
जायते तेन कर्तव्यो न प्रमादो न कर्हिचित्। 2232
अघोरादपरो नास्ति महापातकनाशनम्।
त्रिगुणो तस्य जप्तव्यो महापापानुत्तये॥ 2233
कामतस्तु यदा लिंगं विशीर्णं परितो भवेत्।
प्रायश्चित्तं न तत्रास्ति इति सत्यं तथा वचः॥ 2234
स्वेष्टलिंगे परा यस्तु परेणैव कृतो यदि।
द्विगुणं स्वकृतात्कार्यात् प्रायश्चित्तं विशुद्धये॥ 2235
हृते) स्वेष्टलिंगे परायत्ते नष्टे दग्धे हृतेऽपि वा।
नीते वा मूषिकादीनां काककौलेयवानरैः॥ 2236
जप्त्वा लक्षमघोरस्य विधिनालिंगकांतरं।
प्रतिष्ठाप्य भवच्छुद्धि पिण्डिकायां तथैव च॥ 2237
हस्तात्तु पतिते लिंगे जले वहति वा स्थिते।
तत्रापि लक्षमावृत्य पुनस्संस्कारमर्हति॥ 2238
कां) त्र्युताद्दग्निना लीढे डत्र कौतिने हीयते।
व्यंगितं दृष्टिविच्छायां सेवितं श्वपचादिभिः॥ 2239
पतितं घोरगतादौ हृतं राजादिभिर्यथा।
परित्यजेत् तदा लिंगं जप्त्वा घोराणुना युतं॥ 2240
लिंगांतरं प्रतिष्ठाप्य विशुद्धिमधिगच्छति।
लक्षं तु स्थिरमुन्मूलय स्थापयेच्च तदैव हि॥ 2241
प्रमादाच्चलिते लिंगे स्थिरे वा चलसंज्ञिके।
पीठे वा पिण्डिकायां वापि विद्यालक्षं जपेद्बुधः॥ 2242
ये) लिंगच्छाया .. राच्छायां लिंगिनां यदि लंघनेत्।
शतत्रयं जपेद्घोरं तदा गोकर्णसे तत॥ 2243

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अक्षसूत्र परीक्षण शुद्धिलिंगोक्त पादुतः।
लिख्यते तद्विशेषोऽत्र यो दृष्टः परमेश्वरः॥ 2244
सूत्रके तु नवे छिन्ने सहस्रं परिवर्तयेत्।
शतं तु जीर्णके सूत्रे दुस्त्याज्ञं शतका शतं॥ 2245
अक्षमालां करभ्रष्टां आज्येदंभवारिणा।
गायत्र्या शतजप्तेन सर्वत्रैष विधिस्ततः॥ 2246
अक्षसूत्रे त्यजस्पृष्टे गायत्र्यैव सहस्रकं।
पादयोः पतिते तस्मिन् जपेद्घोरं सहस्रकम्॥ 2247
मेरोविलंघिनो मंत्री जपेद्घोरसहस्रकं।
चण्डाया मपराधेतु लिंगोक्तादष्टमागतः॥ 2248
पूजोपकरणं यत्किंचित् स्पृष्ट्वा पीठादिकं पदा।
शतद्वयमघोरस्य कामतः त्वयुतं जपेत्॥ 2249
यो निन्दति गुरुं लिंगं शिवशास्त्रं च लिंगिनं॥
तस्मात्स्नानान्न जं दूरं सद्योजातशतं जपेत्॥ 2250
(शाजात) मोक्षदे बौध्दे वाम चौलके क्रूरभक्षणोत्॥
लक्षात्तल आद्यतिक शुद्धिः तत्पादेन च कल्पयेत्॥ 2251
P.2.143) षड्गुणा दीपघाते तु रक्ते स्याद्द्विगुणा चिरुचिम्॥
शस्त्रै शत गुणा गुरुं ज्ञात्वान्यत्र प्रकल्पयेत्॥ 2252
ततः कुर्यद्यथा शक्त्या कृच्छ्र चांद्रायणादिकं॥
व्रतान्ते पूर्ववद्दीक्षा ग्राह्या ~~स्नस्था~~ पंचाब्जपूर्विका॥ 2253
सर्वस्वं च गुरोर्दद्यात् तदा शुद्धिर्भवेन्नृणाम्॥
शिवस्य शिवमंत्रस्य शैवाचार्यस्य शैवके॥ 2254
निन्दकान्विनिहत्याशु समयान्न विलुप्यते॥
हत्वा तांस्तु न दोषोऽस्ति दैवाग्निगुरुपातकान्॥ 2255
आत्मघाती गुरोर्घाती घाती चैव परस्परम्॥
प्रमादाद्धननं कृत्वा प्रायश्चित्तं विधिकृतिः॥ 2256
विनालक्षं जपं तस्य . . . . प्रिये।
गुरुं संतोष्य यत्नेन पुनस्संस्कारमर्हति॥ 2257
गुरुयत्र परीतापी निन्दा वाऽपि प्रयुज्यते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं ततोऽन्यतः॥ 2258

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवव्रतधरे यस्मिन् देशिको साधकादिको।
तेषां तु रक्तपातेन लक्षजापेन शुध्यति॥ 2254
दण्डघातादिकं रक्तं यदा रक्तं न दृश्यते।
तदर्धाच्छुध्यते मंत्री पूजयेत्पादवंदनैः॥ 2255
महास्नानादिकं कार्यं गुरुद्रोहादिके कृते।
जृंभकान् कुष्ठकामादीन् दूरे कुर्याद्गुरोस्सदा॥ 2256
प्रमादादन्यथा कृत्वा वामदेवशतं जपेत्।
प्रायश्चित्तेऽथवा नित्ये स्वगुरून् यदि योजितः॥ 2257
प्रायश्चित्तं तदा कार्यं लक्षैकं दक्षिणस्य तु।
तस्मात् सर्वप्रयत्नेन स्वगुरून्नातियोजयेत्॥ 2258
स्वगुरौ यदि भवेज्ज्ञाता गुरुपुत्रो विशेषतः।
आज्ञादानेन दोषं तु लक्षपातेन शुध्यति॥ 2259
गुरुरथ्यापनं यानं पादुकोपानहौ तथा।
त्वा) अकामाद्रोहणः कृत्वा सहस्रावर्तनाच्छुचिः॥ 2260
ज्ञात्वा यदा रुहेत्प्राज्ञा जपेत्सर्वाङ्गभूषणं।
सर्वाङ्गभूषणं वस्त्रं चित्रं पत्न्यां न संस्पृशेत्॥ 2261
पादुकोपानहौ शय्यामासनं च तथैव च।
न्त) पत्न्यां स्पृष्ट्वा प्रमादाद्यः शिरसा धारयन्जपेत्॥ 2261
अघोरद्विशतं मंत्री कामतः षडुणं जपेत्।
गोसहस्रफलं प्राप्य गुरोः पादाभिवंदनात्॥ 2262
जिगीषामात्मनो वाच्य कृत्वा पञ्चशतं जपेत्।
गुरोरादेशभागे च सकामाद् सुतं जपेत्॥ 2263
अकामाच्च सहस्रं तु तथा तत्सान्निध्यौ जपन्।
गुरुद्रव्याभिलाषी चेत् शिवमंत्रं शतं जपेत्॥ 2264
आसनं शयनं यानं प्रमादात् गुरुसन्निध्यौ।
ध्ये) गतेनारुह्य जप्तेन भवेच्छुद्धिरकामतः॥ 2265
कामतः षडुणं जप्त्वा अघोरेणैव शुध्यति।
वै.. न्ये देश वादे वा विरुद्ध कल्पितं यदि॥ 2266
ज्येष्ठादि स्महान्यैर्वा प्रायश्चित्तं शतं जपेत्।
गुरूणामपि संजल्पं कृत्वा रोषान्विते स्थितः॥ 2267

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जप्त्वाचाष्टसहस्रं तु अघोरस्य भवेच्छुचिः।
तत्पुनस्तु विशेषेण वन्दयित्वा क्षमापयेत्॥ 2268
न नमंती च या मोहात् क्रमायातान्महत्तरान्।
तेषामप्ययुताच्छुद्धिः अनुपानान्न भवे प्रिये॥ 2269
p. 2.144) गुरोः कृत्वापवादं च यथा मंत्री शिवस्य तु।
गायत्र्या दशसहस्रेण प्रमादाच्छुध्यते भृशं॥ 2269
गुरोर्निन्दापवादे तु जपेद्वा कस्य लेशतः।
आचार्यं तु शिवं ज्ञेयं तन्निशायां शतं जपेत्॥ 2270
गुरुं जपाल्लङ्घेद्यस्तु पृष्ठालापैश्च मूढधीः।
उपवासत्रयं कृत्वा जपेद्घोरशतत्रयम्॥ 2271
समयी वा परन्यस्तु पुत्रकश्च विशेषतः।
कृत्वा निन्द्रां ततः तेषां तदर्धेन विशुध्यति॥ 2272
गुरुपुत्रं गुरोर्जायां निन्दयेद्यस्तु दीक्षितः।
ईशानस्य शतं जप्त्वा ततश्शुद्धिं अवाप्नुयात्॥ 2273
विण्मूत्रं कुरुते यस्तु गृहभागे गुरोः प्रिये।
सोऽपि जप्त्वाऽयुतं चैकं मूलमंत्रस्य शुध्यति॥ 2274
गुरुदेवाग्निदेवानां सन्निधौ स्वानगोचरे।
परिहासं तथा दर्पं कृत्वा पञ्चपवित्रकम्॥ 2275
दशवारं जपेन्मंत्री वर्णं कृत्वा बभाषणात्।
गुरोस्थान विनाशी च तस्याचारस्य लंघकः॥ 2276
स्वागमस्य विरोधी च अस्तीति स्थितिरोधकः।
स्यक्ताचारविरुद्धश्चेत्प्रायश्चित्तं तु मागतिः॥ 2277
दशलक्षं जपं तस्य ज्ञातव्यं शास्त्रवेदिभिः।
यस्त्वपेक्षो गुरुद्रव्यं हानिर्यत्रोपजायते॥ 2278
तत्र लक्षं जपेदेकं पुत्राहीनस्तदर्चकम्।
गुरुस्तु भक्तितः पूज्यो न तं कर्मणि योजयेत्॥ 2279
योजयेत्प्रमादेन सहस्रं दक्षिणं जपेत्।
शान्त्यादौ देशिकाद्यः प्रतिष्ठायां विशेषतः॥ 2280
स्वगुरुर्न नियोक्तव्यो पूजाजप्यादिकर्मसु।
साधके च तथा योज्या साधकास्ते स्वभावतः॥ 2281

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिववत्सगुरुस्तद्वत् ज्ञातव्या देशिकादयः।
शाखकास्तद्वदेवोक्तं पुत्रका भ्रातृवन्मताः॥ 2282
मित्रवत्समयस्थाश्च द्रष्टव्याश्शिवमिच्छता।
स्वगुरुस्तदन्ययो भ्राता तत्पुत्रा ये विशेषतः॥ 2283
आज्ञादानेन तेषां तु लक्षवादे न शुद्ध्यति।
दीक्षा परैव कर्तव्या पवित्रारोहणं तदा॥ 2284
गुरुपुत्रं यथायोग्यं त्यक्त्वान्यं परिकल्पयेत्।
निर्मल.. वै दीक्षा महाकल्पं प्रकर्तव्यः॥ 2285
दीक्षया हन्यते पूर्व दीक्षा च नश्यति।
. . . . निर्वाणाक्षरी निष्पनोगापिना॥ 2286
भार्गवे गुरुशिरव्यं च स्वस्थ तंत्राविलं पुना।
अज्ञात्वा शास्त्रसद्भावं अज्ञात्वा तत्वसंचयं॥ 2287
दीक्षां करोति यो मोहात् गुरुश्चनारकी भवेत्।
पञ्चलक्षं जपेद्घोरं यदिवाञ्छि . . . ा . . हनं॥ 2288
अयोग्यानग्रके कुर्यात् आत्मादीक्षा कुरुस्वयम्।
देवप्रतिष्ठा दीक्षां वा योनिस्यात् क्षत्रियादिषु॥ 2289
कुर्याच्चेत्त्व बहुरूपस्य शुद्धो जप्त्वा युतं जपेत्।
पुस्तके पतिते हस्तात् स्थापिते यत्र कुत्रचित्॥ 2290
तस्मिस्त्रे भूगते वाल भूमौ पुस्तकनाशने।
आसने शयने वाच्य पटले वा ग्रहस्य च॥ 2291
घोरपञ्चशतं जप्यं कामतस्तु द्विगुणा भवेत्।
ज्ञानं शास्त्रं तथा मंत्रं देहाल्लोभात्प्रकाशयेत्॥ 2292
सहस्रं तु जपेत् मंत्री प्रायश्चित्तं विधीयते।
p. L. 145 उपरोध्या तथा स्नेहात् कृत्वा शांति जपवर्धके॥ 2293
शातत्र याश्रवेत् बुद्धिः बहुरूपस्य नान्यथा।
अनध्याये पठेच्छास्त्रं जपेदष्टसहस्रकम्॥ 2294
दा) नियमेन पठेद्यत्र तत्र दोषो न विद्यते।
गारुडं भूततंत्रं च लोभात्स्नेहाद्विवर्जयेत्॥ 2295
प्रमादात्कुरुते यस्तु बहुरूपशताच्छुचिः।
तत्राचारान् यथा निन्द्येत् अघोराष्टशतं जपेत्॥ 2296
सहस्रं तु जपेद्देवी शांति हरति वै तदा।
प्रतिमालिंगशास्त्राणां विक्रये ब्रह्महा भवेत्॥ 2297

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स एव गुरुहन्ता च मातृहा पितृहा तथा।
प्रमादाद्विक्रयेद्घोरं लक्षं जपेन शुध्यति॥ 2298
कामतस्तु तथैतस्य त्रिगुणं परिकीर्तितम्।
जीर्णाङ्गं यस्वलिङ्गं तं पुस्तकं तद्धृतप्लुतम्॥ 2299
अग्निकुण्डे तु होतव्यं हुत्वा घोरशतं जपेत्।
वादेन कामतस्पृष्ट्वा गुरुं देवं शिवागमम्॥ 2300
अयुतं घोरमन्त्रस्य कामतः षड्गुणं जपेत्।
अकामादयुतं प्रोक्तं होमगव्योपवासकैः॥ 2301
शा) महेश गुरुचण्डाला भंगे लक्षमुदीरितं।
आनुष्ठितद्रव्यरक्षणात् पादवर्जितव्यम्॥ 2302
यद्या पुष्पवती नारी नालिङ्गं द्या यजेच्छिवं।
अलाभे घोरमन्त्रस्य शतं जप्त्वा शिवं यजेत्॥ 2303
अन्तर्यागोऽथवा ध्यानं पूर्वदिनत्रये।
ऋतुस्नाता यदा पत्नी तदा पञ्चदिनावधि॥ 2304
सेव्या द्विजेण पुत्रार्थं अन्यथा गुणहा भवेत्।
सततायुश्चरेद्विप्रो मैथुनं काममोहितः॥ 2305
स विप्रः खरो विज्ञेयः सर्वकर्मबहिष्कृतः।
रजो दिवा चेद्याह त्रितयं शर्वनाशिनी॥ 2306
तृतीयांशे यदि प्रातः त्र्यहं दिनमिष्यते।
. . . . . रजस्वला मलवस्त्रेण संयुता॥ 2307
स्पृष्ट्वा यद्यस्तु तद्दृष्टं न तु तत्सन्निकर्षितः।
चण्डालस्त्रीत्रको दृष्ट्वा शवतं द्वाहिसूतकान्॥ 2308
स्पृष्ट्वा बन्धुमृतिं श्रुत्वा नाद्यात् आस्नानकालतः।
अभक्तान्यथ वा भुक्त्वा प्राजापत्यं समाचरेत्॥ 2309
अस्नात्वा यदि भुञ्जीत व्रतं चान्द्रायणं चरेत्।
~~भुञ्जीत व्रत~~) ब्राह्मणी शूद्राविट्क्षत्रस्त्रीरुदक्या स्पृशेद्यदि॥ 2310
कृच्छ्रं पादोदमर्धं च क्रमात् कृत्वा विशुध्यति।
शूद्रायाः क्रमशो . . . . . गोपवासकैः॥ 2311
विट्शूद्रौ क्षत्रियस्पृष्ट्वा शुध्येत्पादार्धकृच्छ्रतः।
वैश्यजाः क्षत्रियशूद्र स्पर्शने यस्तु कृच्छ्रतः॥ 2312
शूद्रे पूर्वे तु संस्पृश्य दाने नैव विशुध्यति।
रजस्वलानु भुंजानः मोहात्स्पृष्ट्वा शिवादिभिः॥ 2313

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्र्य) अयेहे पर्यवे नैव कृच्छ्रं चांद्रायणं चरेत्।
रजस्वलानुभुंजानो दिवा रात्रे यदा स्पृशेत्॥ 2314
p.2-146) उपवासत्रयं कृत्वा ब्रह्मकूर्चेण शुध्यति।
. . . . वा यदि चण्डालमुच्छिष्टश्चेत् प्रविश्यति॥ 2315
आसनादुपवासस्स्यात् भुक्तौ चांद्रायणं चरेत्।
सगोत्रे रजस्वले स्पृष्टे दितश्चोपवसेत्त्र्यहम्॥ 2316
उदक्यों दक्यया स्पृष्ट्वा स्नात्वोपोष्य विशुध्यति।
संभाषणे तथा शुध्येत् भुक्त्वा स्पृष्ट्वा रजस्वलाम्॥ 2317
आस्नान कालन्नाश्नीयात् पञ्चगव्यं पिबेन्नतः।
शास्ते सूतकाश्चैव वर्तमाने रजेयदि॥ 2318
सा स्नात्वा भोजनं कुर्यात् कृत्वायोपवसेद्दहः।
शावाशौचमुदक्याया सूतकं वा भवेद्यदि॥ 2319
मध्येऽग्निषिच्य भुञ्जीत पृष्ठोच्छिष्टेन कृच्छ्रतः।
शावाशौचकंसंस्पृश्य स्नानोद्ध्वे त्र्ययहाच्छुचिः॥ 2320
रजस्वला मृतसूतके भुक्त्वा वीत्वाल कृच्छ्रतः॥
अप्रयाते:॥ न वस्त्रपीडनं कुर्यात् नान्यद्वा नोपवसेतु सा॥ 2321
स्नात्वा स्पृष्ट्वा त्वरामन्यो दश कृत्वा क्रमाद्दश:।
वाससः . . . . ॥ 2322
स्नानादस्नानं चतुर्थे हि षण्णाडि विगमे परं।
. . . . ॥ 2323
. . . . अग्निनार्चितः।
शयनं क्षालयेदंभः प्रोक्षणाद्वैरलेपनम्॥ 2324
यद्देशस्वापभुक्ती तत् गोमयेन विशुध्यति।
ऋतुस्नाता बला स्नेहात् नान्यं पश्येत् पतिविना॥ 2325
यत्र भूमौ तृणमन्यास्ति जलं वोदक्यया सह।
गोवालव्यजनाद्दर्भे वकि स्नातस्तत्र विधीयते॥ 2326
तृणड्यो) गोवालव्यजनं दर्भो यद्वा पौरुषमानतः॥
तृणकाष्ठा न वा तेषां कुण्डयेनांतर्हिते न वा॥ 2327
गोवालव्यजने वापि स्नानं तत्र न विद्यते॥
कर्ममध्ये तु तान्दृष्ट्वा गृहस्थः प्रणवं जपेत्।
कृते व्रती) आदित्य दर्शनं कुर्यात् प्राणायामे कृते व्रती॥ 2328

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकवृषसमारूढौ चण्डालोऽन्य रजस्वला।
एक रात्रोषितौ भूत्वा पञ्चगव्येन शुध्यति॥ 2329
आ द्वादशाहान्नारीणां मूत्रवच्छौचमिष्यते।
अष्टादशाहात्स्नानस्य त्रिरात्रं परतो शुचिः॥ 2330
रजस्वला तु या नारी पुनरेव रजस्वला।
सा विंशति दिनादूर्ध्वं त्रिरात्रमशुचिर्भवेत्। 2331
स्नायात्संप्रोक्ष्य दन्तादि मलामृत्तिकया जुहुः।
पञ्चगव्यं घृतं वापि पूज्य संपूजयेच्छिवम्॥ 2332
अन्तर्यागं प्रकर्तव्या तथा पूर्वदिनत्रये।
यद्वान्ते घोरमंत्रस्य सहस्रं परिवर्तयेत्॥ 2333
स्वजात्युक्त्या संस्पृष्टः कामाद्यदि शिवं यजेत्।
स्वजातीश्वर मंत्रस्य सहस्रं प्रजपेत्तदा॥ 2334
अज्ञानतोऽर्चनस्य तदर्थो ज्ञायते शुचिः।
जपेदष्टोत्तरशतं संदेहे समुपस्थिते॥ 2335
हीन जातीय संस्पृश्ये क्रमात्त्रिचतुर्गुणम्।
उत्कृष्ट जाति संस्पर्शे हीनं तस्यार्धमाचरेत्॥ 2336
सूतकान्तरे भक्त्या कर्तव्यं चान्यमैश्वरं।
तदन्ते वा पञ्चगव्याशी यजेच्छिवमनावृतौ॥ 2337
दिवसे (क्रियते) वा प्रसूयेत रात्रिभागेऽष्टमे यदि।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥ 2338
रात्रौ स्त्रीणां रजो योगे जन्म मृत्याश्च संभवे।
P. 2. 147) आद्यमेव दिनं ग्राह्यं यावन्नोदयते रविः॥ 2339
अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिकं।
दशरात्रेण शुध्यन्ति भूमिस्थमुदकं नवं॥ 2340
अंकुरादौ च तीर्थान्ते सूतक प्रेतको यदि।
उत्सवादि क्रिया काले मध्ये दोषो न विद्यते॥ 2341
याग कर्तुश्च पित्रोश्च मृते सूतिर्न विद्यते।
पित्रोः संस्कार कर्ता चेत् कुर्यात्संस्कारमात्रकं॥ 2342
पूर्ववद्यागकर्माणि कुर्याद्यागावसानकम्। 2343
यागान्ते सूतकं प्रोक्तं पित्रोः कर्माणि कारयेत्॥
यागप्रारंभमात्रस्य देहस्यालस्य संभवे। 2344
तस्य पुत्रोऽन्य वा पौत्रौ शिष्यो वा तदभावतः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ज्येष्ठो वाऽथ कनिष्ठो वा ज्ञातिर्वा सर्वमाचरेत्।
सगोत्रसंभवो वाथ शेषयागं समाचरेत्॥ 2345
आचार्य संकटे दोष शान्त्यर्थं शांतिमाचरेत्।
जन्माशौचं मृताशौचं पूजाकाले श्रुतं यदि॥ 2346
आशौचौ न भवेत्तत्र पूजाशेषं समाचरेत्।
माता गौरी पिता रौद्री तस्मादीश्वरगोत्रजः॥ 2347
पत्नीहीनेन चाप्यत्र अर्चनं जपतर्पणम्।
दीक्षा प्रोक्षणकं चैव उत्सवस्नापनादिकम्॥ 2348
मंत्रतंत्रं विधेयं स्यात् सर्वकर्म समाचरेत्।
मंत्रतंत्रविहीनश्चेत् सर्वकर्मबहिष्कृतः॥ 2349
पत्नीहीनो न दोषाढ्यो शिवोऽहं भाव एव तु।
स्वयंभु लिंगे विच्छिन्ने अंगहीनेन दोषभाक्॥ 2350
पत्नीहीने तु संप्राप्ते अर्चनायां यदा तदा।
सर्वकर्म कृतं चेत्तु सफलं भवति ध्रुवम्॥ 2351
अर्चनाग्निकार्यश्च नित्योत्सव महोत्सवा।
स्नापनं च प्रतिष्ठाद्यं तत्सर्वं मन्त्रवद्भवेत्॥ 2352
द्विभार्या गर्भिणी चैव ज्येष्ठा भार्या प्रसूतिका।
वपनं नैव कर्तव्यं नाम कर्म न कारयेत्॥ 2353
कनिष्ठा प्रसवे पूर्वं वपनं नैव कारयेत्।
मातुस्तु पूर्वदीक्षायां पितुर्मरणसंभवे॥ 2354
वपनं नैव कुर्वीत मातृदीक्षावसानके।
मातृदीक्षावसानेऽपि पितृदीक्षा विरुध्यति॥ 2355
पितृदीक्षावसाने तु मातृदीक्षा नश्यति।
मातुस्तु पूर्वदीक्षायां पितुर्दहनमेव हि॥ 2356
पितुस्तु पूर्वदीक्षायां मातुस्तु वपनादिकं।
गर्भदीक्षारता मातृ ~~कुत्र~~ पितृदीक्षादिपूजकः॥ 2357
ध्रुवबेरप्रतिष्ठां च विना सर्वं समाचरेत्।
ध्रुवं च कौतुकं चैव उत्सवं यागमेव च॥ 2358
बलिबेरमिति प्रोक्तं पञ्चबेरप्रकीर्तितं इति-मृगेन्द्रे।
विवाहोत्सवयज्ञेषु चान्तरे मृतसूचकौ॥ 2359
पूर्वं संकल्पिताचार्य न दोषाय प्रकीर्तितं।
इति योगजे॥ पुत्रवान् वेदवान् विद्वान् ब्रह्मचारी जितेन्द्रियः॥ 2360

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धर्मवान् ज्ञानवांश्चैव सद्भैते साग्निकास्स्मृताः।
अनग्निकस्तु यो विप्रो साग्निको वेदपारगः॥ 2361
साग्निको वेदहीनश्चेत् अनग्निरिति निश्चयः।
इतिस्मृतौ॥ अनग्निस्तिवान् गुरोः पुत्रो पवित्री मंत्रवानपि॥ 2362
p. 2.148) प्रतिष्ठोत्सव दीक्षादीन् सर्वतंत्र समाचरेत्।
स्वयंभुलिंगं विच्छिन्नं शक्तिहीनं तु पूजयेत्॥ 2363
आचार्यहीन पत्नीहीनोऽपि पूजयेन्मंत्ररूपतः।
अनग्निकस्तु विप्रेन्द्रः न दोषाय प्रकल्पयेत्॥ 2364
दीक्षोत्सवादिकं कर्म क्षुद्रकं तु विधीयते।
प्रतिष्ठाकर्मकार्यन्तु भद्रकं चेति चोच्यते॥ 2365
पित्रोत्क्रमणा दीक्षा संभवे वत्सरांतकम्।
क्षुद्रकं कर्मकर्तुस्तत् न दोषो देशिकस्य तु॥ 2366
पित्रोरुत्क्रमणा दीक्षा संभवेद्देशिकस्य तु।
दीक्षाभिषेकं शिष्यस्य कर्तुः दोषो न विद्यते॥ 2367
वंशपुत्रस्तु) आचार्य ~~पुत्र~~ वंशपुत्रस्तु अनाचारोऽमंत्रवित्।
मत्प्रीति पूजया कृत्वा अन्यपूजां न कारयेत्॥ 2368
गुरुपुत्रो अनग्नीवान् पौत्रो दौहित्रिवानपि।
नित्यं नैमित्तिकं चैव सर्वकर्मसमाचरेत्॥ 2369
इति रौरवे॥ उपाध्याये गुरौ स्नेहे भूभृत्स्वालि दिनं तथा।
विवाह दीक्षा मध्ये तु ज्ञातीनां मरणे सति॥ 2370
त्रिशत्तिलोदकं कार्यं क्षुर कर्म न विद्यते।
स्वायंभुवे यथा लिंगे भंगदोषो न विद्यते॥ 2371
आचार्यस्य तथा चांगहीने दोषो न विद्यते॥
शिवीभूतस्य शिष्यस्य तृप्यन्त गुरुमृच्छति॥ 2372
अभावेन गुरोश्शिष्यं शिष्याभावे तु संततिः॥
सन्ततेस्स्य भावेन देहाख्यो भवेदिह॥ 2373
अन्येषां तद्धनादेयं तदायाति स्वगोचरम्॥
यद्वा शिखाय तद्द्रव्यं निवेद्यं शिखाग्नये॥ 2374
राक्षसो आदिके जीवे जाते . . . शौचं विधीयते॥
शुद्धशुद्धास्तदानीत दूध्वं दैहिक मिष्यते। 2375
आशौचीनां तु सर्वेषां प्राकारस्य प्रवेशनम्॥ 2375
अग्रमण्डपबाह्ये तु न दोषाय प्रकल्पितम्॥
आशौचे वा स्वकीये च गृहे वा सोन दोषकृत्॥ 2376
आशौचीनां समाप्तीनां सन्ध्योपांतिर मंत्रतः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न कार्यं लिङ्गसंस्पर्शं कार्यमतः शिवार्चनम्।
हन्ति वैराग्ययुक्तानां लिङ्गार्चाहितचेतसाम्॥ 2377
नाशौचं हि समस्तानां पूजाकाले मनीषिणाम्।
निर्वाणदीक्षितानां तु दूलक्ष पंकभुजं न तत्॥ 2378
त्यक्तबन्धुजनानां च विरक्तानां तपस्विनाम्।
नाशौचं विद्यते देही लौकिकार्थ पराङ्मुखः॥ 2379
शिष्यैकगुरुसंबन्धाः गुरुसंबन्धिनश्च ये।
संत्यजेयुस्त्र्यहं कर्म नित्यादन्यजपादिकम्॥ 2380
गोमहिष्या प्रसूतिश्चेत् भानुभार्गववासरे।
आद्ये सन्ततिविच्छित्तिः द्वितीये रोगपीडनम्॥ 2381
तृतीये धनहानिस्स्यात् चतुर्थे तु न दोषभाक्।
p.L.149) राजाभिषेके गर्भिण्यां कन्यादाने सुरार्चने॥ 2382
दीक्षाप्रोक्षणकाले च मासं पक्षादिना विना।
अन्यत्र दीक्षा: अभिषेके च शत्रुघ्ने विप्रादाधनार्जने॥ 2383
दीक्षायां धनशालायां कालक्षेपं न कारयेत्।
दीक्षोत्सवप्रतिष्ठादीन् कुर्वन्यस्तु शिवद्विजः॥ 2384
अन्तराले श्रुतं चेत्तु आशौचं मृतजन्मसु।
सुतं वा शिष्यमाहूय तत्क्रियां न समाचरेत्॥ 2385
ब्रह्मचारी व्रतस्थश्च दीक्षितो दैशिकस्तथा।
उभाशौचं न कर्तव्यं पद्मपत्रमिवाम्भसा॥ 2386
पूजालोपो न कर्तव्यं सूतकप्रेतकेऽपि च।
जलबुद्बुदवज्जीवः तस्माल्लिङ्गं समर्पयेत्॥ 2387
दीक्षिकस्यैकपुत्रस्य मातापित्रो गुरोर्मृतिः।
संस्कृत्य शालामागत्य यज्ञशेषं समर्पयेत्॥ 2388
नाम्नः प्राक्.. जननात्ततोपनयनादपि।
स्नानमेकदिनं प्रोक्तं त्रिदिनं च क्रमेण तु॥ 2389
तदूर्ध्वं तु दशाहं स्यात् ज्ञातीनां त्रिषु कथ्यते।
क्षरादष्टमवर्षाच्च विवाहात्पूर्ववत्क्रमात्॥ 2390
पारमेश्वरे॥
पुण्यक्षेत्रे पुण्यकाले गुरौ तु समुपागते।
पित्रो दीक्षा गर्भवती यदि दीक्षां समाचरेत्॥ 2391

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रतिष्ठामुत्सवं क्षौरं विना नित्यादिकं चरेत्।
सर्वदा कारयेद्दीक्षां कालादि नियमो न हि ॥ इति॥ 2392
दीक्षा पत्नी यदा नारी मृतं पतिमनुव्रजेत्।
सा स्वर्गमात्मयादिन आत्मानं न पतिं नयेत्॥ 2393
आशौचिनां त्रिवर्णानां अन्तर्मण्डलवेशनम्।
दीक्षितानां न दोषाय भवेदेवमुनीश्वराः॥ 2394
ततोऽन्येषां प्रवेशेत्, पञ्चगव्येन सेचयेत्।
तद्बहिर्वेशनं तेषां न दोषाय प्रकल्पयेत्, इति॥ 2395
कारणे = सर्व प्रायश्चित्ते =
उत्सवादीनि कार्याणि प्रारंभं देशिकेन तु।
कुरुते चित्त संतापे व्याधिभिर्नीयते यदि॥ 2396
तस्य पुत्रेण कर्तव्यं साङ्गं वै तेन शास्त्रतः।
पुण्याहं वाचयित्वा तु स्नपनं कारयेच्छिवम्॥ 2397
शांतिहोमं ततः कृत्वा बिन्दुध्वनि शतं जपेत्।
न एवं तत्प्रकृताशौचं साध्य काचार्यमूर्तिनां॥ 2398
जन्माशौचं मृताशौचं सर्वदोषं न विद्यते।
शिव मंत्र शतं जप्त्वा तं यागं तु समाचरेत्॥ 2399
ज्ञान रत्नावल्यामपि =
दाने यज्ञे विवाहे च सङ्कटे देशविप्लवे।
आपद्यपि च कष्टायां सद्यश्शौचं विधीयते॥ 2400
P. 2.150) स्वायंभुवे = शवानुगमनं चैव स्नपनं सिन्धु सेचनं।
अन्तर्वत्न्याः पतिः कुर्वन् न पूजा भवति ध्रुवं॥ 2401
स्मृतावपि॥ क्षौरं शवानुगमनं नरवकृन्तनं च श्राद्धं च-
वास्तु करणन्विति दूरयानम्। उद्वाहमं-॥ 2402
बुद्धि निषेवणमद्रि योगमायुक्षयं भवति-
गर्भिणिकापतीनां ॥ इति॥
नित्य पूजादिकं कुर्यान्नहि नैमित्तिकादिकं॥ 2403
प्रतिष्ठोत्सव दीक्षादीन् कुर्या गर्भिणीपतिः।
माता पितृ गुरूणां च मातुले पूर्वजे कृते॥ 2404
श्वशुराचार्य पत्नीनां गजवानपि वापयेत्।
भद्रे त्रिपादनक्षत्रे शुक्रांगारबृहस्पतौ॥ 2405

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दहनं मरणं येषां तत्कुलक्षयकारणम्।
तदर्थमेवं कर्तव्यं पुनर्दहनमादरादिति॥ 2406
विधिरत्ने॥ दीक्षाकालेऽभिषेके प्रतिनियमविधौ सूतके-
प्रेतकार्ये देवार्चारंभकाले नरपतिवचनात्॥ 2407
ब्राह्मणानुज्ञया च। बन्धान्मुक्तौ विवाहे
तनुनखवपनं सर्वकालं प्रशस्तं शौक्रीयें॥ 2408
प्रेतकार्ये न विरमति भये केवलं श्मश्रु-
कार्यम्॥
उत्सवे वपनं कार्यं वियुक्तं वाथ देशिकैः॥ 2409
अन्यत्र= प्रतिष्ठादौ वपनं नेष्टं इष्टं वा कुत्रचिन्मतं।
दीक्षायां च प्रतिष्ठायां उत्सवस्य च कर्मणि॥ 2410
वपनं कारयित्वादौ तत्तत्कर्म समाचरेत्।
सङ्कटे तु समुद्दिष्टे वपनं नैव कारयेत् इति॥ 2411
गंगाद्युत्तमतीर्थसेवनयुषां क्षौरं तदाव-
श्यकं, सद्यो दुष्पतने च पुण्यावति च-॥ 2412
श्री भास्करादौ स्थले= सत्यं मातृमृतौ
तथा पितृमृतौ आचार्यभृत्योर्मृतौ क्षौरं -॥ 2413
स्वामि मृतौ इहविहितं यागकार्ये विवाहे।
कुम्भे॥ इति शैवभूषणे -॥
विवाह ~~मध्ये दीक्षादौ~~ दीक्षामध्ये तु ज्ञातीनांमरणेसति॥ 2414
त्रिंशत्तिलोदकं कार्यं क्षौर कर्म न विद्यते।
स्मृतौ॥ आदन्त जन्मनः सद्यः आचौलान्नैशिकी स्मृता॥ 2415
त्रिरात्रमा व्रतादेशा दशरात्रमतःपरमिति।
पुरुषप्रजामृतौ॥
आचौलात्सद्य आदानात् निश्योर्ध्वं चा विवाहतः॥ 2416
त्र्यहं कन्या मृतौ ज्ञातिष्ववश्यं पूर्णमृदूर्ध्वने।
कृते नामादि संस्कारे प्राप्ते कालेऽप्यकृते॥ 2417
असंस्कृते कृते प्रेते यथावद्यं तथाप्ययमिति -
स्त्रीप्रजामृतौ। आगमे तु — ॥ 2418
नाम्नः प्राक् दन्तजननात् तथोपनयनादपि।
स्नान दिनमेकं प्रोक्तं त्रिदिनं च क्रमेण तु॥ 2419
तदूर्ध्वं तु दशाहं स्यात् ज्ञातीनां त्रिषु कथ्यते।
क्षारादष्टमवर्षाच्च विवाहात्पूर्वमिति क्रमादिति॥ 2420

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जीवि

मृतेऽपि वा जाते मृते वा पतनात्परं।
ज्ञातीनां सूतकं पूर्णं इति शातातपोऽब्रवीत्॥ 2421
सूतके तत्पुनस्स्याच्चेत् शापे तच्चापसूतके।
पूर्वेणैवोत्तरं गच्छेत् न शावं सूतकं क्वचित्॥ 2422
पितृभगिनी मातृभगिनी मातामह्यो मृते सति।
त्रिरात्रं सूतकं प्रोक्तं इति गर्भो बीजवत्फलम्॥ 2423
कन्यका जननी भ्रातृ पितृ तद्भ्रातृ तत्सुताः।
पितामहश्च तद्भ्राता शुध्य·· दशरात्रकैः॥ 2424
यदि मृत्योः कपालाग्नि तुषाग्नि बालकन्ययोः।
विधुरं विधवाश्चैव दहेदुत्तमना किना॥ 2425
P.2·151) मातृष्वसृसुता पुत्रौ पितृष्वसृसुतस्त्रियौ।
स्वसा पितृव्य पुत्री च स्वसृपुत्री पितृष्वसा॥ 2426
कि.) भ्रातृपुत्री च दौहित्री पौत्री तत्प्रतियोगिनौ।
स्त्रीपुंसौ कश्चिन्मृते पक्षिण्याशौचिनौ मिथः॥ 2427
अत्याशौचं सद्यः त्र्यहदशाहशौचिनोः।
चन्द्रु) पक्षिण्यथाष्टवर्षान्त श्रुत ऽाककालोन्यथा प्लवः॥ 2428
आशुचीनां समन्त्रानां सन्ध्योपास्तिरमंत्रकः।
न कार्यो लिङ्गसंस्पर्शः कार्यमन्तः शिवार्चनम्॥ 2429
भक्तिवैराग्ययुक्तानां लिङ्गं चाहितचेतसां।
नाशौचं·· मयस्तानां पूजाकाले मनीषिणां॥ 2430
तदेते नैव कर्तव्यमेकाहं न लभो जनम्।
अघोरजपसाहस्रं गडुकस्नान होमयुक्॥ 2431
त्यक्तबन्धुजनानां च विरक्तानां तपस्विनाम्।
नाशौचं विद्यते देहि लौकिकार्य पराङ्मुखाः॥ 2432
गुरुदेवाग्निकार्येषु विच्छेदो नैव विद्यते।
ब्रह्मयज्ञं जपो मौनं शान्तिराध्यारलाघवं॥ 2433
इत्येतत्तपसो रूपं सुघोरं पञ्चलक्षणम्।
अविच्छिन्नं प्रकर्तव्यं तत्तदन्ते स्तपस्विभिः॥ 2434
निर्वाणदीक्षितानां तु पृथक् वाङ्मुजामपि।
आशौचयोगे त्यजतां न स्यातां मृतसूतके॥ 2435

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अस्त संसारबीजत्वात् जनत्वात्सद्क्रियाहतः। . .
ने) क्षणमात्रं भवेत्तत्र नानादेव निवर्तते ॥ 2436
अन्यथा नित्यहानि स्यात् साचानिर्वाक्रियावतां ॥
प्रेत सूतक संबंधी नित्य हानिं करोति यः॥ 2437
. . . तावतिकीं शुद्धि यदाशौचं चिरं यदि॥
त्रिकालस्नान पूजाग्नि होमं जपपुरस्सरम्॥ 2438
कार्यं घोरसहस्रेण नक्तं यावक भोजनं॥
नित्यहानिः पृथक्पाकः तदा शुद्धस्त्यहात्मिका॥ 2439
पुनस्नात्वा जपेयुश्च सौम्यास्स्या च्छिवसंहिताम्॥
आशौचिनः स्नानवस्त्रा . . . . . रूपिणः शतं॥ 2440
कुर्युःस्ते द्विगुणं जप्यं शिवप्रेताय दीक्षितैः॥
स्कान्दो नैव . . . . यः श्रद्धया दत्ता - - -॥ 2441
- - - - - - - - - - तद्दाहका अपि॥
कृत्वा स्नात्वा शतं जप्त्वा संहितां पूजयेच्छिवम्॥ 2442
ख) कृतनित्याग्निकार्यश्चि ~~च~~चाशौचं दहनादिभिः॥
शिवैक गुरु संबन्ध्या गुरुसंबन्धिनश्चये॥ 2443
त्रयस्त्रिदिनं कर्म नित्यमन्यज्जपादिकम्॥
. . . श्योऽन्ये शैवमार्गस्थ ग्रहिणोऽग्रहिणोऽपिवा॥ 2444
दिनमेकं क्षयेदुस्ते शावाशौचाय दीक्षिताः॥
तीर्थयात्रा भृगोःपातः सन्यासों बुवेशनम्॥ 2445
महापथ प्रवृत्तिश्च मौरव्यं चानशनादिकम्॥
इत्यादि पश्चाज्जातेश्च दीक्षितो न समाचरेत्॥ 2446
अविद्यमान देहानां तथा विकासि देहिनाम्॥
P. L. 152) क्षयकाशापस्मारादि महारोगशरीरिणां॥ 2447
कुशादि निर्मिते देहे क्रियां सर्वां समाचरेत्॥
तथापि सूतकं नास्ति स्नानादेव विशुद्ध्यति॥ 2448
शिवीभूतस्य तद्द्रव्यं . . . . गुरुमृच्छति॥
अभावे चैव गुरोः शिष्ये शिष्याभावे तु संतति॥ 2448
सन्ततेरपि कालेन यदा भावो भवेदिह॥
अन्येषां तदनादेयं तदायाति स्वगोचरम्॥ 2449

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यज्ञाशिवाय तद्द्रव्यं होतव्यं च शिवाग्नये।
खण्डस्फुटित संस्कारनिमित्तं वामगालये॥ 2450
अनुगम्य तु तद्वाक्यमलंघ्यं स्थिति चिंतकैः।
अन्यथा योग्यकारस्तत्स्वं तथा विनियोजयेत्॥ 2451
उत्सवांते विशेषेण चूर्णोत्सवं समाचरेत्।
सर्व देवप्रियार्थं स्यात् सर्वलोकहिताय च॥ 2452
क्रियांते सर्व देवानां शिवमूर्ति परिग्रहेत्।
चूर्णं दद्यात्तु हारिद्रं शिव संस्कारसिद्धये॥ 2453
जन्माशौचं मृताशौचं उत्सवांते समुत्थितौ।
दीक्षितोप्येकपुत्रश्चेत् रक्षासूत्रं प्रगृह्य च॥ 2454
देवस्य हस्ते दत्वाथ स्मशानविधिमाचरेत्।
यज्ञशेषं समाचाप्य यज्ञांते शेषकर्म च॥ 2455
जननं मरणं दृष्ट्वा आशौचं नैव विद्यते।
देवोत्सवारंभकाले देवदेवस्य कौतुकम्॥ 2456
तत्कर्ममंत्र सिद्ध्यर्थमाचार्यस्यापि कौतुकं।
त्रिमासादथवा पञ्चमासादूर्ध्वं विशेषतः॥ 2457
अन्तर्वत्याः पतिः कुर्याद्वपनं नखकृन्तनादिति।
नानागमप्रायश्चित्ताशौचगर्भदीक्षा. ॥ 2458
वपनविधिस्समाप्तः। श्रीसहायदाम्ने नमः।

कामिके जटि- बंधविधिः॥ अथ वक्ष्ये विशेषेण जटिबंधविधिक्रमं॥ 2459
आयुरारोग्यजयदं अपमृत्युविनाशनम्।
सर्वसंपत्करं नृणां राज्ञां विजयकारणम्॥ 2460
सर्वशत्रुक्षयार्थं च सर्वाभीष्टफलप्रदम्।
तस्मात्सर्वप्रयत्नेन सद्यः संधानमाचरेत्॥ 2461
स्वायंभुके दैविके च आर्षके गाणवेऽपि च।
बाणे च मानुषेवापि षड्विधं बेरमुच्यते॥ 2462
शैलजं मृण्मयं चैव लोहजं दारुजं तथा।
स्वायंभुवे विशेषेण प्रतिमा पीठ जीर्णकैः॥ 2463
तत्काले तु विसृज्याथ नूतनं कारयेत्तथा।
अत्र देशे विशेषोऽस्ति महेशं नृत्तमूर्तिनं॥ 2464

महेश प्रतिमादीनां सोमास्कंदं विशिष्यते।
एतन्महा क्रियाज्ञेयं अन्यं सामान्यमीरितं ॥ २४६५
शिरो बाहुश्च कर्णौ च भुजौ पादौ कटिस्तथा।
पद्मबंधं च पीठं च जीर्णं चेत्तु विसर्जयेत्॥ 2466
नूतनं पीठमापाद्य प्रतिष्ठां कारयेत्ततः।
मूलाधारस्य पद्मस्य संबंधो जटिरीरितः॥ 2467
तत्संबंधे तु विच्छिन्ने तद्देवचलनं भवेत्।
तद्देवचलनादेव तद्राष्ट्रचलनं भवेत्॥ 2468
तस्मात्तद्दोषशान्त्यर्थं सद्यस्संधानमाचरेत्।
यावद्बिंबादिपर्यन्तं तावत्कृत्वा नवीकृतम्॥ 2469
यद्द्रव्येणोकृतं ~~सर्वं~~ बिंबं तत्प्रमाणं यदाकृतिः।
p. 2-153 तद्द्रव्येण पुनः कृत्वा तत्प्रमाणेन बुद्धिमान्॥ 2470
सर्वावयव संपूर्णं यथाशोभं यथाबलम्।
दार्विष्टिका शिलालोहे बिंबे प्रासादकेऽपि च॥ 2471
कर्मयोग्यानि संग्राह्य शेषं संपरिवर्जयेत्।
छिन्नं भिन्नं तथा ग्राह्यं जीर्णं चेत्तु नवीकृतिः॥ 2472
प्रतिमाबिंबपीठानि कृत्वा पूर्वोक्तलक्षणैः।
कारयेद्विधिना विद्वान् नृपराष्ट्रहिताय वै॥ 2473
द्रव्योत्कृष्टेन कर्तव्यं तत्प्रमाणाधिकं तथा।
उत्तरं तु न कर्तव्यं कृतं चेत्कर्तृनाशनम्॥ 2474
लिंगादि परिवाराणां यज्जीर्णं तत्र तद्विना।
कृत्वा तत्पूर्ववद्धीमान् सुदृढं च मनोहरम्॥ 2475
अन्यथा यदि कुर्याच्चेत् सर्वदोषकरं नृणां।
यन्मासे तु च यद्दक्षे अशुभानि शुभानि तु॥ 2476
अपरीक्ष्य तदा कुर्यात् स्थापनं बंधनं भवेत्।
तिथिवारमुहूर्तं च वर्जयेद्देशिकोत्तमः॥ 2477
लिंगं वापि प्रतिमां वापि पीठिका वा विशेषतः।
अनलेन तु चलिते स्फुटिते भिन्ने दाहिते ~~प्राक्द्रव्यैः~~ अनलेन तु॥ 2478
प्राणिकुर्यात् प्राक्द्रव्यैः प्रतिष्ठां सम्यगाचरेत्।
चलने स्थाननाशं स्यात् भेदने शत्रुपीडनं॥ 2479

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

षोडशाहे चलं चेत्तु मूर्तिनाशकरं भवेत्।
मासं मासद्वयं चेत्तु देशाचलनमाप्नुयात्॥ 2480
गणेशं क्षेत्रपालं च षण्मुखं नन्दिकेश्वरम्।
कंकालं च वृषारूढं चंद्रशेखरमेव च॥ 2481
चण्डेशं चास्त्रराजादीन् ज्वरे बंधे कृते सति।
त्रिरात्रं कारयेद्धीमान् संप्रोक्षणमथाचरेत्॥ 2482
उमामहेशनृत्तं च बंधनं च कृते सति।
लं) आमण्डलं वा मासं वा शांतिं कुर्याद्विचक्षणः॥ 2483
बंधनांते विशेषेण उत्सवं कारयेत्ततः।
अंकुरार्पणपूर्वन्तु सप्ताहं वा नवाहकम्॥ 2484
ग्राम प्रदक्षिणं कुर्यात् अन्त्ये चूर्णं समाचरेत्।
महातीर्थं प्रकर्तव्यं तद्दोषविनिवृत्तये॥ 2485
नित्यमष्टोत्तरशतैः (सूत्रकुंभैः) स्नापयेत्तु शिवाय च।
देवे दत्वावशिष्टं च देव्याश्च विनिवेदयेत्॥ 2486
पृथग्वा स्नापयित्वा तु देवेशमभिषेचयेत्।
पादमूले च देवस्य गव्याद्यैरभिषेचयेत्॥ 2487
तथैव दर्पणादौ वा स्नापनं स्नापनोक्तवत्।
देव्याश्चैव स्नपनं मध्ये कुंभयोः करकं न्यसेत्॥ 2488
बन्धनस्य दिनात्पूर्वं अधिवासनमारभेत्।
शिवाग्रे मण्डपं कुर्यात् नानालंकारसंयुतम्॥ 2489
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥
शालिभिस्तण्डुलं कुर्यात् द्रोणाद्रोणैर्विशेषतः॥ 2490
तदर्धैस्तण्डुलैः भूष्य तदर्धैश्च तिलैरपि॥ 2491
तदर्धैर्लाजसंयुक्तं पद्ममष्टदलैर्युतम्॥
मण्डपोक्तप्रमाणेन कलशं परितः क्रमात्॥ 2492
स्वर्णेन रजतेनाथ ताम्रेणाक्तप्रमाणकं॥
उत्तमं मध्यमं नीचं क्रमेण परिकीर्तितम्॥
वेदिकोपरि कुंभैश्च विद्येश्वरगणैस्सह॥ 2493
ससूत्रालंकृतान् कुंभान् पट्टवस्त्रोपवेष्टितान्॥
सकूर्चालंकृतांश्चैव पल्लवपल्लवशोभितान्॥ 2494
नालिकेरादिसंयुक्तान् गंधाद्यैः परिपूरितान्॥
निष्कनिष्का . . . तदर्धार्धं यथाक्रमम्॥ 2495

p.2.104) प्रधानकुंभवर्धन्यां विद्येश्वरघटेषु च।
परिवाराणां तु कलशे प्रतिमां कारयेत्क्रमात्॥ 2496
तन्मध्ये प्रतिमां स्थाप्य . . . . समन्वितैः।
ईशादेशे वर्धनी च प्रतिमां रत्नसंयुतां॥ 2497
विद्येश्वरेषु कुंभेषु प्रतिमा रत्नसंयुताम्।
मण्डप) शांतिकुंभैरावृत्तैश्च शिवं यागोक्त . . त्॥ 2498
शक्त्यादि पद्मपर्यन्तं पूजयित्वा यथाविधि॥
वृत्तं वा चतुरश्रं वा कुण्डं कुर्यात्सलक्षणं॥ 2499
संकल्प्य च यथोक्तेन विद्भिः ब्राह्मणैस्सह॥
आचार्यमूर्तिपैस्सार्धं शिवं विज्ञापयेत्ततः॥ 2500
प्रतिमां शोधयित्वा तु मण्डपोक्तैस्समर्चयेत्॥
त्रिंशन्निष्कैरुत्तमा च विंशन्निष्कं तु मध्यमं॥ 2501
अधमं . . निष्का च कारयेत् शिल्पिना सह।
शिवचक्रं समापाद्य पञ्चांगुलसमानतः॥ 2502
प्रतिमां कारयित्वा तु कुंभमध्ये प्रतिक्षिपेत्॥
. . . नीश्चैव विद्येशान् तत्र कैः प्रतिक्षिपेत्॥ 2503
पुण्याहं वाचयेत्पूर्वं यथोक्तयजनं कुरु।
षडध्वविधिमार्गेण न्यासं बंधनं तु पूर्वकम्॥ 2504
गंधं पुष्पं च दीपं च धूपं नैवेद्यकं तथा।
नानावाद्यसमायुक्तं नानानागीतसमन्वितं॥ 2505
पठन्ते देवतालिंगान् मन्त्रान् . . . हि हेतवे।
नृत्तगीतसमायुक्तं घण्टारवसमन्वितम्॥ 2506
आवाहनान्ते तद्बेरं आचार्यो शिल्पिभिस्सह।
गंधपुष्पैश्च माल्यैश्च उत्सवस्त्रेण वेष्टयेत्॥ 2507
सद्यः संधानकं कुर्यात् यथाशोभं यथाबलं।
देशिको मूर्तिपैस्सार्धं यागकर्म समापयेत्॥ 2508
नवाग्निं वाशराग्निं वा मेधकाग्निमथापि च।
कुण्डसंस्कारपूर्वन्तु अग्निकार्यं विधाय च॥ 2509
शिवगाय त्रिमंत्रेण यथा पाशुपतादिभिः।
मूलमंत्रेण विधिवतः ब्रह्मांगैश्च विशेषतः॥ 2510

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टोत्तरशतं हुत्वा मंत्रप्रति विशेषतः।
समिदाज्य चरूंल्लाजान् सर्षपांश्च यवांस्तिलान्॥ 2511
होमद्रव्याणि सर्व... प्रत्येकं शतसंख्यया॥
जयादिमभ्याधानांश्च ततः पूर्णां समाचरेत्॥ 2512
चतुर्वेदविदो विप्रान् चतुर्दिक्षु व्यवस्थिताः।
जपेयुश्च जपैः ऋचस्सर्वे... तज्जल्पैर्विशेषतः॥ 2513
चतुर्दिक्षु शिवा... जपेयुः साधकोत्तमाः।
रात्रौ जागरणं कुर्यात् अधिवासनमाचरेत्॥ 2514
परेद्युः प्रातरुत्थाय आचार्यो मूर्तिपैस्सह।
स्नानादिकं तु.... नित्यांते तु विशेषतः॥ 2516
सुमूहूर्ते सुलग्ने च अभिषेकं समाचरेत्।
ग्राम प्रदक्षिणवशात् नानावाद्य समन्वितं॥ 2517
वेदध्वनिसमायुक्तं नृत्तगीत समन्वितम्॥
सुवर्णकुसुमैरक्तैः प्रकिरेत् परितस्थितः॥ 2518
शनैः प्रदक्षिणं कृत्वा देवस्याग्रे निधाय च।
दशदानादिकं कृत्वा नानादानसमन्वितं॥ 2519
कुंभाभिषेचनं कुर्यात् मैत्रान्नन्तु निवेदयेत्।
नीराजनं ततः कृत्वा आशीर्वादपुरस्सरम्॥ 2520
गव्यैः पञ्चामृताद्यैश्च शुद्धतोयैर्विशेषतः।
क्षीरादि सकलैः द्रव्यैः अभिषेकं विशेषतः॥ 2521
विशेषाद्गंधतोयैश्च अभिषेकं समाचरेत्।
गन्धवस्त्रादिभिर्भूष्य अष्टगंधैर्विलिप्य च॥ 2522
महाहविर्निवेद्याथ ब्राह्मणान् भोजयेत्ततः।
(p. 2.155) आचार्यं पूजयेत्तत्र क्रियां प्रति विशेषतः॥ 2523
कटकं कुण्डलं चैव कटिसूत्रं करोर्मिका।
स्वर्णोपवीतमेतत्तु पञ्चांगयुतभूषणम्॥ 2524
वस्त्रैश्च गंधपुष्पैश्च पूजयेद्देशिकोत्तमम्।
उत्तमस्य चतुष्षष्टि निष्का देशिकदक्षिणा॥ 2525
तदर्धं मध्यमा ज्ञेया तदर्धा कन्यसा स्मृता।
क्रियाशरीर इत्युक्ता दक्षिणा जीव उच्यते॥ 2526

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रिया दक्षिणया हीना निर्जीवा निष्फला भवेत्।
देशिकस्य मनस्तुष्टिः देवसान्निध्य कारणं ॥ 25.27
मूर्तिपान् पूजयेत्पश्चात् अर्चयेत्तून् मंत्रजापिनः।
पूजयेत्तु विशेषेण दक्षिणावस्त्र संयुतम् ॥ 25.28
शिल्पिनं तोषयेत्पश्चात् वस्त्रैश्चैवांगभूषणैः।
अन्यैश्च परिचारैश्च दासिदासगणैस्तथा ॥ 25.29
यथावित्तानुसारेण दक्षिणां संप्रदाय च।
अन्न वस्त्रादि तांबूलैः स्नान संस्थापनादि च ॥ 25.30
तदा शक्त्यानुसारेण यथा प्रीति पुरस्सरैः।
यागोपकरणं सर्वं आचार्यादौ प्रदापयेत् ॥ 25.31
दीनान्ध कृपणादीनां अन्न दानं विशेषतः।
उत्सवं च तदा कुर्यात् अन्तर्मण्डलदेशके ॥ 25.32
प्रत्यहं शांति होमैश्च स्नपनैर्भोजनैर्यथा।
एवं मण्डलपर्यन्तं मासं वा पक्षमेव वा ॥ 25.33
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
पुत्रार्थी पुत्रमाप्नोति धनार्थी धनमाप्नुयात् ॥ 25.34
राज्यार्थी राज्यमाप्नोति मोक्ष माप्नुयात्।
इति कामिके भेदे प्रतिष्ठा तन्त्रे जटि बंधन- ॥ 25.35
विधि पटलः—

कारणे ~~कामिके~~ पादुका स्थापन नित्यार्चना ॥ 25.36

पादुका स्थापनं वक्ष्ये शृणुष्व चतुरानन।
नित्योत्सवांते या मध्ये पूजनार्थन्तु पादुका ॥ 25.37
सौधा सप्तांगुलं प्रोक्तं पादुकायास्तु दैर्घ्यकं।
विस्तारं तु तदर्धं स्यात्तस्य मध्ये तदर्धकं ॥ 25.38
अंगुलादि त्र्यंगुलं उत्सेधं पादुकाद्वयोः।
पादाकारं तु कर्तव्यं तस्योर्ध्वे वृत्तमुच्यते ॥ 25.39
एवं लक्षण संयुक्तं पादुकां कारयेत्ततः।
पर्यन्तं शोभितं कृत्वा माणिक्यादि सुरत्नकैः ॥ 25.40
रत्नानामप्यलाभे तु स्वर्णेन तु कारयेत्।
अथ वान्य प्रकारेण पादुकाकृतिरुच्यते ॥ 25.41
ताम्र तार सुवर्णैर्वा कारयेल्लक्षणान्वितं।
त्रिमात्रन्तु मात्रांतं अर्धेनार्धेन वर्धयेत् ॥ 25.42

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रं प्रायामादि कर्तव्यं कन्यसादित्रयं त्रयं।
आयामस्यार्धमेवं तु अग्रपाद त्रिविस्तरं॥ 2543
षडष्टांशेन मध्यन्तदायामं युगभागिकम्।
एकभागं भवेदुच्च गुणाद्ध्येकं शके खरम्॥ 2544
शेषमूर्ध्वदले प्रोक्तं ~~प्रोक्तं~~ मूले युक्त्या प्रकल्पयेत्।
अंगुष्ठोच्चतलोर्ध्वं स्याच्चतुर्भाग त्रिभागिकम्॥ 2545
चतुरंशे युगांशन्तु नालं शेषांत पुष्पकम्।
अंगुष्ठोच्च समं पुष्पं विस्तारं मुकुलान्वितं॥ 2546
पुष्पोन्नत त्रिभागैकं मुकुलं कारये द्विजाः।
एवं स लक्षणं कृत्वा प्रतिष्ठां सम्यगाचरेत्॥ 2547
पूर्वं मण्डपसंस्कारं विभवेन समन्वितं।
वास्तुहोमं दिशा कुर्यात्क्षणेन समन्वितं॥ 2548
p. 2.156) दर्भमालाभिरावेष्ट्य चतुस्तोरणसंयुतं।
अष्टदिक्षु ध्वजं न्यस्य वितानैरुपशोभितं॥ 2549
मुक्तादामैरलं कृत्य पुष्पमालोपशोभितम्।
वेदिका रत्नि उत्सेध्या दर्पणोदरवत्कृता॥ 2550
शालिना चाष्टद्रोणेन तदर्धं विन्यसेत्ततः।
शालयर्धं तण्डुलं ~~र्धं~~ न्यस्य तण्डुलार्धं तिलं न्यसेत्॥ 2551
तिलार्धं लाजमित्युक्तं उपर्युपरि विन्यसेत्।
पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत्॥ 2552
शयनं कल्पयेत्तत्र अण्डजाद्यैस्ततो बुधः॥
जलाधिवासनं कृत्वा पूर्वोक्तविधिना सह॥ 2553
जलादुत्तीर्य देवेशं शुद्धिं कृत्वा विशेषतः॥
प्रासादं प्रविशेत्तत्र पुष्पदन्तपदे स्थितः॥ 2554
आचार्यस्तु शुचिर्भूत्वा नववस्त्रेण वेष्टयेत्।
सोष्णीषं सोत्तरीयं च सर्वाभरण भूषितः॥ 2555
~~आचार्यस्तु सर्वाङ्गेन शुचिर्भूत्वा~~
आचार्य स्वंगबीजेन सर्वाङ्गेषु च विन्यसेत्।
उपदेष्टा समायुक्तो आचार्यद्वयमुच्यते॥ 2556
उपदेष्टाशरीरं तत् आचार्यो जीव उच्यते।
मण्डपस्य तु तन्मध्ये स्थण्डिलं शालिना कुरु॥ 2557

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

परिस्तीर्य ततो दर्भैं भूतं गंगादिनार्चयेत ।
नववस्त्रमथास्तीर्य पञ्चगव्यैस्तु पादुकाम् ॥ 2558
क्षालयेद् दृष्टमृद्भिस्तु शुद्धतोयेन सेचयेत ।
वस्त्रोपरि न्यसेद्धीमान् पादुकां वर्मणा ततः ॥ 2559
वस्त्रेणोपरि संचाद्य स्थापयेत्कलशोष्टकान् ।
तन्मध्ये पादुकाग्रे तु वृषकुंभन्निधापयेत ॥ 2560
सकूर्चान् पल्लवोपेतान् सहिरण्यान् सवस्त्रकान् ।
ससूत्रान् सापिधानांश्च सरत्नान् प्रतिमां न्यसेत् ॥ 2561
तन्मध्ये वृषकुंभन्तु वृषबीजं न्यसेत्ततः ॥
परिवारघटाग्रेषु तत्तद्दिक्पालकान्यसेत ॥ 2562
तत्तन्मूलेन चावाह्य तत्तद्ध्यान पुरस्सरम् ।
धेनुमुद्रां प्रमृज्याथ हैमं तत्र विनिक्षिपेत ॥ 2563
पुण्याहं वाचयेत्तत्र स्थण्डिलं सिकतेन तु ।
अग्न्याधानादिकं सर्वं अग्निकार्योक्तमाचरेत ॥ 2564
च्चा) समिदाज्यचरून् लाजान् तिलं सप्तादि मंत्रकैः ।
होमयेत्तु विशेषेण प्रत्येकं पञ्च विंशतिः ॥ 2565
प्रवृत्तेनैव मंत्रेण हुनेदष्टोत्तरं शतम् ।
परिवारादि मंत्रेण हुनेत्तत्तत्स्वबीजकैः ॥ 2566
प्रभाते सुमुहूर्ते तु मन्त्रन्यासं समाचरेत ।
जयादि मभ्याधानं च राष्ट्रभृत्क्रमाद्धुनेत ॥ 2567
स्विष्टमग्नेति मंत्रेण होमं परिसमापयेत ।
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः ॥ 2568
पञ्चनिष्कामधमा ज्ञेया दशनिष्कं तु मध्यमा ।
उत्तमा तु त्रिपञ्चाख्य दक्षिणा देशिकस्य तु ॥ 2569
धाम प्रदक्षिणवशात् वृषकुंभं स देशिकः ।
समादाय पुनर्गत्वा ~~देवी~~ देवस्याग्रे विशेषतः ॥ 2570
P.L.157) वृषबीजं समादाय कुंभात्तत्पादुका द्वये ।
तज्जलै रभिषेकन्तु कुंभान्यादाय देशिकः ॥ 2571
तत्पादुकस्य परितः तत्तद्बीजानि विन्यसेत ।
तत्कुंभस्थ जलेनैव अभिषेकं समंत्रकैः ॥ 2572
चेये) अर्चयेद् वृषमंत्रेण मुजाञ्च तु निवेदयेत ।
नीराजनं ततः कृत्वा ब्राह्मणान् भोजयेत्ततः ॥ 2573

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यथाशक्त्यानुसारेण दक्षिणां दापयेत्ततः।
तदन्ते चोत्सवं कुर्याद्यथा विभवविस्तरम्॥ 2574
सर्वालंकारसंयुक्तं प्रासादभ्रमणं कुरु।
एवं कृत्वा तु विधिना अर्चयेत्प्रतिबिंबिषु॥ 2575
अब्दं प्रति विशेषेण वसन्तोत्सवमाचरेत्।
गन्धतोयैर्हरिद्रादैः वेणुदण्डान् प्रपूर्यच॥ 2576
एवं क्रीडां तु निवृत्य नैवेद्यं धूपदीपकम्।
शिबिकाच्छादनेनैव गूढचारेण सत्वरम्॥ 2577
देव्यालयं समागम्य आरार्तिक विधिं कुरु।
शै) ततो भोगालयं गत्वा पार्वतीपरमेश्वरौ॥ 2578
संपूज्य धूपदीपं च मरीच्यन्नं सपूपकम्।
सोपदंशं घनक्षीरं नैवेद्यं परिकल्पयेत्॥ 2579
नीराजनं ततो कृत्वा दर्पणं छत्रचामरैः।
डोलगानविनोदैश्च सन्तोष्य परमेश्वरौ॥ 2580
तत्र संस्थाप्य शुद्धान्नं सोपदंशघृतप्लुतम्।
वासितं शीतलं तोयं गौरवल्लीदलैर्युतम्॥ 2581
युक्) सवासित क्रमुकं गन्धपुष्प सुचूर्णकम्।
निर्वाणदीपसंयुक्तं आलोक्या सोपचारतः॥ 2582
यथान्तरुपचारेण नरस्त्रीषु प्रसीदति।
तथान्तर्यामि विधिना प्रसीदति महेश्वरः॥ 2583
एवं विज्ञाप्य चाचार्योत्पादानयनं कुरु।
प्रदक्षिणवशेनैव गीतवादित्र संयुतम्॥ 2584
चण्डालयं प्रविश्याथ संपूज्य क्षेत्रपालकम्।
दण्डाग्रे तु नमस्कृत्य मूलमंत्रशतं जपेत्॥ 2585
प्रतिष्ठान्ते चोत्सवस्य प्रसादात्कल्पितं मया।
नित्यार्चनमिदं प्रोक्तं समासाच्चतुरानन॥ 2586
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
इति श्रीमत्कारणभेदे प्रतिष्ठातंत्रे पादुका-॥ 2587
स्थापन नित्यार्चन विधि पटलः—।

—अथ भोगांगशक्ति स्थापनम्—॥ 2588

भोगांगशक्ते विधिवत्स्थापनं लक्ष्यते क्रमात्।
सर्वलोकहितं पुण्यं सर्वकाम्यफलप्रदम्॥ 2589

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आयुष्करं धनकरं श्रीसौभाग्यकरं परम्।
पुत्रप्रदमपुत्राणां भोगमोक्षफलप्रदम्॥ 2590
सुवारे सुमुहूर्ते तु स्नापनं संप्रकल्पयेत्।
लोहजैः कारयित्वा तु उत्तमं मध्यमाधमम्॥ 2591
P.2.158) चलबेरं प्रकर्तव्यं द्रव्यलोभं कदाचन।
मूलबेरप्रमाणेन समं वाप्यधिकं तु वा॥ 2592
न्यूनं वापि प्रकर्तव्यं कर्तुः शिल्पविधानतः।
द्विनेत्रां द्विभुजां श्यामां पीतोन्नतपयोधराम्॥ 2593
उत्पलं दक्षिणे हस्ते वामहस्ते प्रलंबिनीम्।
समपादसमायुक्तां पद्मपीठोपरि स्थिताम्॥ 2594
समदृष्टिसमायुक्तां प्रसन्नवदनान्विताम्।
एवं कुर्याद्विशेषेण शिल्पिशास्त्रोक्तवर्त्मना॥ 2595
उन्मीलनं ततः कुर्यात् मायार्णं तु समुच्चरन्।
जलाधिवासनं कुर्यात् पूर्वोक्तविधिना सह॥ 2596
शिवाग्रे मण्डपं कुर्यात् नानालंकारशोभितं।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥ 2597
मध्ये वेदी प्रकर्तव्या शालितण्डुललाजकैः।
तिलैस्तु सपरिस्तीर्य ऐशान्ये ऐन्द्रकेऽपि तु॥ 2598
अग्रं वा योनिकुण्डं वा कारयेल्लक्षणान्वितम्।
मंगलाष्टकसमायुक्तं दर्भमालाविभूषितं॥ 2599
वास्तुपूजां तु कुर्वीत पर्यग्निकरणं तथा।
अंकुरार्पयित्वा तु रक्षाबंधं समाचरेत्॥ 2600
मण्डपे पूजयेद्धीमान् सप्तविंशद्ध्वजाधिपान्।
मण्डपे पञ्चशय्यां क्रमात्कुर्याद्विधानतः॥ 2601
तन्मध्ये शाययेद्देवीं रक्तवस्त्रेण वेष्टयेत्।
पूर्वे तु पेटिकामध्ये निद्राकुंभं प्रतिक्षिपेत्॥ 2602
द्रोणपूरितकुंभं स्यात् प्रतिमां सम्यगाचरेत्।
चतुरंगुलमानेन स्वर्णेन रजतेन वा॥ 2603
पञ्चपञ्चपदे मध्ये मायाबीजपुरस्सरम्।
नवाक्षरं समालिख्य स्वरवर्णसमन्वितम्॥ 2604

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यंत्र पट्टं समासाद्य कुंभमध्ये प्रतिक्षिपेत्।
ओ) अष्टगंधोदकैः पूर्यं गौरीमासादयेत्ततः॥ 2605
आसनं मूर्तिमूलं च सांगं सावरणैस्सह।
श्रीकण्ठादीन् न्यसेत्पश्चात् पञ्चाशिंशत्कलाँ तथा॥ 2606
ये) आवाहेत्ततो देवीं पूर्वादि क्रमशो न्यसेत्।
जंभिनी स्तंभिनी चैव मोदिनी कामिनी तथा॥ 2607
मोहिनी विमला प्राज्ञा सकला चाष्टशक्तयः।
गौरी बीजं न्यसेद्धीमान् योनि मुद्रां प्रदर्शयेत्॥ 2608
धूप दीपादिकं दत्वा अग्निकार्यं ततः कुरु।
कुण्ड संस्कार पूर्वन्तु ततो नामांतकं तथा॥ 2609
पूर्णाहुतिं ततः कुर्यात्त्रिखण्डं शोध्ययेत्ततः।
~~कुर्यात् त्रिखण्डं शोध्ययेत्ततः॥~~
इच्छाज्ञान क्रियाशक्ति ब्रह्म भागादिभिः क्रमात्॥ 2610
अष्टोत्तरशतै हुत्वा तन्मानं प्रजपेत्ततः।
P. L. 159) शांति कुंभांभसा प्रोक्ष्य प्रायश्चित्तार्थमादरात्॥ 2611
गौरीगायत्रिमनुना अष्टोत्तरसहस्रकैः।
आज्याहुति क्रमे णैव जंभिन्यादीन्ततः क्रमात्॥ 2612
अष्टोत्तरसहस्रैर्वा अष्टोत्तरशतेन वा।
समिदाज्याब्जलाजादीन् अपूपैश्च फलैरपि॥ 2613
होमं कुर्याद्विध्यानेन रात्रिशेषं व्यपोह्य च।
ततः प्रभातसमये नित्य कर्म विधाय च॥ 2614
शेषहोमं ततः कुर्यात् पूर्णाहुतिमथाचरेत्।
कुंभे मूर्तिं च संयोज्य अग्निकार्यं समापयेत्॥ 2615
बेरे प्राणप्रतिष्ठां च कारयेत्तु विधानतः।
सुमुहूर्ते सुलग्ने च आचार्यो मूर्तिपैस्सह॥ 2616
कुंभमुद्धृत्य सहस्रादि.. स्नापयेत्ततः।
नानावाद्य समायुक्तं स्वस्तिवाचकसंयुतं॥ 2617
ग्रामप्रदक्षिणं कृत्वा शिवाग्रे यागमण्डपे।
प्रतिमां स्थापयित्वा देवस्याभिमुखं तथा॥ 2618
भद्रे पीठेऽथ संस्थाप्य संकल्प्य विधिपूर्वकं।
दशादानादिकं कुर्यात् कुंभोदैरभिषेचयेत्॥ 2619

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मंत्रान्नं तु निवेद्याथ वस्त्रगंधादिभिः क्रमात्।
मंगळं धारयेत्पश्चात् उत्साहं विधिपूर्वकम्॥ 2620
नानाभरणसंयुक्तं नानालंकारभूषितम्।
रथे वा शिबिकायां वा देवीमारोपयेत्ततः॥ 2621
नानावाद्य समायुक्तं स्तोत्र मंगळपूर्वकैः।
नृत्तगीतसमायुक्तं वेदध्वनिसमन्वितं॥ 2622
सुहमरत्नं प्रक्षिप्य प्राक्षिपेत्तु पदे पदे।
ग्राम प्रदक्षिणं कुर्याच्च नैर्देव्यालयेत्ततः॥ 2623
देव्यालये विशेषेण शयनालयमुत्तमम्।
नानालंकारसंयुक्तं खड्गांगेन समन्वितं॥ 2624
तूलिका चंद्रकैर्युक्तं उपधान समन्वितम्।
डोळाकारसमायुक्तं उपर्यास्तरणं कुरु॥ 2625
मुक्तादाम समायुक्तं चित्र वस्त्रै रलंकृतम्।
तन्मध्ये तु न्यसेद्देवीं सर्वावयव सुन्दरीम्॥ 2626
पूर्वोक्तवदर्चयित्वा साङ्गं सावरणैस्सह।
महाहविन्निवेद्याथ अपूपैर्व्यञ्जनै सह॥ 2627
परमान्नैः पानकैश्च फलत्रय समन्वितैः।
तांबूलैश्च सुगंधैश्च यथा विभव विस्तरैः॥ 2628
पूजयित्वा विशेषेण उपचारैस्समन्वितैः।
आचार्यमूर्तिपादीनां प्रत्येकं दशनिष्ककं॥ 2629
अन्येभ्यो सर्वलोकेभ्यो दक्षिणां दापयेत्ततः।
ब्राह्मणान् भोजयित्वाथ महेशांस्तु प्रपूजयेत्॥ 2630
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
राज्यार्थी राज्यमाप्नोति मोक्षार्थी मोक्षमाप्नुयात्॥ 2631
इति श्रीमत्कारणे प्रतिष्ठा तंत्रे भोगशक्ति-
स्थापन विधिपटलः। // 2632
दीक्षशास्त्रे — अष्टबंधनम्।
p.2.160) अथ वक्ष्ये विशेषेण अष्टबंधविधिक्रमं।
सर्वशांतिकरं पुण्यं सर्वकाम फल प्रदम्॥ 2633
सर्वैश्वर्य प्रदं पुंसां सर्वकार्यार्थसाधनं।
विष्णु भागं तु निर्मलिर्ये नृपस्यायुर्विनाशनं॥ 2634
ब्रह्म भागं तु निर्मलिर्ये - - - - जायते नरः।
हर्म्येचैव प्रवेशे तु विभूतेः सर्वनाशनम्॥ 2635

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यत्काले बंधने जीर्णे तत्काले तु दृढं कुरु।
र्तच) दिनवारमुहूर्तं च वर्जयेत् तु विचक्षणः॥ 2636
कापसि तूलनवनीत गुडशर्कराणाम्,
लाक्षामधूच्छिष्ट · · कुन्दुरुष्कम् ॥ 2637
कषाय पाषाण गुडं समानं, लिगाद्य पीठांतर-।
मष्टबंधनम्।
लाक्षा सर्जन पाषाणं ससिक्थं गुमतिजंतुकम्॥ 2638
गुग्गुलुं गैरिकंचैव गुड तैलमिहोच्यते।
षि) स्वायंभुवे दैविके चैव आर्षके गाणपे तथा॥ 2639
त्रिबंधं पञ्चबंधं स्यात् अष्टबंधनमेवच।
स्वायंभुवे विशेषेण पक्वापक्वं विशिष्यते॥ 2640
अपक्वं दैविकं प्रोक्तं पक्वं तु मानुषं तथा।
वर्जितां) प्रबन्धात् बंधने हीने पूजा नैवेद्य ~~मेव~~ वर्जितां॥ 2641
लाक्षासर्जन पाषाणं शंखं च कदलीफलम्।
मधूच्छिष्टेन संयुक्तं बंधयेत्पञ्चबंधनम्॥ 2642
लाक्षा गुग्गुलु पाषाणं ससिक्थं बंधयेद्गुरुः।
त्रिबन्धमिति विख्यातं पक्वापक्वं तु बंधयेत्॥ 2643
श्वेत गुग्गुलु शर्करा चूर्णयो माहिषं च नवनीतमिश्रकं।
उलूखले मुसलद्वय कुट्टनात् पाकयुक्तवशात् दृढबंधनं॥ 2644
प्रायश्चित्तं विशेषेण बन्धनान्ते समाचरेत्।
प्रथमम् मृद्गृहीतं च द्वितीयं अङ्कुरार्पणम्॥ 2645
आवाहनं तृतीयं स्यात् रक्षाबंधं तुरीयकम्।
पञ्चमं मंत्रविन्यासं षष्ठं तु कुंभपूजनम्॥ 2646
सप्तमं चाग्निकार्यं च अष्टमं जीर्णशोधनम्।
नवमं रत्नविन्यासं पक्वापक्वमतः परम्॥ 2647
एकादशं बंधनं स्यात् ततः पूर्णाहुतिस्ततः।
मन्त्रन्यासं ततः कुर्वीत ततो कुंभाभिषेचनम्॥ 2648
स्नपनं शांतिहोमं च ततो मंत्रजपं ततः।
महाहविर्निवेद्यान्य उपचारमतः परम्॥ 2649
आचार्यदक्षिणां कुर्यात् ब्राह्मणान् भोजयेत्ततः।
विद्वान्महा क्रिया ज्ञेयं अष्टबंधनकर्मणि॥ 2650

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मण्डलं मासमेवं वा पक्षं वापि निरंतरम्।
स्नपनं कारयेच्छंभो शांतिहोमं सुरेश्वरम्॥ 2651
तेन सामान्यसमये विघ्नेशं पूजयेत्ततः।
देवं विज्ञाप्य विधिवत् मृदं संग्राह्य बुद्धिमान्॥ 2652
ततोंकुरार्पणं कुर्यात् बालस्थापनमाचरेत्।
शिवाग्रे स्थण्डिलं कुर्यात् तिललाजसमन्वितः। 2653
कुंभमाढकमान्येन कलशं प्रस्थमुच्यते।
स्थण्डिलं शालिभिः कुर्यात् तिललाजसमन्वितं॥ 2654
पद्ममष्टदळं लिख्य मध्ये कुंभं न्यसेत्ततः।
(p.2.161) वर्धन्या च समायुक्तं विघ्नेश्वरघटान्वितम्॥ 2655
ससूत्रां सापिधानांश्च सवस्त्रान् सहिरण्यकान्।
प्रतिमासंयुतान्·· श्च रत्नसमन्वितान्॥ 2656
सांगंसावरणैर्युक्तं शिवमावाहयेत्ततः।
शांति होमं ततः कुर्यात् चतुर्क्षीरसमन्वितं॥ 2657
वितानतोरणाद्यैश्च समलंकृत्य यत्नतः।
नवपञ्चैककुण्डं वा वेदिका परितः क्रमात्॥ 2658
ईशदेशे प्रधानं तु वृत्तकुंडसलक्षणं।
वक्रमात्) कारयित्वाविधानेन शिल्पशास्त्रोक्तवर्त्मना॥ 2659
वेद्यूर्ध्वे स्थण्डिलं कुर्याद् अष्टद्रोणैश्च शालिभिः।
तण्डुलैस्तिललाजैश्च पद्ममष्टदळं लिखेत्॥ 2660
तन्तुना वेष्टयेत्कुंभान् यवमात्रांतरांतरे।
गन्धोदकैश्च संपूर्य गंधद्वारेति मंत्रतः॥ 2661
सकूर्च वस्त्र माल्याद्यैः प्रतिमा चक्रमीरितं।
पञ्चनिष्कप्रमाणेन तदर्धार्धं समन्वितं॥ 2662
पञ्चरत्नसमायुक्तं नानाविभव विस्तरैः।
यागमण्डप पूजोक्त विधानैरर्चयेत्क्रमात्॥ 2663
आधारादिषु पर्यन्तं कुंभादावान्य मध्यमे।
अष्टत्रिंशत्कलान्यास मातृकाभिश्च विन्यसेत्॥ 2664
सांगैस्सावरणैस्सार्धं पूजयित्वा विधानतः।
अग्निमाराधनं कुर्यात् अग्निकार्योक्तमार्गतः॥ 2665
तदग्रे शिवनामं च मण्डलं परिपूजयेत्।
आचार्यो मूर्तिपैस्सार्धं अग्निकार्यं समाचरेत्॥ 2666

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देशिकेन्द्रस्य पुत्रो वा पौत्रो वा तस्य बांधवाः।
अष्टौ वा चतुरो वापि होतारस्ते भवन्ति हि॥ 2667
ततः संशोधनं कुर्यात् आचार्यो मूर्तिपैस्सह।
तज्जीर्णन्तु परित्यज्य नवरत्नं विनिक्षिपेत्॥ 2668
अपक्वं दैविकं प्रोक्तं पक्वं चैव तु मानुषम्।
स्वायंभुवे विशेषेण पक्वापक्वं तु बंधयेत्॥ 2669
यत्नोक्तं बंधनं कुर्यात् मध्यरात्रौ विशेषतः।
ड्व) विद्येश्वराष्टकं चैव द्रव्याणामधिदेवताः॥ 2670
नानाविद्यासमायुक्तं वेदध्वनिसमन्वितं।
नृत्तगीतसमायुक्तं रात्रिशेषं व्यपोह्य च॥ 2671
अन्य प्रभाते विमले स्नात्वा नियतमानसः।
आचार्यो मूर्तिपैस्सार्धं वस्त्राद्यैस्स्वलंकृतम्॥ 2672
पञ्चांगभूषणैर्युक्ताः गन्धमाल्यविभूषिताः।
सर्वाभावे तु रुद्राक्षं धारयेत्तु विशेषतः॥ 2673
पूर्वोक्तैरर्चयेद्धीमान् पूर्णाहुतिरथाचरेत्।
तत्काले ग्रहशान्त्यर्थं गोभूहेमांबरादिभिः॥ 2674
श्रोत्रियं विदुषं शांतं ब्राह्मणेभ्यो ददेत्क्रमात्।
कुंभोद्धरणकाले तु नैवेद्यं दीपमाचरेत्॥ 2675
यात्रादानं विशेषेण आचार्य विप्रदापयेत्।
P. L. 162) आचार्यो मूर्तिपैस्सार्धं कुंभानुद्धृत्य यत्क्रमात्॥ 2676
धामप्रदक्षिणवशात् स्वस्तिवाचकसंयुतैः।
नृत्तगीतसमायुक्तं स्वर्णपुष्पैर्विकीर्य च॥ 2677
शिवाग्रे स्थण्डिलं कृत्वा कुंभं संस्थाप्य यत्क्रमात्।
बालस्नापनकुंभं च पूर्वं चैवाभिषेचयेत्॥ 2678
अन्य . . . कुंभञ्च गंधोदपरिपूरितान्।
तत्तन्मंत्रं समादाय विन्यसेल्लिंगमध्यवनि॥ 2679
तत्तोयैरभिषिच्याथ बहुरूपं समुच्चरन्।
विद्येश्वरघटान् सर्वान् तत्तत्स्थानेऽभिषेचयेत्॥ 2680
द्वारपूजां ततः कुर्यात् पूर्वोक्तविधिना पृथक्।
द्रव्यैः पञ्चामृताद्यैश्च स्नोदैः गंधतोयकैः॥ 2681

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षीरैश्च नालिकेरैश्च पुष्पपक्वोदकेन च।
दाहोपशमनार्थाय यत्नेष्टमभिषेचयेत् ॥ 2682
ग) वस्त्राभूतैः शुचिर्भूतैः वासितैश्च सुशीतलैः।
अभिषिच्य विधानेन यथाविभवविस्तरैः ॥ 2683
मंत्रान्नं तु निवेद्याथ अर्घ्यं दत्वा समाहितः।
घ) हिमतोयैर्गन्धपुष्पैः विलिप्य लिंगपीठकं ॥ 2684
वस्त्रैश्च गंधमाल्यैश्च अलंकृत्य विशेषतः।
महाहविर्निवेद्याथ वक्त्रान्नं तु निवेदयेत् ॥ 2685
तद्दिने तु समारभ्य सङ्कल्प दिवसावधि।
प्रत्यहं स्नपनं कुर्यात् सहस्रं वा तदर्धकम् ॥ 2686
अष्टोत्तरशतं वापि कारयेत्तु दिनं प्रति।
शांति होमं ततः कुर्यात् पञ्चास्त्रमनुना सह ॥ 2687
महाहविर्निवेद्याथ धूपदीपादिभिस्तथा।
श्रीसूक्तं पवमानं च . . . . . नैरपि ॥ 2688
शिवारण्य कवचं जप्त्वा पंचाक्षरमहामनुम्।
मृत्युंजयमहामंत्रं श्रीमत्पंचाक्षरं मनुम् ॥ 2689
अन्यैश्च सर्वमंत्रैश्च शांत्यर्थं जपमाचरेत्।
ब्राह्मणान् भोजयित्वाथ यथाविभवविस्तरैः ॥ 2690
आचार्य दक्षिणां दद्यात् वस्त्रहेमांबरादिभिः।
कर्णपूरैरंगुलीयैः हारकेयूरसूत्रकैः ॥ 2691
अर्चयेत्तु जापिनश्चैव परिचारकसाधकान्।
संतोष्य वस्त्रगंधाद्यैः दक्षिणाभिर्विशेषतः ॥ 2692
दीनांधकृपणादीनां अन्नदानैश्च तोषयेत्।
भूरिदानं प्रकर्तव्यं यथावित्तानुसारतः ॥ 2693
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
आरोग्यमायुः कीर्तिञ्च पुत्रपौत्राभिवर्धनम् ॥ 2694
चिरकालं वसेच्छ्रीमान् अन्ते कैवल्यमाप्नुयात्।
इति शैवशास्त्रे अष्टबंधन प्रायश्चित्तविधि 2695
पटलः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कामिके अष्टबंधनविधिः।

p. 2.163)

अत्र वक्ष्ये विशेषेण अष्टबंधविधिक्रमम्।
पुंस्त्रीं) सर्वशांतिकरं पुंस्त्रीं सर्वकामफलप्रदम्॥ 2696
सर्वैश्वर्यप्रदं पुण्यं सर्वकार्यार्थसाधनम्।
विष्णुभागं तु निर्माल्यं नृपस्यायुष्यनाशनम्॥ 2697
ब्रह्मभागं तु निर्माल्यं ब्रह्मवर्गविनाशनम्।
शिवभागं तु निर्माल्यं गर्भनाशकरं भवेत्॥ 2698
तस्याधारशिलां तेषु दुर्भिक्षं जायते भुवि।
तलं चैव प्रवेशे तु विद्ध्यत्र सर्वनाशनम्॥ 2699
दिनवारमुहूर्तं च वर्जयेत्तु विचक्षणः।
यत्काले बंधने हीने तत्काले सुदृढं कुरु॥ 2700
लाक्षासर्जरपाषाणं ससिद्धं कुरुविन्दकम्।
गुग्गुलुं गैरिकं चैव गुलन्तैलमिहोच्यते॥ 2701
स्वयंभु दैविकं चैव आर्षकं गाणवं तथा।
त्रिबंधं पञ्चबंधं स्यात् अष्टबंधनमेव वा॥ 2702
प्रमादाद्बंधने हीने पूजा नैवेद्य वर्जितम्।
लाक्षासर्जरपाषाणं शंखं च कदुव्वीफलम्॥ 2703
मधुच्छिष्टेन संयुक्तं बन्धयेत्पञ्चबंधनम्।
लाक्षागुग्गुलुपाषाणं संसिद्धं बंधयेद्गुरुः॥ 2704
त्रिबंधमिति विख्यातं पक्वापक्वं तु बंधयेत्।
अपक्वं दैविकं प्रोक्तं पक्वं मानुषमेव च॥ 2705
स्वायंभुवे विशेषेण पक्वापक्वं विशिष्यते।
प्रायश्चित्तं विशेषेण आगमोक्तैः समाचरेत्॥ 2706
प्रथमं मृद्ग्रहणं स्यात् द्वितीयं अंकुरार्पणम्।
तृतीयं बालपूजा च रक्षाबंधं तुरीयकम्॥ 2707
पञ्चमं चक्रयजनं षष्ठमं कुंभपूजनम्।
सप्तमम् अग्नियजनं अष्टमं शोधनं तथा॥ 2708
नवमं रत्नविन्यासं पक्वापक्वमतः परं।
एकादशं बंधनं स्यात् ततः पूर्णाहुतिर्भवेत्॥ 2709
मंत्रंन्यासात्ततः कुर्यात् ततो कुंभाभिषेचनम्।
स्नपनं शांतिहोमं च ततो मंत्रजपं तथा॥ 2710

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महाहविर्निवेद्यञ्च उपचारं ततः परम् ।
आचार्यदक्षिणां कुर्यात् ब्राह्मणान् भोजयेत्ततः ॥ 2711
विशन्महा क्रिया ज्ञेया अष्टबंधन कर्मणि ।
मण्डलं मासमेकं वा पक्षमेवं निरन्तरम् ॥ 2712
-च) स्नपनं कारयेच्छंभोः शांतिहोमं च कारयेत् ।
ततो सायाह्नसमये विघ्नेशं पूजयेत्ततः ॥ 2713
लड्डुकैर्नालिकेराद्यैः चणकाद्यैर्विशेषतः ।
देवं विज्ञाप्य विधिवत् वास्तुपूजां समाचरेत् ॥ 2714
शिवाग्रे स्थण्डिलं कुर्यात्तिललाजसमन्वितम् ।
कुंभं चेद्द्वादकैर्मानैः कलशं प्रस्थमानकम् ॥ 2715
शालिमानमिदं ज्ञेयं तदर्धं तिललाजकैः ।
पद्ममष्टदळं लिख्यं मध्ये कुंभं न्यसेत्ततः ॥ 2766
वर्धन्या च समायुक्तं विद्येश्वरघटान्वितं ।
ससूत्रां सापिधानांश्च पञ्चरत्नसमन्वितान् ॥ 2767
7.2.164) सांगैस्सावरणैर्युक्तान् शिवमावाहयेत्ततः ।
शांतिहोमं ततः कुर्यात् विकल्किः ब्राह्मणैस्सह ॥ 2768
यागारंभं ततः कुर्यात् यथा शास्त्रे प्रचोदितः ।
शिवचक्रं लिखित्वा तु उत्तमस्वर्णपट्टके ॥ 2769
द्वादशांगुलमानेन त्रिशन्निष्कं तु कारयेत् ।
तदर्धं वर्धनी ज्ञेयं तदर्धमाकृतैरपि ॥ 2770
रत्नचक्रसमायुक्तं वस्त्रकूर्चसमन्वितं ।
तन्तुना वेष्टयेत्कुंभान् पवमानांतरांतरे ॥ 2771
आध्यारं तदिष्टपर्यन्तं क्रमादावाह्य बुद्धिमान् ।
मण्डपोक्तैरर्चयित्वा यथाविभवविस्तरैः ॥ 2772
अग्निमाराधनं कुर्यादग्निकार्योक्तमार्गतः ।
ईशदेशे सुवृत्तं स्यात्पूर्वादि चतुरस्रकैः ॥ 2773
प्रधानमीशदेशे तु कुण्डं कुर्यात्सलक्षणं ।
आचार्यो मूर्तिपैस्सार्धं अग्न्याधानं समाचरेत् ॥ 2774
देशिकेन्द्रस्य पुत्रो वा पौत्रो वा तस्य बांधवाः ।
तदनुज्ञाया च ये प्रोक्ता आचार्याः संमता इमे ॥ 2775

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अष्टौ वा चतुरौ वापि होतारस्ते भवन्ति हि।
ततो संशोधनं कुर्यात् आचार्योक्तमूर्तिपैः॥ 2776
पुरातनं परित्यज्य नवरत्नं विनिक्षिपेत्।
बन्धनं च ततः कुर्यात् रात्रिशेषं व्यपोह्य च॥ 2777
अत्र वान्य प्रकारेणाष्टबंध विधिं शृणु।
कुन्दुरुष्कफलं पञ्च लाक्षावां . . . लम्॥ 2778
मधूच्छिष्टं गुलं चैव शर्करा शंखमेव च।
प्रत्येकं द्विफलं ग्राह्यं काषायस्तु फलैककं॥ 2779
माहिषं नवनीतं च तूलं कार्पास संभवम्।
चक्षुर्मानेन विज्ञेयं लोहजं चाष्टबंधनम्॥ 2780
पीठांशं षोडशं कृत्वा एकांशं नवरत्नकम्।
दशांशं सिकतैर्युक्तं पञ्चांशं बंधयेद्गुरुम्॥ 2781
रुद्रसूक्तादिभिश्चैव वेदध्वनिपुरस्सरैः।
अत्र प्रभाते विमले स्नात्वा नियतमानसः॥ 2782
स्वर्णयज्ञोपवीतैश्च कुण्डलैः कटकैस्तथा।
अँगुलीयांगदैश्चापि पञ्चांगैःभूषणैस्सह॥ 2783
प्रत्येकं दशनिष्कैश्च कारयित्वा विशेषतः।
आचार्यो मूर्तिपैस्सार्धं अलंकृत्य विधानतः॥ 2784
सर्वाभावे तु स्वर्णेन कर्णभूषांगुलीयकम्।
तदाभावे तु रुद्राक्षं धारयेत्तत्तदंगके॥ 2785
पूर्वोक्तं रचयेद्धीमान् पूर्णाहुतिमथाचरेत्।
नानावाद्यसमायुक्तं घण्टारवसमन्वितम्॥ 2786
तत्काले तु विशेषेण दशदानं समाचरेत्।
p. 2.165) गजाश्वरत्नदानादीन् तत्काले कारयेद्गुरुं॥ 2787
दासीदासादिकं मञ्चं सोपाधानं कशिपुकम्।
आचार्याय प्रदातव्यं नान्य भोगाय कल्पयेत्॥ 2788
आचार्यो मूर्तिपैस्सार्धं कुंभानुद्धृत्य यत्क्रमात्।
नृत्तगीतसमायुक्तं स्वर्णपुष्पं विकीर्य च॥ 2789
पुत्रभ्रातृकलत्रैश्च यजमानो व्रजेदनु।
धाम प्रदक्षिणवशात् शिवाग्रे स्थण्डिलं न्यसेत्॥ 2790
बालस्थापनकुंभं च पूर्वं चैवाभिषेचयेत्।
अधिवासनकुंभं च गन्धोदपरिपूरितैः॥ 2791

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तन्मंत्रं तु समादाय विन्यसेल्लिंगमूर्ध्नि।
तत्तोयैरभिषिच्यात्तु बहुरूपं समुच्चरन्॥ 2792
विद्येश्वराष्टकैस्सर्वैः तत्तद्देशेऽभिषेचयेत्।
अन्यकाले विशेषेण तत्तत्संख्याभिषेचनम्॥ 2793
अष्टबन्धनकाले तु असंख्यैरभिषेचयेत्।
चुलुकोदकमात्रेण तत्काले चाभिषेचनात्॥ 2794
अन्यकाले विशेषेण अयुतस्नापनं फलम्।
वस्त्रपूतैश्शुचिर्भूत्वा वासितैश्च सुशीतलैः॥ 2795
अभिषिच्य विधानेन यथाविध्यभवविस्तरैः।
महाभिषेकान्तमुमे क्षुदर्थं जगत्रयं भक्षयितुं- 2796
समर्थः तत्कालकैर्वेद्यमतः प्रदेयं नोचेत्तदायु:-
बलवीर्यभुक् स्यात्। ॥2797
मन्त्रान्तन्तु निवेद्यान्न कवचं दत्वा समंत्रवित्।
हिमतोयैर्गन्धपंकैरालिप्य लिंगपीठके॥ 2798
वस्त्रैश्च गंधमाल्यैश्च अलंकृत्य शिवाय च।
महाहविर्निवेद्यान्ते वक्ष्यांतं तु निवेदयेत्॥ 2799
तद्दिनं तु समारभ्य संकल्पदिवसावधि।
नित्यं प्रतिविशेषेण महानैवेद्यमाचरेत्॥ 2800
प्रायश्चित्तार्थमेवं तु शांतिहोमं समाचरेत्।
श्रीसूक्तं रुद्रसूक्तं च ऋग्यादध्ययनैरपि॥ 2801
अन्यैश्च सर्वमंत्रैश्च तथायुपनिषादिषु।
शिवाख्यकवचं जप्त्वा .. चास्त्रं च महामनुं॥ 2802
मृत्युंजयं महामंत्रं श्रीमत्पञ्चाक्षरैर्युतम्।
ब्रह्मसूक्तं स्कंदसूक्तं विष्णुसूक्तं च वारुणम्॥ 2803
कर्तुरिष्टप्रदानार्थं प्रदक्षिणमथाचरेत्।
नित्यं प्रतिविशेषेण ब्राह्मणान् भोजयेत्ततः॥ 2804
चत्वारिंशति निष्कैश्च तदर्धैश्च तदर्धकैः।
उत्तमां मध्यमांश्चैव कन्यसा च त्रिया मता॥ 2805
आचार्य दक्षिणां दद्यात् यथा क्षेत्रधनानि च।
वस्त्रैश्चाभरणैर्गन्धैः ... तृप्तिं समाचरेत्॥ 2806
p.2.166 परिचारेभ्यश्च सर्वेभ्यो दक्षिणां दापयेत्ततः।
तत्कर्मपरिपाकार्थं दक्षिणां संप्रदाय च॥ 2807

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दक्षिणाहीनं तत्कर्म तत्कर्म निष्फलं भवेत्।
तस्मात्सर्वप्रयत्नेन आचार्यं पूजयेत्ततः॥ 2808
दीनान्धकृपणादीनां अन्नवस्त्रं प्रदापयेत्।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ 2809
सर्वदेशाधिपत्यं च सर्वशत्रुक्षयं भवेत्।
आरोग्यमायुः कीर्तिं च पुत्रपौत्राभिवर्धनं॥ 2810
चिरकालं वसेच्छ्रीमान् अन्ते कैवल्यमाप्नुयात्।
इति श्रीमत्कामिकाख्ये महातन्त्रे अष्टबन्धन-॥ 2811

पूर्वप्रायश्चित्तविधिपटलः —

श्रीसहायदाम्ने नमः।

प्रणम्य शिरसा देवं ब्रह्मा पृच्छति शंकरम्॥ 2812
मातृणां स्थापनं किंवा तत्सर्वं ब्रूहि मे प्रभो।
ईश्वर उवाच =
तत्सर्वमखिलं वक्ष्ये शृणुष्व चतुरानन॥ 2813
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डी वीरभद्रकम्॥ 2814
विघ्नेशप्रतिमां कृत्वा स्थापयेद्विधिपूर्वकम्॥
हस्तं वामगर्भ· · · · · ञ्निकारयेत्ततः॥ 2815
चतुर्भुजं त्रिनेत्रं च पद्मासनोपरिस्थितम्॥ 2816
वामे च दक्षिणे हस्ते कृष्णं परशुधारिणम्॥
वीरभद्रं यथाप्रोक्तं ब्राह्मी चैव शृणुष्व च।
द्विभुजां त्रिणेत्रां च सुदीप्तां तु सुयौवनां॥ 2817
दक्षिणे दक्षिणे हस्ते अक्षसूत्रकमण्डलुम्।
(पद्मासनोपरिष्टात्तु ब्राह्मणीं चैव कारयेत्) 2818
मकुटेन समायुक्तां कौमारीं चैव कारयेत्।
द्विनेत्रां चतुर्भुजां देवीं शंखचक्रगदाऽभयां॥ 2819
करण्डमकुटां देवीं सुस्नातां च सुयौवनाम्।
कारयेद्वैष्णवीं देवीं वाराहीं च ततः शृणु॥ 2820

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्विनेत्रां द्विभुजां देवीं हलं मुसलसंयुताम्।
मकुटेन समायुक्तां वाराहमुखसंयुताम्॥ 2821
सुदंष्टेण समायुक्तां वाराहीं कारयेत्ततः।
चतुर्भुजां द्विनेत्रां च श्यामवर्णसमायुताम्॥ 2822
चत्रतोमरसंयुक्तां इन्द्राणीं कारयेत्ततः।
चतुर्भुजां त्रिणेत्रां च खड्गखेटकसंयुताम्॥ 2823
शूलं कपालहस्तां च रौद्रदृष्टि भयानकाम्।
ऊर्ध्वकेशां सुरक्ताक्षां चामुण्डीं कारयेत्ततः॥ 2824
चतुर्भुजं त्रिणेत्रं च विघ्नेशं कारयेत्ततः॥
P.2.167) यरलवशषसहगकारं गणपतिस्ततः॥ 2825
माला-·नलसमायुक्तं बिन्दुनादसमायुतम्।
मूलमंत्रमिदं प्रोक्तं सर्वकामफलप्रदम्॥ 2826
ह्रस्वब्रह्मसमाख्यातं दीर्घाद्यंगानि चोच्यते।
रत्नन्यासं प्रकर्तव्यं सर्वं·पञ्चरत्नकम्॥ 2827
नयनोन्मीलनं कुर्यात् पूर्वोक्तेनैव मार्गतः।
ने) अक्षिहोम··नेत्रेण आज्येनैव शताहुतिः॥ 2827
जलाधिवासनं कुर्यात् पूर्वोक्तेन विधानतः।
जलादुत्तीर्य पूर्वेद्युः प्रविशेद्दालयं प्रति॥ 2828
पूर्ववन्मण्डलं कुर्यात् पूर्वोक्तेनैव मार्गतः।
तन्मध्ये वेदिकां कुर्यात् परितः कुण्डमुच्यते॥ 2829
चतुरश्रं योनिकुण्डमर्धचंद्रं त्रिकोणकम्।
वर्तुलं पञ्चकोणं च पद्मं चैवाष्टकोणकम्॥ 2830
पूर्वादीनि क्रमान्यस्य कुण्डयोन्निधि विन्यसेत्।
इन्दुईशानयोर्मध्ये स्थाग्नन्तु गणाधिपम्॥ 2831
पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्ष्य च।
शालिना विकिरेद्देवीं तण्डुलं तिललाजकम्॥ 2832
शयनं पञ्चाग्निः कल्प्य तस्योपरिन्यसेत्ततः।
ब्राह्माक्षीं मध्यमे स्थाप्य पूर्वे माहेश्वरीं ततः॥ 2833
कौमारीं वह्निदेशे तु वैष्णवीं दक्षिणे न्यसेत्।
वाराहीं नैरृतौ चैव इन्द्राणीं पश्चिमे न्यसेत्॥ 2834

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चामुण्डीं वायुदेशे चोत्तरे वीरभद्रकम्।
ईशान्ये गणपं न्यस्य प्रच्छिन्नपटसंयुतम्॥ 2835
तस्यैव वामभागे तु कुंभान्विन्यस्य देशिकः।
.. अर्चयेद्गंध पुष्पाद्यैः स्वस्वमंत्रेण देशिकः॥ 2836
(रायुधान्) वस्त्रेणावेष्टयेत्किङ्कान् स्वर्णाद्यैरायुधोत्तमान्।
हविर्निवेदयेत्पश्चात् तांबूलं दापयेत्ततः॥ 2837
होमं
ततो प्रकुर्वीत लक्षणेन समन्वितं।
पलाशसमिधायत्तं प्रत्येकं तु शताष्टकम्॥ 2838
तिलान्
समिदाद्यचरून् लाजान् सर्षपांश्च यवान् [illegible]।
मुद्गमाषं च बिल्वं च कदलीफलसंयुतम्॥ 2839
पञ्च ब्रह्मषडंगैश्च प्रत्येकं तु शताहुतिः।
घृतं मिमिक्ष मंत्रेण पञ्चविंशति हूयते॥ 2840
चतुर्दिक्षु चतुर्वेदैः कुर्याद्ध्ययनं तथा।
ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः॥ 2841
ततोऽवसान होमं तु समिदाज्येन संयुतः।
मूलमंत्रेण विप्रेन्द्र प्रत्येकं तु शताहुतिः॥ 2842
हुत्वांते तु स्पृशेद्बिंबं द्रव्यं प्रति विशेषतः।
स्थापयेत्क्षीरभद्रं तु पश्चिमाभिमुखं मतम्॥ 2843
उत्तराभिमुखीं देवीं स्थापयेद्देशिकोत्तमः।
पूर्वाभिमुख देवं तु विघ्नेशं स्थापयेत्ततः॥ 2844
प्रतिष्टा कुंभमादाय स्नापयेत्स्वस्वमंत्रतः।
हविर्दद्याद्विशेषेण तांबूलं दापयेत्ततः॥ 2845
आचार्यं पूजयेत्तत्र वस्त्रहेमांगुलीयकैः।
ब्राह्मणान् भोजयेत्तत्र सप्तकन्याश्च भोजयेत्॥ 2846
(p. 2. 168) कर्तानुवित्तानुसारेण यथाविभवदक्षिणा।
मातृणां स्थापनं प्रोक्तं कुमारस्थापनं शृणु॥ 2847
इति वीरतंत्रे षट् संहितायां मातृस्थापन-
पटलोऽष्टचत्वारिंशत्पटलः —— 2848

अन्न वक्ष्ये विशेषेण मूर्तीनां जटिबंधनम्।
सर्वपापहरं पुण्यं राजा राष्ट्राचलं क्रमात्॥ 2849
मनोरथं च संप्राप्य समरे विजयी भवेत्।
आग्नेय्यामग्निसंभूतं याम्यायां व्याधिसंयुतं॥ 2850
नैरृत्यां ग्रामनाशं स्यात् वारुण्यां वर्षवर्जितम्।
सस्यनाशं तु वायव्यां स्त्री विनाशं तु सौम्यके॥ 2851
ऐशान्यामन्ननाशं स्यात् ऐन्द्रे चैवाभिचारकं।
यदि षोडश कोणेषु ततो भिन्नानि यत्र च॥ 2852
श्व) गौश्च महिषी चैव मृगयन्ति गजाश्वकौ।
यक्षाश्च राक्षसाश्चैव नश्यन्ति तस्य हेतुना॥ 2853
जटिबन्ध विहीनं चेत्तस्यां तां भः क्रमियुतम्।
तस्मात्सर्व प्रयत्नेन जटिबंधं तु कारयेत्॥ 2854
हृश्य मात्रे कृतं चेद्धि दिनान्दीनिन एव च।
तद्धरं च विशेषोऽस्ति दिनादि सुसमन्वितं॥ 2855
अंकुरं कारयेद्धीमान् पूर्वोक्तविधिनान्वितः।
शेषाणि सर्वकर्माणि बंधनोक्तवदाचरेत्॥ 2856
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
इति कारणे प्रतिष्ठा तंत्रे जटिबंधन विधि-॥ 2857 //

–पटलः–

प्रतिपद्याश्विने कार्यं नवरात्रं क्रमात्ततः।
कुहूयुक्ता सदा त्याज्या नाशयेच्च कुलं यतः॥ 2858
न च दर्शकलाप्राप्तिः प्रतिपच्चण्डिकार्चने।
उदये हि मूहूर्तापि ग्राह्या चैव परेहनि॥ 2859
अमा युक्ता न कर्तव्या कर्तव्या परसंयुता।
स्वल्पापि प्रतिपद् ग्राह्या चित्रावैधृति वर्जिता॥ 2860
भविष्योत्तरे। कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता।
मूलानक्षत्रसंयुक्ता सा महानवमी स्मृता॥ 2861
रण्य) विद्यारण्य स्मृतौ तिथि निर्णयः।
उपक्रान्ते शुभे कार्ये दैवे पित्र्ये च कर्मणि॥ 2862
तिथिमासग्रहादीनां दोषस्तत्र न विद्यते।
व्यासः। त्रिमूर्तीकालमके काले दानं दातुं नशस्यते॥ 2863
तमि)

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ग्राह्या प्रयोगपर्याप्तौ सर्वदानेष्वयं विधिः।
कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः। 2864
तस्यां कर्माणि कुर्वीत ह्रासवृद्धिर्न कारणम्।
यो यस्य विहितः कालः कर्मणां समुपक्रमे॥ 2865
विद्यात्मनो भवेद्दुर्गं नोज्झितोपक्रमेण तु।
स्कान्दम्॥ प्रातराहूय मतिमान् कुर्यान्नक्तव्रतादिकं॥ 2866
नापराह्णे न मध्याह्ने पित्र्यकालौ हितौ स्मृतौ।
प्रतिपत्त्सिते पक्षे दर्शविद्धा शुभा स्मृता॥ 2867
कृष्णे द्वितीयया विद्धा त्रिमुहूर्ता भवेद्यदि।
ज्योतिःकाश्यपः-
p. 2.169) प्रतिपच्छुक्लपक्षे तु पूर्वविद्धा शुभावहा॥ 2868
कृष्णपक्षे शुभा ज्ञेया संभवत्स्पर्शिनी भवेत्।
उदये द्विमुहूर्तापि प्रतिपच्चण्डिकार्चने॥ 2869
कुहूयुक्ता सदा त्याज्या नाशयेत्तु क्रमं यतः।
अत्र नवमी निर्णीयते = मुक्ताफले॥ 2870
व्यास) अष्टम्यां नवमीयुक्ता कर्तव्या फलकांक्षिभिः।
न कुर्यान्नवमीं तात दशम्यां तु कदाचन॥ 2871
विद्धा च विविच्या, सा च, दुर्गासरस्वतीपूजादौ
पूर्वविद्धा। पूर्वदिवस ग्राह्या- ने दर्शयुक्ता॥ 2872
उत्तरदिने द्वितीया युक्तेति। तत्र पूर्वविद्धायाः
पूज्यत्वमाह= पैठिनसिः।
पञ्चमी सप्तमी चैव दशमी वा त्रयोदशी। ॥ 2873
प्रतिपन्नवमी चैव कर्तव्या सम्मुखी तिथिरिति।
संमुखं च स्कन्दपुराणे विवेचितम्। संमुखत्वं 2874
सा याह्नव्यापिनी दृश्यते यदा। प्रतिपत्-
सम्मुखा कार्या॥ व्यासोऽपि॥ प्रतिपत् ॥ 2875
सैव विज्ञेया भवेदापराह्णिकीति बृहद्वसिष्ठः।
द्वितीया पञ्चमी वेध्या दशमी च त्रयोदशी॥ 2876
चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे विधिः।
तदनुसारेण=प्रतिपत्स द्वितीया स्यात् प्रति- ॥2877
पद्युते त्यापस्तंबवचनम्॥

कृष्णप्रतिपद्विषयत्वेन संकोचनीयम्।
एवं च नोपोष्याः परसंयुता इति द्वितीया- 2878.
युते उपवासनिषेधः, शुक्लपक्षविषयतया-
योजनीयः। अन्यत्र। कार्यासि माघिरष्टम्यां - 2879
प्रतिपद्वर्तते यदि। क्षीयते मा, युतायां च -
नवरात्रं भवेत्तदा। अन्यत्र स्मृत्यन्तरे - 2880
आश्वयुक् कृष्णपक्षे तु नवरात्रि विधिक्रमः।
प्रतिपद्दिनमारभ्य नवम्यंतं सुपूजयेत्॥ 2881
देवीमावाह्य तत्कुंभे रक्तवस्त्रेण संयुते। इति।
कुंभाग्रे होमकर्माणि रक्षासूत्रं तु कारयेत्॥ 2882
भैरवोत्तरे॥ सौरमासे विशेषेण कन्यमासे ~~विशेषतः~~ तु पूजयेत्।
चण्डिका परमेशानीं अर्चनाद्यैर्गुरूत्तमः॥ 2883
उत्तमैः) सहस्रनामभिः पुष्पैः बिल्वैर्वा पङ्कजोत्तमैः।
पायसापूप नैवेद्यमर्चनान्ते निवेदयेत्॥ 2884
नवरात्रक्रमादेवं व्रतमेष्यति साधकः।
तस्याः पूजाप्रभावेन पुराशक्ति प्रमोदते॥ 2885
धर्मप्रवृत्तौ आवर्तनद्वये तत्र तिथिरेका भवेद्यदि।
सा तिथिः परतो ग्राह्या पूर्वेह्न्यस्तु वा नवा॥ 2886
तिथिष्वावर्तनाद्यस्तु नवम्यन्तासु पूजयेत्।
तिथि प्रयुक्त पूजायां तिथ्यावर्तनेन हि॥ 2887
इति नवरात्रि निर्णयविधिपटल समाप्तः।
श्री सहायेन्द्र दाम्ने नमः॥ 2888

इति दैवज्ञ भूषणे=
भौमं गमूल ग्रहशान्ति ख्वलभ्य योगे-
ग्रहणेऽभिषेके। मास प्रयुक्तेष्वखिले . . .॥ 2889
दृशान्तौ च न मूढदोषः।
p.2.170) दृशान्तौ च न मूढदोषः।
शे) विन्ध्यस्य दक्षिणे देशे नमौढ्यं गुरुशुक्रयोः।
त्रिदिनं वर्जयित्वा तु ततः कुर्याच्छोभनं॥ 2890॥
~~P.2.170~~) तत्र काश्यपः। नवम्यामाश्वयुक्शुक्ले लक्ष्मी
देवीं समर्चयेत्। सरस्वतीमायुदानि युद्धे॥ 2891
जयमाप्नुयात्।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्।
लिंगपुराणे।
दुर्गोत्थानस्य नवमी मूलाद्दृक्षत्रयान्विता॥ 2892
महती कीर्तिता तस्याज्जगन्मातरमर्चयेत्।
तत्र स्मृतिचंद्रिकायां-
लोक्तेन)) शुक्लाष्टम्यामाश्विने मासे या मूलेक्षेण संयुता॥ 2893
लक्षेण।) सानूढा नवमी प्रोक्ता सापि चात्यंतदुर्लभा।
तत्र विश्वरूपे =
आश्विन्यसिते पक्षे प्रारब्धे नवरात्रके॥ 294
यदि स्यात्सूतकं तत्र क्रियाः कार्याः कथं बुधैः॥
सूतकं वर्तमानं चेत् तत्रोत्पन्नं यदा भवेत्॥ 2895
देवी पूजा प्रकर्तव्या मन्त्रैर्यज्ञविधानतः।
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः॥ 2896
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते।
प्रारंभात् प्राक्समारब्धं यदि चेत् सूतकं भवेत्॥ 2897
चण्डिकापूजनं तत्र कर्तुं सिध्यति संशयः।
अन्येन करणीयं स्यात् देव्याः पूजादिकं च यत्॥ 2898
नत्यजेत्पूजनं देव्याः गंगांभसि विनिक्षिपेत्। 2899
महापापी सुरापो वा स्तेयी च गुरुतल्पगः॥
सर्वपातकयुक्तोऽपि मुक्तस्स्यान्नात्र संशयः। इति।
आश्वयुक्शुक्लनवमी मूलाद्दृक्षेषु च त्रिषु॥ 2900
येन केनापि युक्ता सा महती परिकीर्तिता।
चण्डिकामर्चयेत्तत्र विधिवत्प्रयतो नरः॥ 2901
इति दैवज्ञभूषणे = तदुक्तं लिंगपुराणे।
दुर्गोत्थानस्य नवमी मूलाद्दृक्षत्रयान्विता॥ 2902
महती कीर्तिता तस्यां जगन्मातरमर्चयेत्।
नवम्यां आश्वयुक्शुक्ले लक्ष्मीं देवीं समर्चयेत्॥ 2903
सरस्वतीमायुधानि युद्धे जयमवाप्नुयात्।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्॥ 2904

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति काश्यपः=
शुक्लाष्टम्यामश्विनी मासे या मूलर्क्षेण संयुता।
सा महानवमी प्रोक्ता सा पिचात्यन्त दुर्लभा॥ 2905
इति चंद्रिकायाँ=
नवम्या वर्तने ग्राह्या पूर्वतः परतोऽपिवा॥ २
यथा प्रतिपदादि स्यात् नव दुर्गार्चनं यदा॥ 2906
विधिना नव दुर्गां च क्रमात्प्रतिपदादिषु।
तिथिष्वावर्तनाद्यासु नवम्यंता सुपूजयेत्॥ 2907
तिथि प्रयुक्त पूजायाँ तिथि यो वर्तते न हि।
सा च पूर्वा तिथिः प्रोक्ता समन्तात्पूर्ववासरे॥ 2908
आवर्तन क्षयेत्तत्र तिथिरेका भवेद्यदि।
सा तिथिः परतो ग्राह्या पूर्वेऽह्न्यस्तु यानवा॥ 2909
नवम्यां तु जपं होमं समाप्य विधिवद्बलिम्।
अन्यथा कुरुते यस्तु पुत्रदारधनक्षयः॥ 2910
P. 2.171) सूर्योदये पदे रिक्ता पूर्णा स्यादपरा यदि।
बलिदानं प्रकर्तव्यं तत्र देशे शुभावहः॥ 2911
अष्टम्यामुदिते सूर्ये दिनांते नवमी भवेत्।
प्रभाते बलिदानं च क्रियन्मात्रापि लभ्यते॥ 2912
मुहूर्ताद्विनिवर्तेत नवमी यदि वै परा।
प्रारभ्य परा रात्रे तु होमं तत्र समापयेत्॥ इति॥ 2913
दैवज्ञभूषणे =
विधिना नव दुर्गां च क्रमात्प्रतिपदादिषु।
तिथिष्वावर्तनाद्यासु नवम्यां तासु प्रपूजयेत्॥ 2914
तिथि प्रयुक्त पूजायाँ तिथि यो वर्तते न हि।
सा च पूर्वा तिथि प्रोक्ता समन्तात्पूर्ववासरे॥ 2915
आवर्तन क्षये तिथि, तिथिरेका भवेद्यदि।
सा तिथिः परतो ग्राह्या पूर्वेऽह्न्यां तु यानवा॥ 2916
नवम्यां च जपं होमं समाप्य विधिवद्बलिम्।
अन्यथा कुरुते यस्तु पुत्रदारधनक्षयम्॥ 2917

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

44
222

सूर्योदये परारिक्ता पूर्णास्यादपरा यदि।
बलिदानं प्रकर्तव्यं तत्र देशस्सुखावहः॥ 2918
इति धर्मप्रवर्तौ॥
चिन्ता वैधृतियोगे तु यो मूर्खः कुरुते यदि।
तस्य पत्नी वियोगस्तु ~~स्त्री~~योनौ रिभविष्यति॥ 2919
अन्यत्र= चिन्ता वैधृतियोगस्तु भवेद्यामत्रयं यदि।
प्रातरेव यदा कार्यं नवरात्रं तदा ऋषिरिति॥ 2920
तुलागते ग्रहाधीशे चतुर्दश्यामिनोदये॥
रात्र्यन्ते तु प्रकर्तव्यं स्नपनं चाभिषेचनं॥ 2921
मे) तुलार्के पञ्चबन्धौ च तैलस्नानं विशेषतः॥
कृष्णपक्षचतुर्दश्यां निशान्ते चाभिषेचनं॥ 2922
इति कामिके= एकादशी व्रतम्=॥ 2923
एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥
वनस्थ यतिधर्मोऽयं शुक्ल पक्षे सदा गृही-। ॥ 2924
इति कूर्मपुराणे=
एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥
विधवा ब्रह्मचारी च शुक्लपक्षे सदा गृही-॥ 2925
इति भविष्योत्तरे॥
संक्रान्त्यामुपवासेन पारणे तु युधिष्ठिर॥ 2926
एकादश्यां तु कृष्णायां ज्येष्ठपुत्रो विनश्यति।
इति कात्यायनः-
इन्दुक्षये(?) कसंक्रान्त्यां आसिते ~~ऋ~~कादशीषु च॥ 2927
व्यतीपाते जिते ~~श्राद्धे~~ व्रतिनोपनेसेग्रही।
इतिगौतमः॥
आदित्येहानि संक्रान्त्या ~~आसि~~ असितैकादशीषु च॥ 2928
चंद्रसूर्योपरागेषु नोपोष्य पुत्रवान् गृही॥
इतिमत्स्ये= दिनक्षयेऽर्कसंक्रान्त्यां ग्रहणे चंद्रसूर्ययोः॥ 2929
एकादश्यां तु कृष्णायां नोपोष्यः पुत्रवान् गृही॥ 2930
इति स्मृत्यन्तरे=

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रयः पञ्चगता दृद्धिमणुमात्रं प्रदृश्यते।
द्वादश्यामुपवासं तु त्रयोदश्यां तु पारणं इति ॥ 2931
अन्यत्र ॥ नवमी फलमेवं तु दशमी परतो यदि।
P.2.172) उपोष्य द्वादशी शुद्धा त्रयोदश्यां तु पारणं ॥ 2932
इति पाद्मे - अविद्धैकादशी यत्र संपूर्णा द्वादशी भवेत् ॥ ~~2932~~
त्रयोदश्यां कियन्मात्रो द्वादशी यदि वा भवेत् ॥ 2933
उपवासद्वयं कार्यं विष्णुभक्तैर्विशेषतः ॥ ~~2933~~
इति दैवज्ञ भूषणे - ॥ ~~2934~~
अब्दि मासे मलमासे मौढ्ये च गुरुशुक्रयोः ॥ 2934
शुभ कर्म न कर्तव्यं चैत्रं वैशाखयोर्विना।
पाञ्चाल केरलं चैव कौसलं कुञ्जरस्तथा ॥ 2935
अब्दि मासादि दोषायां अन्यदेशे न दोषकृत्।
आरब्धं येन यत् कर्म चादौ तदवसानकम् ॥ 2936
तेनैवानुष्ठितं चेत् तदायुः श्री भाग्यवृद्धिदम्।
अंकुरादि च तीर्थान्तं सूतकं प्रेतके यदि ॥ 2937
उत्सवादि क्रिया काले मध्य दोषो न विद्यते। ध्व
ध्वजारोहावरोहान्ते देशिको व्रतमाचरेत् ॥ 2938
तैलाभ्यंगं निशाभुक्तिं जायास्पर्शं न कारयेत्॥
दीक्षितस्यैकपुत्रस्य मातापित्रोर्मृतिर्यदि ॥ 2939
संस्कृत्य शूलमागत्य यज्ञशेषं समापयेत्।
आरब्धयेन गुणास्तेनं कार्यं समाचरेत् ॥ 2940
तदन्येन कृतं चेत्तत् भवेदाचार्यसङ्करः।
मंत्रहीने क्रियाहीने प्याचार्यस्य कुलक्षयः ॥ 2941
द्रव्यहीनं यदि भवे कर्तारं नाशयेद्ध्रुवम्।
यज्ञकर्माणि मूढात्मा दक्षिणां तं प्रयच्छति ॥ 2942
ऋत्विजामेव फलमस्य नस्य नस्यात्र संशयः।
स्वकर्माणि सदा कुर्यात् ~~यद्यल्प~~ - - - : ॥ 2943
यद्यल्प दक्षिणो यज्ञो यजमानं हिनस्ति वै।
आत्मार्थं पूजयेन्नित्यं सूतके प्रेतकेऽपि च ॥ 2944
परार्थार्चनं कुर्यात् यदि शास्त्रार्थनिर्णयः।
द्विस्यात्) पूर्वाह्णेऽपि विशुद्धिस्यात् मध्याह्ने राजवृद्धिकं ॥ 2945

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सायाह्ने वैश्यवृद्धिस्स्यात् रात्रौ शूद्रेण वृद्धिकं।
एवं परं मुनिश्रेष्ठ ध्वजारोहणकर्मणि॥ 2946
इति कुमारतंत्रेप्युक्तम्।
रत्नस्य च रत्नांगेषु अशनीपतनं तथा॥ 2947
अग्निदाहे दुःकालेषु भवेद्घोरादिपीडने।
आचार्यमरणं चेत्तु बिंबस्य पतनं तथा॥ 2948
संध्यानयोग्यं संध्यानमयोग्यं च नवीकृतम्।
महाक्षप्रोक्षणं कृत्वा शांतिहोमं समाचरेत्॥ 2949
शेषयानोत्सवादीनि अस्त्रप्राधान्यमाचरेत्।
इन्दुशेखरमूर्तिं च तीक्ष्णं वा समाचरेत्॥ 2950
इति भीमसंहितायां॥
रत्नयानस्य विपतनं अशक्तं च नराधिके।
स्फोटित स्यन्दनं दण्डं बिंबादि पतनं तथा॥ 2951
... तलादि गलवर्गकं।
तद्राष्ट्रभूपतीनां च नाशनं च विवर्जितं।
तद्दोषपरिहारार्थं स्नपनं शांतिहोमकम्॥ 2952
मूर्तिहोमं शांतिदिशाहोमं अनावर्तक्रमो यथा।
इत्यंशुमान् तंत्रेऽप्युक्तम्॥ उत्सवबेरपतनं॥ 2953

=

P.2.173) गजाननं भूतगणादिसेवितं, कपित्थजंबू-
फल सार भक्षितं। उमासुतं शोकविनाश- ॥ 2954
कारणम्। नमामि विघ्नेश्वरपादपङ्कजम्॥
सुविशुद्धान् गुरून् नत्वा शुद्धविद्याप्रबोधकान्॥ 2955
सम्यक् शुद्धाख्य तंत्रस्य व्याख्यास्यतत्वतः स्फुटम्।
कैलासशिखरे रम्ये नानारत्नोपशोभिते॥ 2956
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते।
कैलास इति नानारत्नोपशोभिते, मणिमुक्ता- 2957
प्रवाळवैडूर्यस्फटिकमरकतपुष्यराग-
वज्राभिधानरत्नैः पुरुषरत्नैः विष्ण्वादिभिश्च = 2958
स्त्रीरत्नैः इन्दिरादिभिश्च देवरत्नैः इन्द्रा-
दिभिश्च, ऋषिरत्नैः वसिष्ठादिभिश्च = 2959

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

र्यी
~~इत्यर्थात्मक~~ श्रीकण्ठं त्रिदशेश्वरम्।
प्रणम्य चरणौ तस्य स्कन्दो वचनमब्रवीत्॥ 2976
तस्मिन् कैलाशशिखरे सिंहासनासीनं धर्म-
ज्ञान वैराग्यैश्वर्यात्मक सिंहाकार पादुका- ॥ 2977
भिर्विराजमान तादृश पद्मपीठे स्थितं जगद्र-
क्षण व्यापारेणाधिष्ठित त्रिदशेश्वरं त्रिदशा- ॥ 2978
नां देवानां ईश्वरसृष्टि स्थित्यधिकार ब्रह्म-
विष्णोराचार्यं श्रीकण्ठं गुणत्वाधिष्ठितं- ॥ 2979
मन्त्र महेश्वरं दृष्ट्वेति शेषः। तत्परमेश्व-
रस्य चरणौ भोगमोक्ष करण प्रणम्य- ॥ 2980
प्रह्वीभूय स्कन्दषडाननवचनमब्रवीत्।
लोकसंरक्षणार्थं विज्ञसवान्॥
देव देव जगन्नाथ सर्वज्ञ त्रिपुरान्तक॥ 2981
स्थित्युत्पत्तिलयेशान प्रणतार्तिहर प्रभो।
देवदेव देव रुद्रादित्य वस्वाश्विन्याभिधानास्त्र- 2982
यस्त्रिंशत्कोटयः। तेषां देव कर्ता।
जगन्नाथ जगच्छब्देन कालाग्न्यादि भुवनान्युच्यते॥ 2983
तेषां कर्तृत्वात् जगन्नाथ इत्युच्यते।
सर्वज्ञ चिदाचारका प्रतिशमन्याचाक्षम- ॥ 2984
दृशिति चिदचिदात्मक प्रपञ्च त्रिपुरांतकः।
रविचंद्र रश्मींगाश्रुति वाज हिरण्यगर्भ- 2985
यन्त्र भूरत्न नगेन्द्रचाप वातहारिशक्त्या-
p.2.175) वायु कृशानाग्नि बाणजन्यांगस्सन् ब्रह्माण्ड- 2986
वर्ति समस्त चतुर्विंशत् सयोनिबाध्यक पुर-
त्रयाणि संहृतवानिति त्रिपुरांतक इत्यामंत्र- 2987
ये) यते- स्थित्युत्पत्तिलयेशान आत्मनाम-
मनाद्याधारकावृतानां मल परिपाकार्थं- 2988
प्रवृत्तोद्युक्त शक्त्यात्मक व्यापारेण माया-
कार्य तनुकरण भुवन स्थिति च तैस्सन्या- 2988
भियोजनं च तेभ्य विशिष्टि च करोतीति-
स्थित्युत्पत्तिलयेशान इत्यर्थः। प्रणतार्ति- 2989

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हर कर्मसाम्यमलपाकशक्तिपाताद्यगत-
गुरुकवरमुखश्रुतास्वतंत्रतयास्वस्वभुक्ति- 2990
मुक्त्यर्थः। प्रणतानामीश्वरस्य बृहद्धिभूता-
नामीश्वरस्य स्वतन्त्रस्वस्यापकर्तृत्व- 2991
व्यवस्थापयतां आर्तिमलमायाकर्मभिः-
आगतसंसारबाध्यां हरतीति प्रणतार्ति- 2992
भु॥ हर इत्युच्यते। प्रभो सर्वेश इत्यर्थः। सर्व-
लोकहितार्थाय योगिनां रक्षणाय च॥ 2993
मन्त्रतंत्रे पुरा प्रोक्त देव त्वयां प्रोक्तं तु विस्तरात्।
हे देव त्वया मन्त्रतन्त्रं पुरा प्रोक्तमिति सं-। 2994
बन्धः। सर्वलोकहितार्थाय, समस्तजनानां-
दुःखमूलमलध्वंसनेन परभोग परमुक्ति- 2995
योग्यरूपहिताय च। इह प्राधान्यार्थं च योगिनां-
लो) संसारसालाख्य महीरुहसारावलग्नफल- 2996
रसास्वादनलोलुपमर्कटवद्विषय शब्दादि-
विषय सुखास्वादनलोलुप चित्तप्रवृत्ति- 2997
निमित्तवायुना सह हृदंबुजे चित्तस्थिति-
कुर्वतामित्यर्थः। रक्षणाय च मंत्रलयाहंकार- 2998
योगेषु मंत्रयोगिनां मन्त्रात्मकशिव-
स्वरूपदर्शिनां च मंत्रप्रमाणवशांभव- 2999
शाक्तभेदेनानेकविध मंत्रतन्त्रं च क्षामिका-
दाष्टाविंशति भेदभिन्नं च पुरा सृष्टिकाले - 3000
त्वया श्रीकण्ठाभिध्यानलक्षास्व नामिन्य-
P. 2. 176) केन परशिवेनाप्योक्तं। शिवरुद्रभेदेन- 3001
दशाष्टादशभेदतः। प्रणवाद्यानां श्रवण-
धारास्वधृतोपमत्वेन पूरितं तद्विस्तरं- 3002
अनेकशतकल्पायुः श्रवणधारणयोग्य-
मल्पायुषां अल्पबुद्धीनां शक्यमित्यर्थः- 3003

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्मात्पुंसामनुग्रहार्थाय ज्ञानिनां मुक्ति-
कारणम्। शिवज्ञानं परं गुह्यं साक्षेपाद्वद मे प्रभो = 3004
(प) हे प्रभो सर्वेश्वर स्वतन्त्र इत्यस्य बोधने -
पुंसां अनुग्रहार्थाय पुंस्त्व मलयोगिनाम् - 3005
सकलानामित्यर्थः। अनुग्रहार्थाय मलपरि-
पाक विशेषेण परापर भोगमोक्ष सिध्य- 3006
र्थञ्च ज्ञानिनां विज्ञान केवलानां मुक्तिकारणं -
अधिकार मल निवृत्यर्थं च परममिनरं - 3007
दर्शयि नाम चेद्वेषु - फलदं गुह्य मलपरिपाक-
हीनानामप्यश्रुतप्रायं शिवज्ञानं शिवादि- 3008
वस्तु प्रकाशक शास्त्र संक्षेपान्मनुष्यादि -
श्रावण धारण योग्यं लघु स्पष्टार्थं - अतिवि- 3009
स्तार शास्त्र श्रावणेन यद्ज्ञानं सिध्यति तत्
समस्त प्रापकमित्यर्थः। मे श्रोतु कामाय मह्यं - 3010
इत्यर्थः। वद अनुग्रहीष्व। ईश्वर उवाच।
अथातः संप्रवक्ष्यामि यत्त्वया परिचोदितम् ॥ 3011
तत्सर्वं हि समानेन श्रूयतामपि षण्मुख।
हे षण्मुख, सुब्रह्मण्य श्रूयतामिति संबन्धः॥ 3012
अथ अनंतरं अष्टाविंशति संहितोऽप्यनंतरं,
अथ यस्मात्तासां संहिताभिः शिवादिवस्तु- 3013
ज्ञान समर्थं अतस्तस्मात् यत् शिवज्ञानं,
परिचोदितं, अथ षण्मुख न मां प्रत्युत्थापितं॥ 3014
सर्वं तत्प्रवक्ष्यामि युक्तियुक्तं वदामि श्रूय-
तामित्येवं बोधितवान्।
साधकानां हितार्थाय भुक्तिमुक्तिप्रदाय च॥ 3015
वातुलाख्ये महातंत्रे दृष्टो घृतमिवोत्थितं।
साधकानां समयादि दीक्षोत्तर काल प्रति-॥ 3016
पादित शिव पूजाद्यनुष्ठानवतां हितार्थाय-
तदनुष्ठानकरणे ... तत्कराय च यथाव- 3017
दनुष्ठिता चर्यादिक्रियावतां भोगमोक्षप्रदाय च-
भोगस्तु परावरत्रे देन शिवविद्या पञ्चाष्टक- 3018

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p.2-172) रुद्र भुवनाधिपत्यं परभोगः। परभोगस्तु,
शिवेश्वरादि प्राप्तिः। मुक्तिरपि द्विविधा। पर- 3019
भेदेन, अपरा मोक्षस्तु सालोकादि परमात्मक-
निवृत्यादि भुवनप्राप्ति तद्भोगेन भुवनो- 3020
पादानमतीत शिवसमाना। सर्वज्ञाति गुण-
प्राप्तित्वमेव परमुक्तिः। तयोः सिद्ध्यर्थञ्च -3021
वातुलारण्येऽष्टाविंशत्यागमानां वातुला-
भिधान रौद्रभेदेन कामिकायोगजं चिन्त्या-3021
कारणाजित दीप्त समक्ष सहस्र अंशुमत
सुप्रभेदेन दशधाभिन्नं। शिवभेदम्॥ 3022
भूयोपि विजयनिश्वास स्वायंभुवाभयानलं॥
वीर रौरवमकुट विमलचंद्र बिंब प्रोद्गीत॥ 3023
ललित सिद्ध संतान शार्वोक्त पारमेश्वर-
किरण वातुल भेदेनाष्टादश रुद्रभेदेन- 3024
रौद्रं एवं भूताष्टाविंशति वियागमध्येवातु-
लारण्ये महातंत्रे त्रिपदार्थ्यचतुष्पादयुक्ते- 3025
महत्प्रयोगिते विपुलार्थान्तन्यत्वेनोक्त
त्वात् तैत्रं शिवज्ञानं वक्ष्यतेति संबंधात्॥ 3026
दुग्धौ क्षीर विकारे घृतमिव उद्धृतं उत्थापितं।
सारात्सारं समुद्धृत्य शुद्धारण्यं तंत्रमुत्तमं॥ 3027
सहस्रग्रन्थसंयुक्तं सर्वज्ञान समुच्चयं।
सारात्सारं सर्वस्तुषु सारांशत्वमस्ति, 3028
तस्मादुच्यागमस्योत्तर दर्शनानां सिद्धांत-
कथनत्वमेव सारत्वं, तत्सिद्धांतादपि शुणीत- 3029
तत्त्वाविश्व देवतानां मायातीत परशिवादि
वस्त्ववबोधकत्वात् सारात्सारत्वं यथातथा- 3030
शुद्धारण्य तंत्रं। अना.. प्रति शून्यत्वात् उक्तं
फलसाधनमित्यर्थः। सहस्रग्रंथसंयुक्त दश- 3031
शतग्रन्थसंयुक्तं ज्ञान समुच्चयं सकलावबोधस्य-
रूपं गुह्यात् गुह्यमिदं तंत्रं सर्वशास्त्र समुद्धृतं॥ 3032

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

P.2.178) सूक्ष्मात्सूक्ष्मतरं चैव सारात्सारमहोदयम् ।
गुह्यात् गुह्यं गोपनीयं च चार्वाकबौद्धार्हत- 3033
मीमांसादिभ्यो नाचरणीयं । तेषां बहुत्वस्य-
आगमात् गुह्यात् गुह्यं शैवजनानामपि - 3034
भक्तिरहितानां गोपयमित्यर्थः । इदं तंत्रं-
इदानीं वक्ष्यमाणं शास्त्रं समुद्धृतम् । कामि- 3035
काद्यष्टविंशति तन्त्रविरोधेन प्रतिपादितं
सूक्ष्मात् सूक्ष्मतरं चैव सूक्ष्मं नानुमानादिना- 3036
साध्यं तस्यापि पा(श)र्थ ज्ञानमेव सूक्ष्मं-
तस्यापि सूक्ष्मं प्रतिपाद्यार्थं प्रमाणातीत- 3037
गोचरत्वात्तत्स्वरूपकथनत्वादस्यापि
सूक्ष्मतरं सारात्सारं शक्त्योत्युक्त प्रवृत्त- 3038
सु) दशासु प्रवृत्तोद्युक्त प्रतिपादक सारात्
सारत्वाच्च याः शक्तस्वरूप प्रतिपादकमेव- 3039
सारात्सारं महोदयम् । उदयं नाम ऐश्वर्य-
महतां शिवादि वस्तूनां स्वरूपकथनमेवै- 3040
श्वर्यं मुक्तिपदार्थग्रहण कारणमित्यर्थः-
तन्त्रोपदेशने कृतेऽपि यस्य कस्यापि न 3041
प्रदेयमिति वदति । अप्रकाश्यमिदं तंत्रं-
रहस्यं परमदुर्लभम् । शिवज्ञान महासेन- 3042
संक्षेपाद्वक्ष्यतेऽधुना । हे महासेन एवं
भूतं शिवज्ञानं संक्षेपाद्वक्ष्यतेति संबन्धः ॥ 3043
अप्रकाश्यं प्रकाशितुं अयोग्यं प्रकाश्यतं
न भवतीति अप्रकाश्यं शिवादि वस्तु ज्ञानवि- 3044
मुखानामित्यर्थः । इदं तंत्रं शिवाख्ययोद्दिष्टं
शास्त्ररहस्यं मोक्षाभिलाषिणां विविक्ति- 3045
स्थानादुपदेष्टुं योग्यं परमदुर्लभम् । महा
दान्तादि कारण मूर्च्छाकृतानां आत्मानाम- 3046
तीव न साध्यम् । शिव ज्ञानं शिवादि बोधकं-
शास्त्रमित्यर्थः । अतः तस्मिन् शास्त्रे प्रतिपा- 3047
दकानां वस्तु दोष निर्यातित्रयेणोच्यते । प्रथमं-
तत्व भेदं तु दशमं किल उच्यते । एतानि दश- 3048

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p.2.179) एतानि दश भेदानि कीर्तितानि क्रमेण तु।
प्रथमं एतेषां देशभेदानां प्रथम प्रवृत्तत्व- ॥ 3049
भेदं शिवभेदं अनाद्यन्तानंतात्मनां चिदा-
वारकानेक शक्तियुक्तस्या एव मलस्यावार- 3050
वर्त) कत्वं यस्य यदा बाध्या मात्र निवर्तते।
तस्य यच्छोक्तव्यं तद्धेतु भुवनशरीरेन्द्रियो ॥ 3051
पादानात्मक शुद्धाशुद्ध मायादिकर्तृत्वे-
ऽप्यस्याविकारित्वात्तत्वशब्देन कथित- 3052
मित्यर्थः। तस्य शिवस्य भेद निष्कलसकला-
कलसकलत्वेन त्रिरूपमित्यर्थः। वर्णादिभेदकं- 3053
कन्दं च क्रं भेदानां निमित्तकारणस्य विहाय-
प्रथमताब्दत्व भेदकथने किंवा नियामक- 3054
इत्युक्ते वर्णादिभेदानां शिवभेदज्ञानस्योग-
त्वात् अंगिनो शिवभेदस्य भेदं प्रथमत एव- 3055
वक्तुं युज्यते। द्वितीयं वर्णभेदकं चक्रादिभे-
दानानिमित्तकारणस्य वर्णस्य भेदद्वितीयम्। 3056
शिवभेदककथनानंतरं वक्तुं योग्यमित्यर्थः।
3057
द्वितीयस्य क्रभेदस्य कस्य यन्त्रस्य भेदकं-
कार्यकारणयोरभेदोपचारादिति यन्त्राका-
त्वेन) रत्वेन लिखिताक्षराणां भेदं स्वरूपं, तृतीयं- 3058
वर्णभेदोक्त्यनंतरं वक्तुं योग्यं चतुर्थं वर्ग-
भेदकं मंत्रभेदस्य पूर्वमेव वर्गभेदोक्त्या- 3059
भावे मंत्रस्योद्धरणं न भवति। तस्मान्मन्त्र-
भेदस्याग्रे वर्गभेदं सात्विकादिवर्गत्वेना- 3060
क्षराणि व्यवह्रियन्ते। पञ्चमं मन्त्रभेदं वर्णादि-
मंत्रज्ञानस्य यो-) भेदानं तस्मैव मन्त्रज्ञस्योग्यत्वात् - वर्गो- 3061
क्त्यनंतरं मंत्रभेदं एकमूलतत्वाद्यात्मरूप-
त्वेन भिन्नमंत्ररूपमुच्यते। षष्ठं प्रणवमुच्यते ॥ 3062
ब्रह्मभेदानामीशानपुरुषाघोरवामजात-
मंत्राणां प्रणवाहरूपाकारो मकारबिन्दु= 3063
नादे) नादेभ्यो द्भवत्वात् ब्रह्मभेदकथनस्याग्रे- 3064
प्रणवभेदमुच्यते। तदुक्तं सद्यश्चाष्टकला-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कला ज्ञेया अकारक्षकारसंभवः।
p. 2.180) सप्तमं ब्रह्मभेदं तु अंगभेदस्य पूर्वं ब्रह्म- ॥ 3065
भेदं वदामि। ब्रह्मणा मूर्ध्नादि प्रधान-
स्थानोपयोगिनां भेदस्वरूपं वक्तुं युज्यते- ॥ 3066
इति कृत्वा वदामि। अंगभेदं तु चाष्टमं। अंगानां
शिवांगभूतांगविद्यांग कूटांग शक्त्यांग- ॥ 3067
सामान्यांगानां भेदं एकैकस्य दशाविषड्वि-
धत्वं। ब्रह्मभेदोक्त्यनंतरं मंत्रजातं वक्तुं 3068
शक्यते। मन्त्राणां जन्मभूमिरिति तदङ्गेति-
वदामि इत्यर्थः। दशमं कीलमुच्यते। एतानि- 3069
दशभेदानि प्रोक्तानि तत्वभेदादिभेदानि-
दशाध्या भियन्ते। तानि क्रमेण, यथाक्रमं - 3070
कीर्तिता दशः प्रोक्तानि, पूर्वोक्तदशविधानां-
भोगानां मध्ये तत्वभेदं शिवस्य निष्कलादि- 3071
भेदं ~~क्ष~~ एवं च। एतेषां तत्वादिभेदानां पूर्व-
प्रश्नमतः तत्वभेदं शिवभेदं वदामि। निमित्ते 3072
त्रिविधं) तत्वं ~~त्रिविध~~ ज्ञेयं शिवस्तु त्रिविधो भवति। तस्य-
भेदं त्रिविधस्यापि ~~श्र~~ येऽहमभि करोति। सुब्रह्मण्यं- ॥ 3073
शिव सदाशिव महेशं तत्त्रिविधो भवेदित्याह-
शिवस्सदाशिवं चैव महेशश्च त्रिधा स्मृतः॥ 3074
शिवतत्वं महासेन निष्कलं त्विति कीर्तितम्।
सकलं निष्कलं चैव सादाख्यमिति चोच्यते॥ 3075
महेशं सकलं विद्यात् त्रिविधास्ते भवंति वै।
हे महासेन ते शिवा त्रिविधा भवंति इति- ॥ 3076
संबंधः। शिवस्सदाशिव महेश इत्युद्देशः।
क्रमतः उद्देश प्रकारेण त्रिविधो भवति ॥ 3077
शिवादीनामुद्दिष्टप्रकारेण सामान्यलक्षण-
मुच्यते। शिवतत्वं निष्कलं लक्षयोरभेदात् निष्क- 3078
लमित्यर्थः। कालशब्देनावयवमुच्यते। तदस्य-
नास्तीति निष्कलं इति कीर्तितं। कडङ्गाद्यङ्गं भोग- 3079

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

साधन तनुकरणाद्युपसंहृत्य स्वस्य कारण
लीनं कृत्वा यदा तत्कारणमाक्रम्य मुकुलित- 3080
शक्तिप्रदः सन् परानपेक्षो भवति। तदानीं-
p.2.181) निष्कल एव शिव इत्युच्यते। तदुक्तं पौष्करे॥ 3081
शक्तोऽयं शक्तयो यस्माद्योगादि क्रियाच्युत।
शिव एवावतिष्ठन्ते निष्कलश्च स एव तु ॥ 3082
इति। भोगकारिकायामपि। न कालादि कला-
पिण्डस्सम्बन्धोऽसौ यदा पशुः। कदाचिदपि- 3083
देवेशस्तस्माद्देशस्तु निष्कल, इति। सिद्धांत-
सारावल्यामपि, परानपेक्षं शिवसंज्ञमस्येति ॥ 3084
श्रीमन्मृगेन्द्रेऽपि।
भोगसाधन माक्षिप्य कृत्वा कारण संश्रियम्।
तत्र सात्मकमाक्रम्य विद्यमायावतिष्ठते ॥ 3085
इति सकलनिष्कलं सादाख्यं संहृत समस्त-
त) जीवानां मलविश्लेषभावनो मोक्षासंभवात्- 3086
तदर्थं प्रागार्जितानेक पुण्यापुण्यात्मनां कर्मणां-
भुक्त्यर्थं तदनुकरणादि संसारैः आत्मवर्गा- 3087
योक्तुं इच्छन् यदा सृष्टिनिकटे तदुपादानतया-
बिन्दूपादानरूप बिन्दुमाश्रितिष्ठति। तदानीं- 3088
सावयवोपयोनि विद्यापि स विशेषात् सकल-
निष्कलश्च भवति। तदुक्तं पौष्करे॥ 3089
उद्युक्तस्तु यदा कार्ये बिन्दुं भोगाद्यं तदा।
लभते शिव इत्युक्तः स एव च सदाशिवः॥ 3090
तत्वत्त देव सादाख्येन शिवाख्यस्तु ते भिदेति-
महेशं सकलं बिन्दुं मायोपादानजनित- 3091
तदनुकारणादिभिरात्मानं यदा कुन्दलिन्दं-
भोगं प्रयच्छति, तदा शिवसंज्ञक एव भगवान्- 3092
सकल इत्युच्यते। शक्ते शक्तोद्युक्त प्रवृत्ति-
निष्कल सकलाकल सकलावस्था शिव ॥ 3093

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सदाशिवमहेशभेदेष्वधिकार एव द्विशि
शिवो भवति। अन्यथा शिवस्यापि संहृतास- 3094
वस्था भेदेषु साकल्यादि विकारित्वं चेत्-
अस्मदादिवत्तनुकरणादिमांस्यात्तदविशि- 3095
ष्टकर्मिणां न संभवति। कर्मापि न मलरहि-
तानां संभवति। तस्मात् शिवोऽपि बन्धत्रयो- 3096
P-2.182) भि भवतीति चेन्न। शिवोऽनादिसिद्धनित्य-
निर्मल सर्वविषयार्थमुक्क्रिया शक्तियुक्तत्वादात्मनां 3097
भोगमोक्षकारणाय इच्छाविग्रहमंगीकरोति।
इत्युक्ते तदिच्छाविनियोग्य वस्तुनि न प्रवर्तते॥ 3098
(तदुक्तं = लयादि भेद प्राशक्तो यदुपाया शिवस्य तु)
(स बिन्दुरिति
ईश्वरस्य निर्मलत्वेऽपि परिग्रहांगीकरणे- ॥3099
मुक्तशिवा नाम विनिर्मोक्तुक्रमेव शरीरादि-
संभवत्येव। तदुक्तं लयादि भेद प्राशक्तो यदु- 3100
पाया शिवस्य तु सबिन्दुरिति मदव्यसैव-
कुण्डलि निर्मितेति अन्यत्र लयभेदादि- 3101
करणान्तभेदो वास्तव शिवेकं तु बिंदोर-
नांच वास्तवा एव ते मताः॥ सिद्धांतसारा- 3102
वलयां अपि रूपं परापे क्षमिणि, नन्वीश्वरास्ति-
त्वे कर्मत्वा प्राणमित्युक्ते प्रत्यक्षं प्रमाणस्य - 3103
तावन्नासौ गोचरः। अतीन्द्रियत्वात् आग-
मोऽपि तस्मिन् प्रमाणत्वेन निवर्तते। दृष्टांत- 3104
रत्वादसंभवादुत्पत्तिमानमपि न संभवति।
सदृशवस्तुनोऽभावात्। तस्मादनुमानमेव- ॥3105
प्रमाणं भवति। देहादि वस्तु, कार्यत्वधर्मकं-
सावयवत्वात्, यद्यत् सावयवं तत्कार्यं - विशि- 3106
(न्हा) ष्ट कर्तुर्विनाभावि यथा। वस्त्रादिकमिति - ।
तस्मादिदमुर्वी पर्वतादिरूप जगता तज्ज्ञतोपादानादि॥ 3107
ज्ञान विशिष्टं कर्तारं गमयति। तस्माच्छिव एव-
कर्ता भवति। एवमुक्तो ईश्वरस्य सर्वकर्तृत्वं- 3108

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वल्मीकादीनां कर्त्रन्तरोत्पत्तिदर्शनात्
तत्रापि ईश्वरस्य कर्तृत्वे दृष्टान्ताभावः - 3109
प्रसज्यते तन्न । कर्तृत्वं द्विविधं संकल्पात्
करणादपि । शिवस्तु संकल्पमात्रेण सर्वाणि - 3110
करोति । कुलालादयस्तु करणकर्तारः कुलाल-
कर्तृविषयेऽपि शिवकर्तृकमेव, शिवाधिष्ठि- 3111
तेन कुलालेन घटादिकं कर्तुं शक्यते । तस्मात्
सर्वकर्तृत्वहानि दृष्टान्तोऽपि भवति । पक्ष- 3112
धर्मत्वेन महानसवत् शक्यात्मनैव करणे-
नेश्वरः सर्वं जानाति करोति च ईश्वरः । किं- 3113
p. L-183) शरीरी वा शरीरी उभयरूपित्वे शशविषाणप्रायो-
उभयरूपित्वे त्वन्योन्यविरुद्धधर्मक्रियाधि- 3114
करणत्वात् अनेकान्तवादो भवति - (वादनुभव-
रूपि) अशरीरत्वे शब्दमात्रमेवाङ्गीकरणीयं ॥ 3115
शरीरवत्त्वे त्वस्मदादिवदनेकदेशस्थ सम-
कालक्रियमाणयागादि कर्तृसान्निध्यं न भवति - 3116
सूर्यादिवदिव तत्र तत्र सान्निध्येऽनुपपत्तिरिति-
चेन्न । सूर्यादीनां स्वभास्करत्वादुच्यत- 3117
रस्थानस्थत्वमेव सान्निध्य तद्वदस्य दृष्टि-
गोचरोऽपि स्यात् । शरीरसद्भावे तदस्य - 3118
शरीरं स्वनिर्मितं वा परनिर्मितं वा । परनि- 3119
र्मितत्वे तस्येश्वरस्य हानि स्वनिर्मितत्वे-
सर्गकाले शरीरमस्ति वा न वेत्याशंका भवतीति-
अस्ति चेदनवस्था । नास्ति चेदपि न विसृजति । 3120
तच्च बिन्दुमायादि कार्यैस्तत्त्वादिभिः निर्लेप-
त्वादि शिवो बध्यते । तस्माच्छिवघन एव शिवो- 3121
ज्ञेयः । ननु पञ्चवक्त्राकारत्वं कथं सिध्यति ।
ध्यानपूजार्थमेव । न ह्याकारत्वं पञ्चकृत्योप- 3122
योगिभिरीशानादिरेव शक्तिभिः पञ्चवक्त्र-
मुख्यादि चरणान्तमूर्तिमत्वं सिद्धं, उपचारादेव - 3123
न वास्तवं । उक्तं श्रीमन्मृगेन्द्रे, तत्र ५ः । पंचभि-
र्मन्त्रैः पञ्चकृत्योपयोगिभिः ईशतत्पुरुषाघोर- 3124
वामजैर्मस्तकादिकमिति । पौष्करेऽपि । साधकस्य तु
पर्यार्थं तस्य रूपं स्मृतमिति । अन्यत्र कारवान्- 3125

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वनियमात्लुप्तस्यो नवस्वनाकारमुपैति-
निबद्धिरिति। तनुशरीर वाङ्चैश्शरीरं- 3126
सृजति नाङ्ङ्घिरिदं न यत्नात्मतःस्वशरीर-
त्वेऽपि स्वदेह स्पन्दादौ सामर्थ्यं दृष्टं-यथा- 3127
मूर्तित्वेऽपि कालस्य फलप्रदत्वं-वायोर्यथा-
मूर्तित्वेऽपि कालस्य फलदत्वं वायोर्यथामूर्ति- 3128
मद्वृक्षचलनं तथैवेश्वरस्यापि मूर्तिमत्त्वमेव-
वरं अलमिति प्रसंगेन, प्रकृतमनुसरामः।। 3129
शिवादीनां परिगणनाप्याह — शिवमेकं वि
(p. 2.184) जानीयात् सादाख्यं पञ्चधा भवेत्। महेशे- 3130
तु महासेन पञ्चविंशति भेदकम्। शिवं शिवाख्य-
लयावस्था निष्कलमेव, तदानीं उपाध्यभावात्- 3131
निर्विकल्पकविषयादित्यर्थः। सादाख्यं
शिवसादाख्यादि पञ्चविधं भवेत्। तदानीं- 3132
उपाधयवच्छिन्नत्वात् महेशं पञ्चविंशति
भेदं भवति। प्रवृत्तत्वादधिष्ठेयादधिष्ठातृ 3133
भेदत्वेन विद्यते। तदुक्तं - किंतु यः पति-
भेदं करोति - स तत्र तत्रास्य कर्तृविधं हानल- 3134
तं। वधुरिति। यथैकस्या वह्निशक्तेः कार्यभेदात्
अनेकत्वं सिद्धान्तं तथैवेश्वरशक्तेरपि विद्या- 3135
दि विकारसमयेषु भिन्नत्वं सिद्धम्। तत्त्वसंयुत-
मेतन्महेशसादाख्याभिधानेनेमेकत्रिंशत्- 3136
भवतीति वक्ष्यते। एतत्तु तत्त्वसंयुक्तमेक-
त्रिंशदिति स्मृतम्।
शिवस्य लक्षणं वक्ष्ये समासात्[चूत्] षण्मुख। 3137
शिवादि भेदमेकत्रिंशति भेदेन भिन्नं एतेषां-
पूर्वं शिवस्य लक्षणमुच्यते। निष्कलस्य शिवस्य- 3138
स्वरूपमाह -
शिवं परात्परं सूक्ष्मं नित्यस्सर्वगताव्ययम्।
अनिन्दितमनौपम्यं अप्रमेयमनामयम्॥ 3139
शिववाक्यपूर्वकमनामयपर्यन्तं वाक्य-
दशकमपि तस्य निष्कलस्वरूपप्रतिपादकं॥ 3140

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भवति। तद्यथा शुद्धत्वात् शिवमुद्दिष्टं परादूर्ध्वं-
परात्परं व्योमातीत मनुस्सूक्ष्म नित्यं कारण-॥ 3141
शून्यतः व्याप्य सर्वगतं प्रोक्तं अक्षिणामव्ययं-
भवेत्। अमलो निन्दितश्चैव यमसाद्दश्य मनौ-॥ 3142
पमं। प्रमाणव्यतिरिक्तत्वादप्रमेयमिति स्मृतं।
निर्गुणत्वाद्विशेषेण अनामयमिति स्मृतम्॥ 3143
इत्येतैर्लक्षणैर्युक्तं शिवरूपमिहोच्यते।
शुद्धत्वाच्छिवमिति शुद्धत्वात् स्वभावतो ॥ 3144
अनादिकत्वात्मोहदम्। रागविषादशोष-
p.2.185) वैचिन्त्य हर्षकारुण्य सहाविप्य मूलवृत्तिकार- 3145
ण एव मलशून्यत्वाच्छुद्धं, तस्माच्छुद्ध-
त्वात् शुद्धिकरणत्वाच्च शिवं। येचान्ये परमा- 3146
पर मोक्षभाजस्तिष्ठन्ति, ते सर्वेऽपि तत्प्रसा-
दाभावे(स)स्तकलुषः। येचान्ये मुमुक्षवः तानपि- 3147
स एव मोचयति। तस्माच्छुद्धि शुद्धत्वादेव शिवं-
शि) भवति। ननु सर्वात्मनां स्वातन्त्र्यत्वं तन्निमि- 3148
त्तजन्यं भवति। निमित्ताभावेऽपि तद्भवतीत्युक्ते-
मुक्तशिवानामपि संभविष्यत्येव, तस्मादपि -3149
वो) बोध्यतीति। मोक्षत्वमेवास्वातंत्र्ये तत्तन्मु-
क्तत्वाद्विवशा य स्वकर्मफलभोजने, विमुक्तौ- 3150
च प्रेरकमपेक्षन्ते। स तु कर्ता मुक्त एव भवति।
पूर्वं शाकृन्मलादि बंधनबद्धस्स एवात्मबंध- 3151
(ख) शून्या मुक्त इति व्यवह्रियते। न(त्वा)न्यः। लोकेऽपि- 3152
यः कश्चित् निगलादिबन्धनयुक्तो भवति;
नद्युगम एव मुक्तेत्युच्यते। तस्मात् बंधशून्य- 3153
त्वात् शिवस्य न मुक्तत्वं तद्विना कर्तृत्वमेव-
नास्तीति -कश्चित्- तन्न। तेषां पूर्वं मायोदर-
मद्ध्यस्थानां अनादिमलशून्यकर्तृकान- - 3154
कोणाप-) कोणैव मुक्तत्वं। अन्यथा मुक्तस्यापि-तत्
पूर्वमुक्तस्यापि- तत्पूर्वमुक्तस्यापीत्यानवस्था= 3155

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दुर्निवारा। तस्मादनादिसिद्ध एव कर्ता श्रयो-
ऽपि मुक्तात्मा - तथैवान्यं मुक्तं दृष्टांततयैव- 3156
करोतीति प्रवाहेश्वरवादी प्रत्यवतिष्ठते -
तन्न। ऐश्वर्यस्वरूप ~~पक्ष~~ व्यक्तिलाभात्मकत्वेन 3157
नेशा) विनाशानुपपत्तेः। अनेन अनेकेश्वरपक्षो
निरस्तः। मुक्तिशिवानां सर्वानिदृक्क्रियात्वेऽपि- 3158
न ते सृष्ट्यनादिकं कुर्वन्ति। अनादिभिः व्यक्त-
अनिर्दं) दृक्क्रिया भावात्। परशिव एव अनिद्रूयं प्रनम- 3159
तया सृष्ट्यादिकं करोति। अविकारिण कृतशक्तिः
प्रचोदिताः कुर्वन्ति। न स्वातंत्र्येण। परादूर्ध्वं- 3160
परमिति। परात्परमिति कौऽर्थः। परादूर्ध्वत्वा-
देव भवति, परशब्देनात्रेश्वरशब्दास्सान्नि- 3161
ध्यावरण एवोच्यते। तदुक्तं परो देहितान्खिला-
परार्थं क्ष्मादय स्त्रेति येतु षट्त्रिंश कृतत्वमध्ये 3162
p. 2.186) वस्तत्व स्थितिमेव कैवल्यमित्यभिमानिना
तिष्ठन्ति। ते पराशरीर परिग्रहत्वात् चार्वा- 3163
कौलिक ज्योतिषाणा स्थूलभूत मध्यस्थिति-
रेव मुक्तिम वैशेषिकाणां अहंकारतत्व- 3164
स्थितिरेव मुक्तिः। इन्द्रिय चैतन्यवादीनां इन्द्रिय-
तत्वस्थितिरेव मुक्तिः, वेदान्त सांख्य पातंजलिनां 3165
१०७६ पुरुषतत्वस्थितिरेव मुक्तिः। पाशुपतोत्पत्ति-
न्यायवादीनां मनस्तत्वस्थितिरेव मुक्तिः, 3166
पाञ्चरात्रिणां प्रकृतितत्वस्थितिरेव मुक्तिः।
~~इन्द्रिय~~ इन्द्रियचैतन्यवादीनां इन्द्रियतत्वस्थिति- 3167
रेव मुक्तिः। वेदान्त सांख्य पातंजलिनां पुरुष-
तत्वस्थितिरेव मुक्तिः। बौद्धानां बुद्धितत्व- 3168
स्थितिरेव मुक्तिः। पाशुपतोत्पत्ति साम्यावेश-
साम्यवादीनां च मायातत्वस्थितिरेव मुक्तिः॥ 3169
शिवप्रयोज्य च कर्तृत्पादीनां ईश्वरौदा-
ऽन्य मुक्तिः, कर्तृत्ववादीनां ईश्वरतत्वस्थिति- 3170
रेव

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रेव मुक्ति शिवप्रयोज्यत्व कर्तृत्वादीनां
ईश्वरो द्वादिन्य मुक्तिकर्तृत्व वादीनामीश्वर- 3171
तत्वस्थिति रेव मुक्तिशाक्तानां मुक्तिगारुड-
भैरववामभूत तन्त्राणां च निवृत्यादि भुवन- 3172
प्राप्तिः। तदुक्तं- चार्वाका कौलिका ज्योति-
शास्त्रज्ञाश्चैव भौतिकाः। वामदक्षिण मार्ग- 3173
स्था पिशाचादि पदस्थिताः॥ तन्मात्र सिद्धा-
स्मार्तश्चक्षुरादिन्द्रियं परे। वैशेषिका- 3174
स्त्वहंकारे मतस्थान्यवादिनः। बुद्धितत्वे-
स्थितां बुद्धौ गुणाषुष्याद्धता स्थिताः। प्राकृ- 3175
ता पाञ्चरात्रा इति मन्यन्ते प्रकृतिर्हरिः।
वेदान्ताख्याश्च साख्याश्च योगिनः पुरुषे स्थिताः॥ 3176
पाशुपतस्तु माया संविद्यायां तु महाव्रताः।
तागति) शक्तितत्वे तदद्वैतमिच्छन्ति बिन्दुजे॥ 3177
मुक्तिस्थानानि बाह्यानां मुक्तानीह प्रसंगतः।
एतेषां तत्वासीत एव तदाधिपतित्वं-॥ 3178
एष्योपि परब्रह्मविष्णु रुद्राविद्याविद्ये-
श्वर सदाशिव इति शिवास्ते शिवशरीरण एव-॥ 3179
तदुक्तं- कमले शाश्वत रुद्राः महेश्वरोन्य-
परशिवः सकला एते कारण संज्ञा स्वस्वाध्व- 3180
व्यापिन स्वमात्रास्तेति एतेषां पराणां देहिना-
मित्यर्थः। ऊर्ध्वं नाम स्वतंत्रतया तत्ताधि- 3181
कारिणां सृष्ट्यादि कर्तॄणां प्रेयणां प्रेरकत्वं-
तस्मात् पराणां प्रेरकत्वात् परात्परं भवति -3182
अथवा परा मुक्ताणुवर्गास्तेषामप्यस्य
प्रसादसिद्धापवर्ग प्राप्तित्वात् परात्परमिति -3183
वक्तुं युज्यते। अथवा बिन्द्वादयः परमकार-
णत्वात् परास्तेषामनवच्छिन्नत्वाच्च- 3184
परादूर्ध्वं तस्मात्परात्परमिति ज्ञायते
महतो महीयानित्यर्थः। व्योमातीत तत्- 3185

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सूक्ष्मं व्योमातीत तन्तुत्वादित्यर्थः। व्योमशब्देन
अत्र स्वपरप्रकाशक शवलक्षणोक्त्यवसरे- 3186
पठित्वा न मया कार्याकाशो भवति, व्योमचि-
दाकाशः तस्याश्चिद्रूपयादि वि अतीतन्तु॥3187
अतिक्रान्तशारीरीत्यर्थः। चिदाकाशनिष्टस्व-
भावः परैरनुपलभ्यमान स्वरूपमित्यर्थः। श्री॥3188
मदुत्तुङ्गे।
अनापत्युराधिष्ठानं स्वशक्तिकरणात्मकम्।
तस्यादि विशुद्धीप्सात्मेति, अनुपलभ्यमान- 3189
स्वरूपत्वात् सूक्ष्मसर्वार्थ दृशां नापरोक्षमत-
एव अणोरणीयानित्यर्थः। अनेन कर्मकाले- 3190
श्वरवादिनौ प्रतिक्षिप्तौ जडरूपिणौ तयोः
अचेतनत्वात् चेतनाधिष्ठानं विना प्रवृत्त्य- 3191
र) नुपपत्तेः। बैन्दवशरीरो प्रयोगित्वमचेतन-
अचेतन) रक्ष न घटते। तस्य कर्त्रन्तरापातादनवस्था- 3192
न्य) प्रसङ्गते नित्यं कारण शून्यतः। सहकारि-
विरह * प्रयुक्तकार्याभावत्वमेव कारणत्वं- 3193
सत्येव सहकारि समुदाये यज्जन्यते-
तदभावे वा घटपटादिकं तदनित्य दृष्टं- 3194
भूयो कारणजन्यत्वमेव नित्यत्वं तदुक्तं-
हेतुमत्त्वमव्यापि सत् क्रियमनेकाश्रितं- 3195
p.2.188) लिङ्गं सावयवं परमन्त्रमव्यक्तं, विपरीत-
मव्यक्तमिति तस्मात् बिन्दुमायाकार्यवत्तस्य- 3196
कुत्राप्यजनकत्वतो नित्यम्। बौद्धादीना-
मिव क्षणिको भवति। एवमन्यं ते ग्राहक- 3197
रूप ज्ञानमर्थेन्द्रियासक्ते सम्भिव्यञ्जकस्य
नां) स्य घनानाविमर्शकस्य ग्राह्यस्य घटपटा- 3198
द्यर्थस्य च चक्षुरादीन्द्रियस्य आलोकादेश्च-
अनतिस्थौर्ययोगात मुहुरेवोत्पद्यमानं स्यात्- 3199

भिन्नं तैस्तैरुपाधिभिः क्षणिकं व्यज्यते,
तदेव परम प्रमाणं। तत्तदर्थ प्रकाशिक ज्ञानानां - 3200
क्षणिकं भेदेनाप्रतिभासनात् व्यतिरिक्तमपि-
ज्ञान जलधारा प्रवाहवत् तुल्यापरोत्पत्ति- 3201
स्यां) भ्रमात् स्थैर्यमिवाहाति विकल्पितः तस्यैं
मध्यारोपितः स्यात्। क्षणिकमेवास्तु ज्ञानं-तत- 3202
कारण को ग्राहक रूप्यात्मा स्थैर्य इति चेन्न-
ज्ञानाद्व्यतिरिक्तात्मानि सत्येव, अन्य एवात्मा- 3203
भवति। स्वध्यात्मत्वात्। अनेनात्म ग्रहो भवद्भिः
भवार्थविषय) अंगीक्रियते। यतः पूर्वानुभव, पादार्थ विषणकं- 3204
सदेवार्थक्रिया कारित्वात् क्रमेण युगपत्
व्यर्थ क्रियां कुर्यात्। नित्यं वस्तु युगपत करोतु; 3205-
उक्त क्रमेणोभयथापि करोत्युक्ते तथाविध
करणमेव नास्ति - अप्रच्युत स्थिरैः कामिनि- 3206
संसिद्धौ कालांतरेण नित्यं तदैव किं न करोति।
कालांतरापेक्षिकं कुर्यादित्युक्ते नित्यस्वभावस्य- 3207
नास्त्येव, करणोद्भयो व्यतिरिक्तस्य किं तद-
पेक्षाया स्वभावस्यैकरूपत्वात् तदनपेक्षत्वं- 3208
एव वरं। तदपेक्षात्वेतु अभेदतो विनाशाद्व्यादि-
नित्या भवतीति वदामः। सहकारिणां संनिधौ-3209
अर्थ क्रिया कार्यत्युक्ते तदसन्निधानकुर्वा-
णस्योपालंभ एव नास्ति। सहकारिणो मुख्य-3210
ता त्राकिंकरास्युः चेत किमर्थं तदपेक्षा -
p. 2.189) तैरव्यतिरिक्त) किंचित् कारयति, तैर्व्यतिरिक्त कार्यदुक्ता - 3211
व्यतिरिक्तं कारणे व्यतिरिक्तस्य करणापे-
क्षया सहकारिभिस्सह व क्रियते इतिवक्तु- 3212
न युक्तं, करणे ~~व्यतिरिक्तस्य~~ भवन्तः करणं -
पुनः त्रिक्षणावस्थायीवि भवंति इति भवद्भिः; -3213
अभ्युगतः। सत एवात्मनः प्रवृत्तिः रविकिर-
णादेवः प्रतिपद्यते, सहकारिणः ~~नित्यस्वभाव~~ 3214

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वात्मनः स्वस्व विषयप्रकाशकाः । विषय-
सन्निधाने ऽप्यात्मनः सर्वेष्येकदा विषय- 3215
ग्रहणो न सिद्धः । तत्र नित्य स्वभावस्यात्मनः-
कत्या विषयग्रहणा समर्थत्वं भवद्भिरपि 3216
35) पूर्वानुभूत पदार्थभूतौ प्रदिष्टेऽपि विषय-
नाशेऽपि तत्समानविषयं दृष्ट्वा तस्मिन्न-
न्त्रानुभूत शब्दोऽयमिति विषयग्रहणे 3217
पूर्वानुभूत विषयबुद्ध्यतियानाभ्युपगंमंगीक- 3218
र्तव्यं । अन्यथा बुद्ध्यैकत्वे यत्किंचित् विषय-
ग्रहणं विना नान्यत् गृह्णाति तस्मात् पूर्वपूर्व- 3219
ज्ञानं विनाशेऽप्युत्तरोत्तर संभवज्ञाने पूर्व-
ज्ञानकृत यमाद्यतिशया न सिद्ध्यत्येव- 3220
तस्मादात्मनस्वभाव हाने क्षणिकत्वमेव-
सिद्धम् । एतन्मतं मतंग सिद्धांती दूषयति- 3221
चक्षुरादीन्द्रियपञ्चकानि स्वतः सिद्धानि
भवंति । भोक्तृभोगसाधनत्वात् तत्तत- 3222
भोक्तृ पुरुषप्रयत्न जन्यानेकविधं पुण्य-
पुण्यादेव संभवंति । भोक्तृणां सर्वेऽपि भोगात- 3223
तत्साधन तत्करणादि भेदात् भोक्तृ-
प्रयत्नजन्यमेव चक्षुषा रूपं गृह्यते । श्रोत्रेण ।। 3224
शब्दो गृह्यते । त्वचा स्पर्शो रसनया रसो
गृह्यते । घ्राणेन गंधो गृह्यते । वैपरीत्येन वैप- 3225
रीत्यं गृह्यते । तस्मादिमानीन्द्रियाणि तस्यचित-
कारणानि, स्वतः सिद्धानि चेत् कश्चिद्बधिर- 3226
इति कश्चिदंध इति कश्चित्पण्ड इति व्यवहार-
कर्त्तं स्यात् , तत्करण भोक्ता कार्यबलादेव - 3227
p. 2.(90) सिद्ध्यति स एवात्मास्तु इति भवद्भ्योऽभ्युपग-
न्तव्यः । अन्यथा क्षणिकत्वे देशांतर कालांतर- 3228
भो

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भोगनिमित्त इदानीं विनश्यदात्मा कथं
कर्म करोति। यदि वा कालांतरभावि भोग- 3229
निमित्त इदानीं नरचैतन्यस्यात्माश्रिदेवं-
विधिकर्मन्वियं तत्कालमेतस्मिन् देशे 3230
कर्तव्यमिति विचार्य कर्तुं कालो वा कथं भवि-
ष्यति, यतः क्षणिकत्वात्। येदि वा अन्यकृतः- 3231
पुण्यादिकं अन्येन भोक्तुं शक्यते। दानं वर्तमान-
पुत्राद्यनुभवसुखं विहाय निराहारादि साध्यं- 3232
तपः कथं कुर्वन्ति। तपो हीनानामपि कर्म-
वा सद्भोग भोक्तृत्वं न सिद्ध्येत् सर्ववस्तुनि 3233
त्रैकाल्योद्भवानुष्येकरूपेणानुभविता ज्ञाना-
करणको नित्यसिद्धः। समस्तादुपादान- 3234
ज्ञानाज्ञान कर्त्रनपेक्षत्वेन जगदुजनानां-
संभवात्। जगत् कर्ता नित्योऽभ्युपगंतव्यः- 3235
तस्मान्नित्यंव्याप्या सर्वगतं प्रोक्तं साहचर्य
नियमो व्याप्ति तत्सर्वगतत्वं, यत्र कार्यत्वं तत्र- 3236
तत्र पूर्वकत्वं सिद्धं, यथा घटपटादि। जगज्जनन-
भोगजननमरणादिकं कार्य- अभूत्वा। भावित्वा, 3237

अ,भूत्वा पादा) तदुपादान ज्ञान कर्त्रन पेक्षत्वेन सिद्ध्यति।
(तदुपादानज्ञानकर्त्रनपेक्षत्वेन)
तस्माद्दृढ परिपूर्ण एव जगत्कर्ता सिद्ध्यति॥ 3238
सर्वदा सर्वत्र तत्कार्य सृष्ट्यादि दर्शनात्।
क्षपणकानामिव शरीरपात्रपरिमितो न- 3239
भवति। जीवाजीव सृपसंवर निर्झर बंध-
मुक्ता इति त्वास्तिकाया न्युगताश्चानैकांतिक- 3240
दि) मश्च जीवास्तिकायोऽपि त्रिविधः। अनादि-
सिद्ध बंधमुक्त भेदेन अ, जीवपदार्थोऽपि-पुद्ग- 3241
ला काशधर्माधर्म भेदेन चतुर्विधः। आकाशश्च-
अस्तिकायाश्च लोकालोक भेदश्च द्विविधः। 3242
पुद्गलास्तिकयोऽपि क्ष्मांबुवह्नि वायुभेदेन
चतुर्विधः। धर्मास्तिकायो सुखदयहेतुः अधर्मा- 3243

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

p.2·191) स्तिकयोः तद्विपर्यय हेतुः चक्षुरादिन्द्रियाणां-
स्वस्वविषयनिवृत्तिरास्रवः। तेषामिन्द्रियाणां- 3244
स्वस्वविषयनिवृत्तिभिः यस्य स संवरः, केश-
लुंचन तप्तात्मशायनादिभिः निर्जीर्णा वीर्यं- 3245
कर्म येन क्रियते, स निर्जरः। नानास्तिकाय-
भुवक्रमोऽत्माहाराष्ट गुणोऽपि स्वातंत्र्यात्हेतु- 3246
त्वात् जीवस्य सन्धो भवति। लोहपञ्जरमध्यस्थं-
अलेक्षिप्तमलाबुकं। यथा यो याति तथा जीवस्य- 3247
बंधनं लोहपंचन विच्छेदादथालाबुकं प्लवते-
तथा जीवो मोहादीक्षया दुरोहति मोक्षं तद्देह- 3248
ग्रहणत्वात् अत्र जीवोऽस्ति नवेति योनियुक्ते-
तं प्रति अनेनोक्तांतवादस्तैरुच्यते, स्यादस्ति- 3249
स्यात् अस्ति न चास्ति तस्यादवक्तव्यं, स्यादस्ति-
चावक्तव्यं स्यान्नास्ति च वक्तव्यं स्यादस्ति न- 3250
चास्ति नचास्ति च वक्तव्यं चेति तत्र यत्पर्यनुयोज्यं-
समस्तया तत्समाप्येयं, तत्र वाच्यया विरोध- 3251
हानिस्तु घटनीया सप्तभंग्यमोहप्रहास्त्रवता-
हकं) अजेसपिकं भवेत्। तन्मतं तं दूषयति अनेकान्त- 3252
.. वादी वा त्वया सत्यं सदसत्तया समाप्येया-अने-
कांतवादियेम वात्मकमिति उक्ते प्रश्नाभंगी- 3253
भवति- अनेकांतवाद इति एकान्तवादग्रह-
णात्, तदेवास्यानेकान्तः स्यात्-एकांतश्चे- 3254
त्यादिना वक्तव्यमित्युक्तेऽपि जीवोस्य वेद देही
न भवति इति वाच्यम्। तन्निष्टु- अनासिद्ध- 3255
श्रेष्ठो वैत्युक्ते चैत्या श्रेष्ठो वै श्रवणाश्रोषु इति-
इति वक्तव्यं तदानीं मानादिसिद्धस्याप्रक्षता- 3256
सिध्यति। इदानीमत्र सर्वोऽस्ति व नवेति-
कथिते अस्मित्युक्तेति सर्वदेशोऽपि भवेत्- 3257
स्यात्पूर्वं समन्धकार प्रदेशोऽपि प्रकारएव-
स्यात्-पूर्वमत्र सर्पयोगोऽत्रास्तीत्युक्ते तत्- 3258

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कालापेक्षमेव भवति, पाताळामरलोकोऽत्रा-
p.2.192) स्ति नवेति शंकायामत्रास्तीति कथं वक्तुं युज्यते। 3259
तस्मात्स्वव्याघातमेव लक्षणं त्वया साध्यते,
इतरकर्मासिंगभयादात्मनां व्यापित्वं त्वया- 3260
साधितं। भोगावस्थायामव्यापिनश्चेत् मुक्तौ-
कथं व्यापिनो भवति। यैस्त्र संकोचविकच- 3261
धर्मिणः तेषामनित्यत्वादनेकदोषस्संभवति-
आत्मनां सर्वकर्मक्षय तत् ज्ञानावरणीय - 3262
दर्शनावरणीय वेदनीय मोहनीयायुष्या-
णामगोत्रांतरायाख्याष्टगुण परित्यागाद- 3263
वाप्तानंतज्ञान दर्शनाचियानंद सुखचिरा-
युष्य तिन्नाम निरन्वय निरंतरायाख्याष्ट- 3264
ष्टगुणप्रवेशात् मुक्तिरिति भवद्भिरुक्तः॥
न्य) आत्मनः कर्मजडत्वात् स्वयं न... ते। जीवो- 3265
ऽप्यनादि देशान्तरादिषु कर्मफलानि न जानाति।
अज्ञेन मुक्त्युपायं निःशेषतः कर्मभोजनोऽपि- 3266
न सिद्ध्यति। मुक्तिसुखाज्ञेन मुक्तं प्रति प्रवृत्ति-
रपि न स्यात्। मोक्षवचनोऽपि न जायते। तस्मा- 3267
दन शास्त्रप्रणीतारमंतरेण कर्मानुष्ठानादिकं-
न संभवति। अनादिसिद्धिस्तु रागाद्यभा- 3268
वतो कमपि नावैति। तस्मादादिसिद्धशास्त्र-
कर्त्रैत्यभ्युपगन्तव्यम्। सोऽपि कथं मुक्ते- 3269
इत्याद्यनवस्था प्रसज्यते। मुक्तिस्तु स्थान-
प्रवेशानंतरं शास्त्रं न क्रियते। बद्धावस्थायां - 3270
कर्तुं न संभवति। (समर्थो) कृतमपि न प्रमाणिकमेव-
भवति। तस्मात्प्रपंचोऽपि भवताद्यकर्तृपूर्व- 3271
को भवताभ्युपगतः। प्रपञ्चस्य भूत्वाभावि-
त्वमेव कार्यताप्रयोजनं यत्कार्यं तत् कर्तृपूर्वकं- 3272

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यथा घटादिभिः सर्वदेशो विलयेऽप्येक-
देशस्थितिर्भवताऽङ्गीकृता, यस्य धर्मिणो- 3273
लोकेण धर्म एकदेशे तद्दृष्टांत तद्धर्म सर्वत्र-
p. 2-193) न भवतीति नियामकं वक्तव्यं, तस्मात् सर्व- 3274
कर्तृकं प्रपञ्च विभवता राज्ञा ज्ञायते। अतः
संमत प्रणीतृ सर्वदर्शित्वात्त दुष्क्रमोक्षोपा- 3275
यानिराकरण व, तस्मात् व्यापक एव कर्ता भवति।
ज्या) .. हया सर्वगतं प्रोक्तमिति सिद्धमेव। अक्षीण - 3276
द्व्ययं भवेत्। क्षीणत्वं नाम पूर्वपूर्वानुभवे-
वैभव हान्या निकृष्टावस्था प्राप्तित्वं, तदनु- 3277
सारिणोऽपि यत् स्थानं मुक्तिरिदमेवेति गता।
महाप्रलये एतत् स्थानोपादानं रूप बिन्दु- 3278
माया कार्यपि संहार तत्स्थान नाशात् स्थानि-
नोऽपि न संभवति। तदेव क्षीणत्वं तदुक्तं। 3279
श्रीमन्मृगेन्द्रो यत्कैवल्यं बृन्द प्रकृत्यो हि
वेगाद्यो यस्सर्वं ब्रह्मतत्वाविरामः। याःका- 3280
श्च मुक्तयः तास्ताः सर्वमायान्ति सृष्टौ इति॥
सिद्धांतसारावल्यामपि, संहारे भुवनेश्वरा- 3281
हरिहराञ्च ब्रह्मा च तत्प्रापिणी विज्ञानकलतां-
प्रयाति। शंकराचार्योऽपि विरिंचः पञ्चत्वं- 3282
व्रजति हरिरिति एति, तस्मात् अनादिकृता-
सर्वकाले ह्येक रूपेण सर्वज्ञतादिगुणविष्ट- 3283
एव स्थितः इत्यक्षीणः। तमस्मादव्ययमि-
त्यर्थः। अमलोऽनिन्दितं ज्ञेयं, मलो नाम- 3284
तण्डुलताम्रयोस्तु कालिकावदनादि सर्वा-
त्म दृक्- क्रियाधारकादेक शक्तिकैरेव सर्वे- 3285
षामात्मनां तत्सहजमेव। यथा स्फटिकमै-
मलिनेन) नैर्मल्येन निर्मितं कल्प्यते। तत्स्वभावतो - 3286
ह्येत नास्ति इत्यमल सर्वकर्तृकत्वादेवास्य
परमेश्वरस्य सर्वज्ञत्वं सिद्धं। ईश्वरस्य- 3287

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ईश्वरस्य कर्तृत्वे कारण(ण)मेवं प्रपञ्चमेव
प्रमाणं। सर्वकारमंतरेण सर्वकार्यानुदयात् - 3288
सर्वकर्तृत्वमेवास्य सर्वज्ञत्वे प्रमाणं लोकेऽपि-
घटपटादि चिकीर्षोऽस्ति (द) वायुवेगकदेशा- 3289
p. 2.194) परिज्ञानेऽपि सकलावयवं · · करोत्यतः।
सकलावयवं कार्यं दृष्ट्वा कर्तुरपि सर्वज्ञता- 3290
प्रतिपाद्यते। तस्माद्भूधरादिगतं महत्कार्यं
दृष्ट्वा शिवोऽपि सर्वज्ञोऽनुमीयते। तत्सर्वज्ञत्वं 3291
न मलिनां संभवति। ये मलिनाः तेषां स्वपदा-
र्थदर्शपरिज्ञानाभावः। तदुपादानात् हि तत्व- 3292
मेव भवति। तस्माद्यमलत्वात् शिवो नित्य-
इत्यर्थः। असादृश्याननोपमं। सादृश्यत्वं - 3293
नाम समानवस्तुत्वं, लोके गोज्ञानेच्छुना-
नागरिकेन कीदृशो गवय इत्यारण्यके पृष्टे-3294
सति गोसदृश एव गवय इत्युक्ते तदन्वेषिणा-
तत्साम्यत्वं गवये प्रतिपाद्य गवयशब्द- 3295
वाच्योऽयं पिण्ड इति ज्ञायते। तत्सादृश्यम्।
तद्वच्छिवप्रत्यक्षाभिलाषिणा पुरुषेण पृष्टेन- 3296
तादृशाश्शिव इति दृष्टांतकर्मापि नास्ति। अत-
एवासादृश्यः। असादृश्यादेवासावनुपमः। 3297
इत्यर्थः। श्रुतिरेवाप्याह - एक एव रुद्रो न-
द्वितीयः यतः इति। एको शिवस्सर्वभूतान्तरात्मा- 3298
इति दृक्क्रियात्मकत्वे, आत्मसदृश इत्युक्ते तेषा-
मनादि व्यक्त दृक्क्रियाव शिव समानता नास्ती- 3299
त्यर्थः। प्रमाण व्यतिरिक्तत्वात् अप्रमेयं। प्रमाणं
नाम प्रमाकरणं, प्रमानां संशयविपर्ययाा- 3300
दि निर्मुक्तं ज्ञानं तद् ज्ञानस्य यत्साध्यकं
तदेव प्रमाणं तदानींद्रियस्येवेति नैयायि- 3301
कानां दुरभिगमनता, इन्द्रियषट्कै यत् ज्ञायते-
तत्सकलं न विद्यमेव। तस्मादिन्द्रियप्रमाण- 3302

वाकरम्। सकारं शक्तिबीजं स्यात् शिवमंत्रो-
द्धार क्रमे प्रथम इति तस्य नामध्येयस्सं भवति- 3786
षड्क्ष धातुकमिति पर्याययुक्तो भवति। षका-
राख्यं स्थितिमार्गेण शिवमंत्रोद्धारसमये- 3787
द्वितीयमिति संज्ञां ~~मिति~~ लभते। स एव षकारो-
भानुमार्जा, दिवाकरादि भेदस्साख्य पर्याय- 3788
नामानि लभते। मज्जाशब्देन सप्तधातु-
पठित मज्ज स्मर्यते। शकारं श्रीरमा लक्ष्मी- 3789
अस्ति च त्रितयं विदुः। वारुणं वकारं ह्यापः
चतुर्भेद संस्थिति। शकारस्य रमा लक्ष्मीः+ 3790
··दि भेदेन पर्याय नामानि श्रियः पर्याय नामानि-
अस्तीत्यु ~~क्त~~ धातुरिति अभिहिते स्थितिमार्गेण- 3791
तृतीय वर्ण इति ज्ञेयः। वकारस्य वारुण इति-
च जलमिति पर्याय नाम कथ्यते। जलस्य यानि - 3792
p. 2.224) नामानि सहितानि ~~सर्वा~~ णि वकारस्यापि
सर्वाणि) नामानि चतुर्थं स्थिति क्रमेण तुरीयं बीजो- 3793
च्यते। मेदसि वर्तमानत्वात् मेदो भवेल्लकारं-
पञ्चमं चैन्द्रं मांसं च धरणं महि। रकारं चावकं- 3794

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

रक्तं षष्टकोयश्च पावकम्। लकारश्च्वितिं-
मार्गे पञ्चमाक्षरो भवति। इन्द्रबीजमित्युच्यते॥ 3795-
मांसं धातुरात्मानां धरणी महती पृथ्वी-
पर्याय नामान्यपि लकारस्यापि रकाराख्य- 3796
वर्णः रक्तधातुरित्युच्यते। षष्ठं क्षितिमार्गेण
षड्बीजमुच्यते। क्रोध इति नामधेयोऽपि- 3797
भवति। अनलाग्नि प्रमुखाग्नि नामधेयानि
यानि तानि रकारस्यापि यकारं चानिलं - 3798
स्नायुं सप्तमं मरुतं तथा। मकारं कालमृत्युश्च-
अष्टमं मृत्युकारकम्। अकारो वर्णः। अनल- 3799
बीजं स्नाय्विति धातुः सप्तमं क्षितिमार्गेण-
उदधिबीजं मारुतं मारुतस्य पर्याय नामान्य- 3800
स्यापि मकारो वर्णः कालमृत्युच्यते।
अष्टमं क्षितिक्रमेण। अक्षरं भवतिमृत्यु- 3801
कारकमित्यभिधीयते। एवमन्ये प्रथम-
वर्गस्य त्वेवं नाम प्रकीर्तितम्। एवं नाम- 3802
क्रमेणैव प्रथम वर्गस्य क्षिति मार्ग त्रिवर्गेषु
प्रथमवर्ग इत्युक्त प्रथमावरणस्याष्टाक्षराणां 3803
पर्यायनामानि कथितानि। द्वितीयं तु कलाज्ञेयं
तत्कलाद्यक्षरं श्रुणु। द्वितीयं तु द्वितीयवर्ग- 3804
मित्युक्त षोडश कला युक्त मध्यावरणमिति-
ज्ञेयम्। तत्तस्मिन् षोडश कलावरणस्थितानां 3805
वर्णानामाद्याक्षरं श्रुणु। आदिबीजं च वर्णादि-
वर्गादिव कलादि च। स्वरादिश्चैव मात्रादि- 3806
रादि प्रकृतिरेव च। अकारस्य बीजानां प्रथ-
मत्वादि बीजमिति। पञ्चाशद्वर्णानां प्रथम- 3807
p.2.225) त्वाद्वर्णादि वर्गस्यादित्वात् वर्गादिरिति।
कलाक्षरभूत षोडशानामाद्यत्वात् कला- 3808
दिरिति। स्वरादिरिति। मात्रादिरिति-आप्र-
कृतिरिति पर्याय नामानि विद्यन्ते। जीवादिश्च- 3809

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कला मात्रा आदिश्चैव स्वरस्तथा।
एते पर्यायनामानि ज्ञात्वा मंत्रान् समुद्धरेत्। 3810
जीवादि कालादि मंत्रादिषूक्ते तदकार-
पर्याय नामानि च ग्रन्थविस्तारभयात् त्यक्ता- ॥ 3811
न्यबीजानां बहिरावरणस्थितानां समस्त-
मंत्रशास्त्र स्थितानां पर्यायनामानि च ज्ञात्वा- ॥ 3812
मन्त्रान् समुद्धरेत्। मंत्रोद्धारणप्रवीणः
शिवमंत्रादि मंत्रान् समुद्धरेत्। वर्गभेद- ॥ 3813
मिदं प्रोक्तं मन्त्रभेदमतः शृणु। यो मंत्रोत्तर-
दिव्य योग निरतैर्भव्य स्थलां हृत्स्थले ॥ 3814
ताराग्रे शिव लिंग मूर्ध्नि विलसत्वक्रांत-
राले स्थिता। सर्वैरात्मभिरानने षु सततं - 3815
जप्यास्वशक्त्या युक्तो विपरीतं जप्यमनसं-
मंत्रं महासिद्धिदम्। परमेश्वर शिवमंत्रादि- 3816
मंत्रोद्धारस्य वर्गभेदज्ञानं विना ज्ञातुमशक्य-
त्वात् त्रिवर्गभेदमुक्त्वा तदनंतरं शिवमंत्रादि 3817
ज्ञातुमशक्यत्वात् त्रिवर्गभेदमुक्त्वा तदनं-
तरं शिवमंत्रादि मंत्रोद्धारं प्रकारं च मंत्राणां - 3818
फल भेद प्रकारं च वक्ष्यति।

इति वर्गभेदपटलः चतुर्थः।

अतात्र संप्रवक्ष्यामि मंत्र भेद विधिं परं ॥ 3819
भुक्तिदं मुक्तिदं चैव सर्वकामार्थसिद्धिदम्।
अत्र अनंतरं वर्गभेदानंतरं परमुत्कृष्टमंत्र- 3820
भेदविधिं मन्त्राणां भेदविधानं संप्रव-
क्ष्यामि सम्यगुच्यते। स मंत्रो द्विरूपः भुक्ति- 3821
मुक्तिभेदेन मुक्तिद महाभुक्तिदः। मंत्रजपिनां-
मुक्तिप्रदो भवति। अत्र च मुक्तिप्रदश्च भवति- 3822
सर्वकामार्थ सिद्धिदम् उक्तविधानेन साध्य-
कानां समस्ताभिवांछित फलसिद्धिश्च मंत्रस्तु- 3823

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवतारूप मंत्ररूपं इदं जगत् परार्द्ध-
कोटि मंत्राश्च शिवमंत्राक्षिनिर्गताः। मंत्र- 3824
देवतारूपं च जगद्रूपं च भवति। तद्देव-
जगद्रूपा मंत्राः। संख्यया परार्ध्यकोटयः- 3825
संति ते परार्ध्य कोटित्रय मंत्राश्च नाद-
ब्रह्मरूपिण शिव . वक्त्राक्षिनिर्गताः। कर्ष- 3826
णादि क्रिया ~~सर्व~~ कर्षणाद्याः आदिशब्देन-
प्रतिष्ठाचनो नित्य नैमित्तिक काम्य प्राय- 3827
श्चित्तादयस्सर्वा इत्यर्थः। ताः सर्वा मंत्रेणैव-
मनुना एव साधितुमिष्टाः। तस्मान्मंत्रस्य -3828
व्यतिरेक क्रिया नास्ति। मंत्रेण देवतास्थाप्य-
मंत्रेण यजनादयः। स्नानं मंत्रेण कर्तव्यं- 3829
मंत्रेण हुततर्पणम्। मंत्रेणैव मनुना एव
देवतास्थापन पूजन स्नापन होमतर्पणादि- 3830
तर्पणादि कर्तुमिष्टानि प्रायश्चित्तं तु मंत्रेण
दीक्षा मंत्रेणैव हि। अणिमादीनि मंत्रेण- 3831
सालोक्यादि पदे तथा। मंत्रेण मनुना नित्य-
नैमित्तिक काम्य प्रायश्चित्ते च चतुर्व्यादि- 3832
भेद दीक्षा च अणिमा प्रमुखाष्ट सिद्धिश्च-
सालोक्य सामीप्य सायुज्यानि च मंत्रेण- 3833
पातकानि मुच्यंते सर्वजन्मनाम्। सर्व मंत्र-
णास) क्रियाश्चैव मंत्रं शृणु षडानन। मंत्रेण सर्व- 3834
जन्तूनां समस्त जनानां पातादीनि मनोवा-
काय कृत पातकादीनि आदिशब्देन महापात- 3835
कोपपातकानुपपातकादीनि मुच्यंते। तस्मात्
हे षडानन नाममंत्रश्च सर्वमंत्रक्रियाश्च- 3836
समस्तैः मंत्रैः स्थानस्य मानं क्रियाश्च शृणु।
मन्त्रशब्दाभिर्वर्तिति, मननं सर्वपक्षेषु त्राणं- 3837
संसार सागरात् मनन त्राण धर्मत्वात् मंत्रमि-
त्यभिधीयते। सर्वपक्षेषु मानं अवबोधं- 3838

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवज्ञान प्रमित्यर्थः। संसारसागरात् संसार-
एव समुद्रस्तस्मात्त्राणं रक्षणं मननत्राण- 3839
धर्मत्वात् मंत्रमित्यभिधीयते। मंत्रमिति निर्व-
p.2.227) क्तुं शक्यते। यथा स्वनाम्नानुजनस्संनिहितो- 3840
भवेत्। तथा मंत्रप्रयोगेण तत्र सन्निहितः शिवः
यथा। लोके जनं देही स्वाचार: स्वाभिधानेना- 3841
दूरस्सन् अभिलाषवान् सन्निहितो भवेत्।
आह्वयी भवेत्। आह्वयं तद्रक्ष्यति। तद्वश्य- 3842
वोऽपि स्वाभिधानप्रयोगेण तत्र शिवमंत्र-
प्रयोक्तरि सन्निहितः सान्निध्यो भवेत्। तस्मात् -3843
मंत्रं महासेन रहस्यं न प्रकाशयत, तस्माद्र-
हस्यं यस्य कस्यापि वक्तुं योग्यं मंत्रं शिवभक्ति- 3844
पराङ्मुखेषु न प्रकाशय न प्रकटीकुरु। पूर्वोक्त-
यी) देशे तु कृत्वा लक्षणान्वितं। गोमयेनोपलिप्याथ -3845
मण्डपं भूषयेत्ततः। पूर्वोक्तदेशे च क्रीडारणपट-
लोक्त शुद्धप्रदेशलक्षणान्वितं। शास्त्रोक्तविधा- 3846
नेन मण्डपं कृत्वा गोमयेन लेपनं कृत्वा ततः
तस्योपरि वितानादिभिर्मण्टपं भूषयेत्। अलं- 3847
कारयुक्तं कुर्यात्। तन्मण्टपमस्त्रमंत्रेण
संप्रोक्ष्या तन्मध्ये चक्रमालिखेत्। कर्णिका- 3847
केसराश्चैव दलाश्चोपदलास्तथा। क्रमेणैव- 3848
तु संप्रोक्ष्या लेख्य धारादीन् प्रपूजयेत्।
कर्णिकां गणिका दलांश्च केसरान् दलक-
र्णिकयोः अंतरस्थो शुक्लाग्र स्वर्णाकृतियाश्च- 3849
दलाश्च आवरणस्तदुल्वाश्च तदन्तरगत-
सूक्ष्म दलाश्च क्रमेणैव संलेख्या धारशक्ति- 3850
प्रपूजयेत्। तन्मध्ये शिवपूजादिकमपि कुर्यात्।
पूर्वन क्रमात् तन्मध्ये चक्रस्य मध्ये पूर्वादि- 3851

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आधारशक्ति पूजावत् शिवदेवोदित पूजां च -
क्रमात्कुर्यात्। तच्चक्रे स्थिति मार्गेण प्रसादं तु · ॥ 3852
समुद्धरेत्। तच्चक्रे तस्मिन् चक्रे स्थितिमा-
र्गेण। मानाक्षरैः प्रसादमुद्धरेत्। पञ्चप्रा- ॥ 3853
साद मंत्रोद्धारणं कार्यम्। प्रसादशब्दं -
p. 2. 228) स्याच्छिवं ज्ञेयं सा शब्दं शक्तिरुच्यते। तत्स्व- ॥ 3854
रूपं तु इदं शब्दं त्रिवर्णमभिधीयते। प्रा इति-
शब्दं शिव इति ज्ञायते। सो इति शब्दं शक्ति -॥ 3855
रितिज्ञायते। दं शब्दस्तु तत्प्रसादेत्यभि-
हित शिवशक्तिस्वरूपमिति ज्ञातुं शक्यते॥ 3856
तेन कारणेन दानादिदमिति यातुधानार्थे-
तस्मात्प्रासादमुच्यते येन कारणेन मुक्तिदं- ॥ 3857
ददातीत्युच्यते। प्रासादमंत्रमित्यभिधीयते।
अज्ञान ज्ञान विज्ञेयं त्रिविधं विन्दते क्रमात् ॥ 3858
अंधकारवदज्ञानं ज्ञानं दीपवदुच्यते।
यज्ञानं ज्ञान विज्ञानं भेदेन त्रिविधं त्रिधा- ॥ 3859
भेदक्रमाद्विन्दते। ज्ञायते। अज्ञानमंधकार-
वत् तामिस्रवत् ज्ञायते। ज्ञानाज्ञानाख्यदीप- 3860
वत्। प्रकाशवदित्यभिधीयते। विज्ञातुं योग्यं-
वस्तु भास्करवत्। रविवदुच्यते। एवंप्रकारं -3861
ज्ञानं विशिष्यते। ननु ज्ञानस्य कथं विशिष्य-
त्वमिति। ननु ज्ञानस्य कथं निशिष्यत्वमिति- 3862
चेत् शिवशक्तिस्वरूपभूतं प्रासादं यस्य -
पुरुषस्य हृदि वर्तते। तस्यावरकोऽमलोऽन्य- 3863
कारो नास्ति। तस्मात् पुरुष ज्ञानरूपी निख-
मुक्तो भवति। तत्परशिवः स्वाभिव्यक्ति प्रभा- 3864
वपुंजरंजितो भवति। तं शिवं ज्ञातुं तस्य चित
शक्त्याभावेन न शक्यते। यथा रविः स्वकिर- 3865
णैनैव स्वयं प्रकाशते। तथा शिवोऽपि चिच्छक्त्या- 3866
ज्ञेयो भवति। तस्माच्छिक्त्याभिधान ज्ञानमेव-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवज्ञानात्परं ज्ञानं नहि लोकेषु विद्यते।
शिवज्ञानात्प्रासादमंत्रज्ञानात्परं अधिकं-॥ 3867
ज्ञानं लोकेषु मंत्रज्ञानं न विद्यते। नास्त्ये-
वेत्यर्थः।
p.2-229) प्रासादं पञ्चधा प्रोक्तं तद्भेदं वक्ष्यतेऽधुना॥ 3868
शुद्धोऽमलस्त्वमा तत्त्वमादिशत्मेति पञ्चधा॥
शिवज्ञानस्वरूपभूत प्रासादमंत्रं पञ्चधा- 3869
प्रोक्तं पञ्चविधभेदेन कथ्यते। तत्पञ्चप्रा-
सादमिति तत्त्वं तत्त्वप्रासादमित्यादिः;आदि- 3870
प्रासादमित्यात्मा प्रासादमिति पञ्चधा
पञ्चप्रकारेण वर्तते। पञ्चप्रासादमित्युक्तं- 3871
शुद्धं प्रासादमुच्यते। इत्येवं प्रकारेण पञ्च-
प्रासादमुक्तं शुद्धप्रासादानां प्रथमस्य - 3872
लक्षणमुच्यते। शुद्धं शिव इति ज्ञेयः तस्मात
शुद्धं प्रकीर्तितम्। शुद्धं नाम समस्तदोष- 3873
रहितत्वं शिव इति प्रोक्तं शिवतत्त्वमित्यु-
च्यते। तस्मात्तेन शिवस्य शुद्धत्वात् तद्बीजं- 3874
शुद्धप्रासादमिति कथ्यते।
नादाख्ये यत्परं बीजं सर्वभूते व्यवस्थितं॥ 3875
तच्छुद्धमिति विज्ञेयं सर्वकारणकारणम्।
नादाख्यं नादाभिधानं हकारमेव तदुक्तैव- 3876
नादं गुह्यं परजीवं देही भूतं च पञ्चमं।
शान्तभूतांततत्त्वांतं शिवार्णं शून्यमव्ययम् ॥3877
एवं पर्यायनामयुक्तं सर्वभूते व्यवस्थितम्।
यत्परं बीजं शुद्धप्रासादमिति ज्ञायते ॥3878
मुक्तिदं परमं दिव्यं सर्वसिद्धिप्रदायकम्।
तद्धि दत्वा महासेन देशिकः पाशहा भवेत् ॥ 3879
मुक्तिदं कैवल्यदायकं परमुत्कर्षं दिव्यं
स्वस्वाच्छक्ति दीप्तिमत् सर्वसिद्धिप्रदायकं- 3880

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अणिमाद्यष्टमष्टमहदैश्वर्यप्रमुख समस्त-
सिद्धिप्रदं तच्छुद्धप्रासादमुच्यते। हे महा- 3881
सेन, देशिकः आचार्यः विदित्वा, ज्ञात्वा पाशहा-
भवेत्। शिष्याणां सर्वपाशमोचनकरो भवति- 3882
शुद्धप्रासादमेवोक्तं मूलप्रासादमुच्यते।
p.2.230) शुद्धप्रासादमिदानीं कथितमेव। मूलप्रसाद- 3883
मुच्यते। वक्ष्यते। एतेषां मूलतत्वानां मूल-
शिव इति स्मृतः। तस्मान्मूलमिति प्रोक्तं- 3884
तच्छिवबीजं मूलप्रासादाभिधानो युक्तो-
भवति। तन्मूलमंत्रमुच्यते। तस्य मूलमं- 3885
स्यो) त्रसोद्धारः कथ्यते। षष्ठः त्रयोदशांतं च-
पञ्चमे विनियोजयेत्। शिवशक्तिसमायुक्तं- 3886
शिवमंत्रमिहोच्यते। षष्ठं स्थितिमार्गस्य
र्णं) प्रथमवर्गोक्तत सात्विकाभिधान प्रथमा- 3887
वरणस्य पूर्वदळलिखित सकार पूर्वगण-
नया प्रदक्षिणेन रकारः षष्ठो भवेत्। तस्माद्र- 3888
कारस्य षष्ठाभिधानो ~~भवति~~ वर्तते। षष्ठाभिधान-
कारस्त्रयोदशांतं स्थितिमार्गस्थद्वितीयं- 3889
वर्गमित्युक्तरात् सनामधेयद्वितीयावरण-
स्य पूर्वदळलिखिताक्षरादितः प्रदक्षिण- 3900
क्रमेण परिगणितं चेत् औकारस्त्रयोदशांतो
भवति। तस्मादौकारस्य त्रयोदशांतत्वमेव- 3901
तत्त्रयोदशांत संज्ञायुक्तौकारं च पञ्चमे-
पञ्चमाभिधान हकारो मंत्रोद्धारसमये - 3902
शून्यं भवति। शून्यवाचकं खशब्दे सति-
वृत्ताकार बिन्दुर्भवति। यत्र मंत्रोद्धारसमये- 3903
बिन्दुवृत्तो व्यगम्यते। तत्र सकारपर्याय-
नामानि पठितानि भवन्ति। तद्विनाप्याधारा- 3904
धेय शिवशक्ति कार्यकारण परापर बिन्दु -
नादेति क्रमवाच्येऽपि, इत्यभिहितो भवेत्॥ 3905

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतद्ध्रौमिति कलितमूलप्रासादमंत्रोऽस्मिन्
तंत्रे शिवमंत्र उच्यते। तच्छिवमंत्रं च क्ष्वा- 3906
चोच्यते। क्रियासारे, अथर्ववेदे यत्प्रोक्तो
मंत्र प्रासादसंज्ञकः। समस्ताभीष्टफलसाया- 3907
P. L. 231) स्वाश्रितानामरतं ब्रह्मीगैर्द्विधा प्रोक्तो-
मंत्र प्रासादसंज्ञकः। वैदिकस्तांत्रिक इति- 3908
वह्नियोगविशेषतः। अथर्ववेदे यत्प्रासाद-
मन्त्रमुच्यते, तत्प्रासादमंत्रमुच्यते। तत्- 3909
प्रासादमंत्रं स्वाश्रयाणां जनानामखिला-
भीष्टसिद्धिप्रदो भवति। तन्मन्त्रं ब्रह्मांगैः -3910
गाथो) सहितं चाकारयोगो योगाभ्यां वैदिकं च
तांत्रिकं च द्विधा भवति। तत्र षष्टत्रयोदशांतौ- 3911
ह्रौ बीजे त्रिदशवर्णानिं बिन्दुनादौ अनुस्वारं
च प्रयुंजीत सर्वप्रयत्नतः प्रासादमीरितम्॥ 3912
षष्टत्रयोदशांतौ ह्रौ बीज रकार औकारौ
इत्युभयं बिन्दुनादौ अनुस्वारं च त्रिदश- 3913
वर्णानिः। त्रयोदशानामयुक्त औकारेण युक्तं-
चेद्ध्रौ भवति। रकारोनुस्वार हकार संयोगे- 3914
प्रासादं भवति। इति वह्नियोगः। एवं प्रकारेण-
रेफयुक्तं ह्रौं प्रासादं मंत्रं वैदिकमंत्रमिति- 3915
कल्पितं युच्यते। शारदातिलके। सांतस-
द्यांत संयुक्ते बीजं भूषितमस्तकम्। प्रासादा- 3916
ख्यमनुप्रोक्तं भजतां सर्वसिद्धिदम्। सकार-
स्यांत ~~सकारांत~~ सांत हकार इत्यर्थः। सहकारो- 3917
सद्यांत संयुक्तो सद्योजाताभिधान औकारस्थां-
तेन औकारेण युक्ता बिन्दुभूषितमस्तको- 3918
भवति। एतत्प्रासादं भजतां जपतां समस्त-
सिद्धिप्रदो भवति। इति वह्निवियोगेण औं इत्युक्ते- 3919
भवति। एवं वह्नि बीजं विना कृतो प्रासादमंत्रः।
हौमित्युच्यते। इति तांत्रिकमंत्रं शिवमंत्र - 3920
इत्येत वह्नि योग वियोगतः। वैदिकतांत्रिक-
द्वितयभेदप्यस्मिन् शुद्धाख्य तंत्रे वैदिकप्रा- 3921

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सादं भवति। इति वह्नियोगः। एवं प्रकारेण
रेफयुक्तं ह्रौं प्रासादमंत्रं वैदिकमंत्रमिति- 3922
कल्पितं युज्यते। शारदातिलके। सांतसद्यांत-
संयुक्तो बीजभूषितमस्तकं। प्रासादाख्यमनु- 3923
प्रोक्तो भजतां सर्वसिद्धिदम्। सकारस्यांत
सांत हकार इत्यर्थः। सहकारो सद्यांतसं- 3924
युक्तो सद्योजाताभिधान औकारस्यांतेन-
औकारेण युक्ता बिन्दुभूषितमस्तको भवति। 3925
एतत्प्रासादं भजतां जपतां समस्तसिद्धिप्रदो-
भवति। इति वह्निवियोगेन ओं इत्युक्तं एवं 3926
वह्निबीजं विना हौ प्रासादमंत्रः हौमित्युच्यते।
इति तांत्रिकमंत्रं शिवमंत्र एतद्वह्नियोगवियोगतः। 3927
वैदिकतांत्रिकद्वितयभेदेभ्यस्मिन् शुद्धाख्य-
तंत्रे वैदिकप्रासादमुच्यते। एतत्प्रासादं- 3928
P-2-232) तांत्रिकमेवादि प्रासादमुच्यते। अस्य प्रासा-
दस्य मूर्तिभावमुच्यते। शिवमेव विजानी- 3929
यात् मंत्रमूर्तिं परं शिवम्। नादं किरीटं-
इत्युक्तं बिन्दुवक्त्रमुदाहृतम्। हकारं 3930
देहमित्युक्तं क्षयं श्रृंगौ भुजौ तथा। वह्नि-
पादद्वयं विद्यात् मंत्रमूर्तिरुदाहृतम्। 3931
शिवमेकमिति शिवतत्वमक्षयतत्वमिति-
ज्ञायते। परं शिवं परमिति कल्पित शिव- 3932
तत्वमेव मंत्रमूर्तिः मंत्री भूतः। शिवमंत्रादि-
वर्णोद्धारकृतनागरलिपिभिरुद्धारयितुं 3933
युज्यते। व्यतिरिक्तैर्लिपिभिर्मोद्धारं युज्यते।
(भिन्नोद्धारं) एतदागमोद्धारः। हकारं देहमित्युक्तं तस्य- 3934
परमेश्वरस्य हकार एव देहरूपमिति
कथ्यते। बिन्दुवक्त्रमुदाहृतं। बिन्दुरूपं परा- 3935
शक्ति तस्य परमेश्वरस्य निष्कला शक्तिरिति-
कल्पित पराशक्तिरेव बीजरूपो भवति। तत्- 3936

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बिन्दुशब्दो शक्तिबीजाभिधान विकलाक्षरेषु
वर्तते। शक्त्यातीत पराशक्तिः निष्कलाभि- 3937
धानरूपायाः पराशक्तेः शांत्यातीताभिधा-
कलाशब्दे) नाकलाशब्दे वर्तते। पौष्करे। लयानिव्यावृत्ति- 3938
यत्र शुद्धोद्भवा वा यतो जनि। सा तु कुंड-
लिनीशक्तिः नित्याभिष्टेव रूपिणी। लया- 3939
दीनि लया भोगाधिकार त्रिरूपाशिवभेद-
शिव सदाशिव महेश्वरस्य तत्वानां प्रवृ- 3940
त्तित्रयतः शुद्धतत्व भुवनानि षड्विधोर्ध्वं
अजनि, जातं, सा शंभोः परमेश्वरस्य नित्या- 3941
भिष्टेय रूपिणी, विद्या विद्येश्वर सदाशि-
वानां तनुकरणकारणे उपादानभूत- 3942
कुण्डलीनां परबिंदु भवति। परमेश्वरस्य-
लीलाव्यापाराणां तत्राभिव्यञ्जकानां 3943
बिंदोरेव नाति क्रमेण शब्दोत्पादनात् बिंदु-
रेव मुखं भवति। नादं किरीटमित्युक्तं भवति। 3944
नादश्चैवादिरुच्यते।
P.2.233) अकारं नादमित्युक्तं उकारं बिन्दुरुच्यते॥ 3945
अकारो नाद उकारो बिंदुः इति कथ्यते।
इ) अकारस्य, इकारो अक्षरसंयोगात् संध्य- 3946
क्षराणां चतुरो भवति। अकारोकारसंयो-
गाच्च विकृत्य क्षारसंयोगाच्चौकारौकारौ- 3947
जन्यते। तस्मात्पूर्वोक्त नादबिंदु अभिधान-
संज्ञे) शक्तिद्वय सुशेषमेवादिरुच्यते। एवं नाम - 3948
इत्युक्ता शक्ति रेखाभूत ज्वालारेखा एव तस्य-
मूर्तिबीजस्य किरीटमित्युच्यते। तथा द्वय - 3949
शृंगौ तच्छांभव रेखेत्युक्त पार्श्व रेखे उभौ
शृंगौ तस्य शिवमूर्ति बीजस्य उभौ बाहौ कथितौ - 3950
वह्नि-पापाद्द्वयं विद्यान वह्निरेखेत्युक्त इका-
रस्य या रेखा एवं शिव मूर्ति बीजस्य पदद्वयं - 3951
ज्ञेयं। मंत्रमूर्ति रुद्राइतम्। एवं प्रकारेण
शिव मंत्र शिव देहाकार उच्यते। एतच्छिव - 3952

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मंत्रमेव त्रिभेदमुच्यते। स्थूलं सूक्ष्मं परमं-
चैव त्रिविधं तु प्रकीर्तितम्। स्थूलं वर्णाकृति- 3953
विद्यात् सूक्ष्मं तच्छब्दमुच्यते। स्थूलमिति,
परमे) स्थूल सूक्ष्म परभेद त्रिविधं भवेत्। अक्षराकारो-3954
स्थूलं न चक्षुरस्य यच्छब्दमयं तदेव सूक्ष्म-
मुच्यते। अकारादि क्ष कारान्त पञ्चभौतिकं- 3955
उच्यते। पञ्च पञ्च प्रयुंजीत पञ्चाशद्वर्णमीरितं।
ह) अकारादिः अकारादिः, क्ष कारांतः पञ्चाशद्व- 3956
र्णोऽपि पञ्चभौतिकं पृथिव्यादि पञ्चमहा-
भूत संबंध इति कथ्यते। पञ्च पञ्च प्रयुंजीत- 3957
तदकारादि वर्णानां पञ्च पञ्च भूतानां पञ्च-
दशाक्षर विभागः कल्पितः॥ 3958
p. 2.234) .. न्तोयत्पञ्चमं बीजं तत्परं परिकीर्तितं।
तञ्चिन्तानाहित शिववर्ण एव परम--कथ्यते।। 3959
पाञ्चभूतिकसंबंध जीवाधारमिति स्मृतम्।
एवं ज्ञात्वानु मंत्रज्ञः सर्वपापैः प्रमुच्यते॥ 3960
पञ्चेति पञ्चभूतिक संबंधतः पञ्चाशद्वर्णो-
ऽपि जीवाधारमिति स्मृतं। जीवाधार एव- 3961
पर्युषकमिति ज्ञायते। मंत्रज्ञः शिवमंत्रवित्
पुरुषः एवं ज्ञात्वा सर्वपापात्प्रमुच्यते। समस्त- 3962
दोषाद्विशिष्टो भवेत्। एवं वै पञ्चभूतित्वं -
जीव प्रासादमुच्यते। ब्रह्मादिस्तंबपर्यन्तं- 3963
जगद्योनिश्चराचरम्। एवमिति एतत्प्रका-
रेण पञ्चभूतित्वं पञ्चविध भूतित्वं जीवप्रा- 3964
सादमुच्यते, जीवप्रासादमिति वक्ष्यते।
ब्रह्मादिस्तंबपर्यन्तं ब्रह्मादिस्थावरांतंच- 3965
राचरं स्थावरजंगमं जगद्योनिः लोको-
त्पत्तिश्च भूतं भव्यं भविष्यत्प्रासादे सर्व- 3966
मुक्तं मूलप्रासादमित्युक्तं तत्वप्रासादमुच्यते-
यद्वस्तु भूतकाले भविष्यत्काले वर्तमानकाले - 3967

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भविष्यत्भाविकाले चास्ति तद्भस्तु सर्व-
प्रासादे उद्धृतं उद्धारं कृतं इति मूलप्रासादं- 3968
निरूपितं। तत्वप्रासादमुच्यते। तत्वप्रासा-
नि) दन्निरूपयिष्यते। तत्वं चैवादिबीजं च विनि- 3969
योजयेत्। तत्वांते विनियोजयेत्। कार्यकार-
णसंयुक्तं सर्वतत्वात्मकं विदुः। तत्वांते- 3970
तत्वाभिधान व्यञ्जकरूपभूत हकारे-
आदिबीजं च विनियोजयेत्। आदिबी- 3971
जमिति प्रशस्तं अकाराख्यं योजयेत्तदानी
p.2.235) प्रातिपदिकव्यञ्जने पू- रूपस्याकारस्य- 3972
प्रयोगात् हकारो भवति। कार्यकारणसंयुक्तं-
हकारो बिन्दुयुक्तं चेत् हमित्युद्धृतं स्यात्- 3973
एतद्धमित्येतर मेतत्प्रासादं भवेत्। सर्व-
तत्वात्मकं विदुः। एतत्तत्वप्रासादं सर्व- 3974
निरूपणं तत्वमयं विजानीयात्। तत्वप्रासाद-
मित्युक्तं आदिप्रासादमुच्यते। एवं प्रकारेण- 3975
तत्वप्रासादस्य निरूपणं कृतं। ततः आदि-
प्रासादमुच्यते। निरूप्यते। प्रथमं चतुर्दशं- 3976
चैव जीवांते विनियोजयेत्। आधाराधेय-
संयुक्तमादिबीजमिहोच्यते। प्रथमामिति- 3977
राजसवर्गमित्युक्त मध्यापरौ पूर्वदिग्द-
ललिखिताकारं चतुर्दशं चैव तस्याकारस्य- 3978
चतुर्दशमौकाराख्यं च जीवांते विनियोजयेत्।
जीवांतं नामयुक्त हकारे संयोजयेत्। अकार- 3979
युक्त हकारेण औकार योजना कृता चेत्-
.. मित्युद्धृतं स्यात्। आधाराधेयसंयुक्तं- 3980
तद्धृतवर्णो बिन्दुनादयुक्तश्चैतद्धौमिति-
स्यात्। इहास्मिन् शुक्लाख्य तंत्रे हौमिति- 3981
तांत्रिक प्रासादादि बीजमुच्यते। आदिप्रा-
साद बीजमित्युच्यते। आदिशक्तिस्वबीजेन- 3982
संयोगादभिधीयते। एतच्छिवमयं बीजं-
सर्वसिद्धिकरं परं। आदिशक्तिस्वबीजेन- 3983

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संयोगान्तेनादि शक्तिबीजेति कलितौकारेण
संयोगादङ्गानभिधीयते। आदिप्रासादमिति- 3984
वक्ष्यते। एतत्तत्त्वं शिवं बीजं, एतच्छिव
स्वरूपभूतादिप्रासादाक्षरं परमर्थिकं सर्व- 3985
सिद्धिकरं आदिप्रासादमित्युक्तं आत्मप्रासाद-
मुच्यते। एवमादिप्रासादोक्त्यनंतरं आत्म- 3986
प्रासादमुच्यते। भूतान्तं तु समुद्धृत्यादिप्रकृ-
p. L. 236) ति . . . तम्। तयोर्मध्ये गतं शक्तिरात्मबीज- 3987
मिति स्मृतं। भूतांतमिति। भूतांताभिधान
प्रातिपदिकरूप हकारेणादिप्रकृतिसंयुक्त- 3988
-- प्रत्यक्षराणां सप्ताक्षराणामादिभूत-
हकाराक्षराभिधान प्रत्यये योजितश्चेत्- 3989
हकारा . . . वति। प्रथमं तु समुद्धृत्या
सात्विकवर्गस्य पूर्वादिदिग्दलगत प्राति- ॥ 3990
पदिकरूप सकारोद्धरणं कृत्वा, आदिप्रकृ-
ति संयुक्तं प्रत्ययरूपसकारेण योजितः- 3991
-- तु विकारो भवति। तयोः मध्यगतंशक्तिः,
तयोरकारसकारयोः मध्ये च स्थितं सर्व- 3992
कारणं आत्म प्रासादमित्युक्तं जीवप्रासाद-
मुच्यते। हृत्सरोरुहेति हृदंबुज मध्ये सर्व- 3993
कारणं अ। समस्तकारणत्वेन हंसमंत्रो वर्तते।
एतमर्थसिद्ध्यो मंत्रः आत्म प्रासादमुच्यते ॥ 3994
एतदेव जीवप्रासादमिति कथ्यते। एतैर्वै।
शिवबीजत्वाच्छिवमंत्रमिति स्मृतं। ह्रस्वा- 3995
दि चात्मपर्यन्ता स्थितिमार्गेण चोद्धृता।
एते पञ्चविध प्रासादं च शिवबीजत्वात्- ॥ 3996
शिवमंत्राः कथ्यन्ते। ह्रस्व प्रासादपूर्वात्म-
प्रासादान्यमंत्राश्च स्थितिमार्गेण चोद्धृताः॥ 3997
शिवमंत्रमिदं प्रोक्तं सदाशिवमतः शृणु।
शिवमंत्रोक्त्यनंतरं सदाशिवमंत्रं शृणु 3998
वक्ष्ये-

116
294

सादाख्यं सौम्यरूपत्वात् सृष्टिमार्गेणचोद्धृतः।
सादाख्येति सादाख्यं सौम्यकारत्वात् नमंत्राः॥ 3999
सृष्टिमार्गेणोद्धृता भवन्ति। मोक्षदं चाभिवृ-
p.2.237) द्धि च काम्यं शांतिकपौष्टिकम्। मोक्षदं चाक्षर- 4000
पञ्चा अभिवृद्धिषडक्षरं, काम्यमष्टाक्षरं
विद्यात् शांतिकं तु नवाक्षरम्। पौष्टिकं दश- 4001
बीजं स्यात् मंत्राः पंचविद्याः स्मृताः। मोक्षदं-
चेति मोक्षादाभिवृद्धि काम्यवृद्धिशांतिकपौष्टिक- 4002
भेदेन पञ्चविद्या भवंति। मोक्षदं चाक्षरं पञ्च-
मेषु मोक्षदं ~~पञ्चमंत्र~~ मंत्रमक्षरपञ्चकं भवति। 4003
षडक्षरमभिवृद्धिदं स्यात् काम्यमंत्रमष्टाक्षरं
स्यात् शांतिकमंत्रं नवाक्षरं भवति। पौष्टिक 4004
दशाक्षरं भवति। ~~पौष्टि~~ एवं मंत्राः सदाशिव-
भट्टारकस्य नवोपपञ्चविद्या भवंति। ईशे- 4005
चतुर्थमुद्धृत्य मैन्द्रं चतुर्दशान्वितं पराप-
रस्या युक्तं शक्तित्वादिकवान्वितम्।... 4006
तीय) मांते क्षितिकालोपेतौ सोमादित्यादि संयुतं।
पञ्चाक्षरमिदं प्रोक्तं मुक्तिदं परमं विदुः॥ 4007
ईशेति वर्गे प्रथमभूतशकारस्य तुर्यं हका-
राख्योद्धृत्यैन्द्रे चतुर्दशान्वितम्। इन्द्रवर्ग- 4008
प्रथमवर्गस्य चतुर्दशाख्यौकारस्तेन युक्तं-
च परावरसमायुक्त मनुस्वाररूप बिंदुयु- 4009
क्तं च कुर्यात्। एवं चेद्धौमिति आदिप्रासाद-
बीजं स्यात्। एतदादि प्रासादबीजं सदाशिव- 4010
त्रि) मंत्राणामादिस्यात् शक्तिकलाभिधान व्यंजन-
रूप प्रादिपदिक सकारो आदिकला प्रत्यय- 4011
आकारो युक्तश्चेत् स इति भवति सोमांते-
क्षित्रिकलोपेतो कुबेरवर्गस्यांतो वर्गोकारः- 4012
कुबेरवर्गस्यांते वर्गो ईशानवर्गः। तस्यादि-
शकारः।.. द्वये क्षिति कलोपेतं तद्वितीयकला- 4013

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आकारः त्रितयकला उकारः एतात्रयीं कलात्रयीं
युक्तं चेत् वाशिरिति वर्णद्वयं भवति। एतयोः 4014
विपर्ययोच्चारणेन शिव इति भवति। सोमादि-
कुबेरवर्गस्य दिव्यजनवर्णाय यकारेणादि- 4015
अकारयुक्तश्चेत् यकारवति। इदं पंचाक्षरं-
एतत् हौं स शिवाय कलित पञ्चाक्षरं परमुक्तिहे- 4016
p.2-238) मुक्तिदं विदुः। मुक्तिप्रदमिति कथयंति। भूतां-
तन्तु समुद्धृत्य सप्त सप्त स्वरान्वितम्। कार्य- 4017
कारणसंयुक्तं ईशाद्यं त्रिकलायुतौ सोमांत-
द्विकक्षौलतं सोमादित्यादि संयुतं। वरुणांत- 4018
मादि संयुक्त मारुतांतं कलान्वितं। एवं षडा-
क्षरं प्रोक्तं सर्वसिद्धिप्रदायकम्। भूतान्त- 4019
मिति हकारमुद्धृत्य औकारेण संयोज्य-
कार्यकारणेन बिन्दुनादं चे हौमित्यादि- 4020
बीजं स्यात् ईशाद्यमं त्रिकलायुतं ईशा-
द्यभिभूत शकारेण त्रिकलकारो युक्तश्चेत्- 4021
शिकारो भवति। सोमांत द्विकलोपेतं सोम-
वर्गस्यांतो अंतिमोपकारः। तेन द्विकला- 4022
आकाराख्यः, तद्युक्तं चेत्, वकारो भवति।
सोमादित्यादि संयुक्ते सोमवर्गस्य आदि- 4023
यकार उच्यते। तेनाकार संयोगात् यकार-
एव भवति। वरुणांतमादिसंयुक्तं वरुण- 4024
वर्गस्यान्त्यो नकारादि संयुक्तंचेत् नकार-
एव भवति। मारुतांत्य कलान्वितं। मारुत- 4025
स्यापवर्गस्यान्त्यो कलान्वितमकारेण-
संयुक्तं चेत् मकारो भवति। एवं षडक्षरं- 4026
प्रोक्तं हौं शिवाय नमः। इत्युक्तं षडक्षरं
सर्वसिद्धिप्रदायकं। समस्त सिद्धिप्रदमित्यु- 4027
च्यते। गुह्यं चतुर्दशोपेतं शिवशक्ति समा-
युतं। वर्गादि जीवसंयुक्ते सोदिशक्तिकलान्वितं। 4028

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शक्तिमात्राद्विसंयुक्तं वारुणे तु तृतीयकम्।
तृतीयं चास्तु संयुक्तं सोमांत द्विकलायुतम्॥ 4029
अनिलादि कलोपेतं एवमष्टाक्षरं विदुः।
गुह्यमिति गुह्येत्युक्त हकारं चतुर्दशस्वरा- 4030
भिधानौकारेण च बिंदुनाद युक्तं चेत् हौमि-
त्यादि बीजं भवति। वर्गादि जीवसंयुक्तं वर्गा- 4031
द्युक्ताकारो जीवमित्युक्त हकारे युक्तश्चेत् -
हकार एव भवति। शक्त्यभिधान बिन्दु- 4032
ह्सं युक्तश्चेत् ह्सं भवति। सति व्यंजनेन काला-
न्वितम कारक्षारं युक्तं चेत् सकार एव भवति। 4033
p.2.259) शक्तिरिति समत्राकारयुक्तं चेत् अकारे-
भवति। वारुणे तु तृतीयकं वरुणवर्गस्य- 4034
तृतीयादकारो वर्णाद्विसंयुक्तं अकारेण
संयुक्तं चेत् दा इति वरुणो भवति। तृतीयं- 4035
चास्ति संयुक्तं प्रियाभिधाने इकारः। अस्तीव-
च शकारेण युक्तश्चेत् शिकारो भवति। 4036
सोमांतद्विकलायुतं सोमवर्गस्यांतो अंतिमे-
वा इत्युच्यते। तेन द्विकला आकारो युक्तः। 4037
चेत् यकार एव भवति। एवमष्टाक्षरं विदुः।
एवं क्रमेण हौं हं सः सदाशिवाय इति भवति॥ 4038
एतदष्टाक्षरमंत्रं। इतः परं नवाक्षरमुच्यते।
भूतांतं तु समुद्धृत्य षट्पञ्चत्रिकलायुतम्॥ 4039
गुह्यमात्र द्विसंयुक्तं शक्तिं तस्योपरि न्यसेत्।
शक्तिमात्रसमायुक्तं सद्यमांत द्विसंयुतम्॥ 4040
अनिलांतमादि भूतांत लयादिवरुणादिकम्।
तयोर्मध्यगतं यांतमादि बीजेन संयुतम्॥ 4041
सद्यमाद्यं समुद्धृत्य षट्पञ्चमकलायुतम्।
बिन्दुनादसमायुक्तं एवं नवाक्षरं विदुः॥ 4042
भूतान्तमिति हकाराख्यमुद्धृत्य षट्पंच-
कलायुतं। चतुर्दशाक्षरमित्यर्थः। औकारेण- 4043

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

टमा) गुह्यमात्मा छिसंयुक्तं ह इत्य व्यंजन अका-
रात्मबीजं। संयोजनया हकारो भवति। 4044
शक्तिं तस्योपरि न्यसेत्। तयोः हौकारहका-
रयोः उपरि बिन्दुना युक्तश्चेत् हौंहमिति, 4045
वर्णो भवति। शक्तिमात्रादि संयुक्ता स इति
व्यंजन शक्तिमात्र बीजादि मात्रादीत्युक्त अकार- 4046
वृत्तश्चेत् वाकारो भवति। अप्योवर्तिसकारे-
णावकारयोजना कृता चेत् -स इति भवति। 4047
अनिलांतमादि भूतांतमिति। अनिलवर्गस्यां-
तिमवर्णमिति व्यंजन आदिभूतमित्युक्त- 4048
p.-2-240) आकाशवर्गता अन्योन्यवर्णः अकारस्तद्यो-
गेनम इत्यक्षरो भवति। एतत्सृष्टिमार्गेणो- 4049
क्तेते यवर्गस्थिति वर्गस्य उद्धरितुं न युज्यते-
म) अक्षराणाम भिध्यान संज्ञाग्रहणेनसंज्ञा- 4050
भिगमनं च भवति। लयादि वरुणादिकं -
लवर्गस्य प्रथम भूत क्षकारं च वरुणवर्गादि- 4051
भूत तकारं चोद्धृत्य तयोर्मध्यगतं यांतमादि-
बीजेन संयुतं तयोः क्षकार तकारयोः- 4052
मध्ये यकारांत भूत इति व्यञ्जने वकारंयुक्तं।
र इति वर्णं कृत्वा स्थितं चेत् क्षर इत्यनुक्रमो- 4053
भवति। सप्तमात्रं समुद्धृत्य सप्तमावं यका-
राख्यं तस्य त्र्याक्षरस्य पूर्वमेवोद्धृत्य- 4054
षट् पंचमकला युतं। षड्वर्णस्य वायुवर्गस्य-
पञ्चमो म इति व्यञ्जनो अकार युक्तश्चेत् - 4055
म इति वर्णो भवति। बिन्दुनाद समायुक्तं
सर्वाणि बीजानि बिन्दुयुक्तानि स्युः। एवं - 4056
नवाक्षरं बिन्दुः हौं हं स्वां मं क्षं रं तं यं मं
एतन्नवाक्षर मंत्रं शांतिकं भवति। एतद्धि- 4057
परमं बीजं सर्वसिद्धिप्रदायकम्। एतं-
नवाक्षरं परमित्युक्तं बीजं समस्तसिद्धिप्रदं- 4058
भवति। परात्परमुद्धृत्य चैन्द्रे चतुर्दशान्वितं।
कायकारण संयुक्तं शक्तिजीव समन्वितम्॥ 4059

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ईशो तृतीयकं चासौ परिद्वितीय जीवयुक्।
सप्तमांतद्विसंयुक्तं षष्ठांतं षट्कलायुतं॥ 4060
भूतांतं तु समुद्धृत्य वह्नि तस्योपरिन्यसेत्।
पञ्चमांतकलोपेतं भांतमेकार संयुतम्॥ 4061
पञ्च पञ्चमादिस्स्यात् षष्ठांतं सप्तमादिकं।
बिन्दुनादसमायुक्तं दशबीजमिहोच्यते॥ 4062
परापरमिति हकारमुद्धृत्य ऐन्द्रे चतुर्दशा-
न्वितं। इन्द्रवर्गस्य चतुर्दशमौकाराख्यं - 4063
भवति। तेनौकारेण संयोजयेत्। कार्यकारण-
संयुक्तबिन्दुना युक्तं चेत् हौमित्यादि बीजो- 4064
भवति। शक्तिबीजसमन्वितं स इति व्यंजनं-
P.L. 241) जीवाभिध्यान अकारयुक्तं चेत् स इति- 4065
वर्णो भवति। ईशो तृतीयकमिति रे ईश-
वर्गस्य तृतीयाक्षरमित्युक्ते पूर्वोद्धृत सकार- 4066
व्यतिरेकेण इकारेण संयोजयेत्। कार्य-
कारण संयुक्तं चेत् हौमित्यादि बीजो भवति। 4067
शक्तिबीजसमन्वितं स इति व्यंजन जीवाभि-
धान अकारयुक्तं चेत् स इति वर्णो भवति॥ 4068
ईशो तृतीयकमिति ईशवर्गस्य तृतीयाक्षर-
मित्युक्ते पूर्वोद्धृत सकारव्यतिरेकेण इदानी- 4069
मपि एक सकारमुच्चरेत्। परिद्वितीय-
जीवयुत् - अस्योपरि ईशवर्गस्य द्वितीय- 4070
जीव युत्। ष इति व्यञ्जनाक्षरः जीवाभिधा-
नाकारेण युक्तं चेत् ष इति संभवति। सप्त- 4071
मांतद्विसंयुक्तं, सप्तमांत द्विसंयुक्तं सप्तमांत-
द्विसंयुतम्। सप्तमस्यांतं सप्तमांतं तत्पाका 4072
क इति द्वितीय बीजसंयोगी स इति षकार
युक्तं चेत् ष्व इत्यक्षरो भवति। षष्ठांत- 4073
षट्कला युतं षष्ठवर्गान्तं षष्ठांतमिति म-
कारो षट्कला युतं स्वरेषु षट्कला उकारः - 4074

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तेन युक्तो भवेत्। भूतांतं तु समुद्धृत्य-
वह्निं तस्योपरि न्यसेत्। भूतांतमिति हकार- 4075
मुद्धृत्य तस्योपरि रकारं प्रयुंजीयात्। पञ्च-
मांतं कलोपेतं तत् ह्र इति बीजं षड्कलाभूतः 4076
ऊकारः उक्तश्चेत् ह्रू इति बीजं भवति।
भांतमेकारसंयुक्तं हकारांतिम हकारेण- 4077
एकारस्वरयोगश्चेत् मे इति वर्णो भवति।
पञ्च पञ्चमसादिस्यात् पञ्चवर्गस्य पञ्चमन- 4078
कारः पूर्वोद्धृत मकारस्याद्यो भवेत् षष्ठांत-
(दिकं) सहामोद्धृत्यात्, तस्यान कारस्योपरि मकार- 4079
यकारौ उद्धारयेत्। बिन्दुनादसमायुक्तं-
एतन्मे त्रबीजानि स्युः। दशबीजं, हौं सं सं- 4080
हवं सूं सूं मे नं मं यं इत्युक्तदशबीजं-
p.L.242) मंत्रमिहोच्यते। इहास्मिन् शुद्धाख्यतंत्रे .. 4081
... मंत्र इत्युच्यते। एते पञ्चविद्याः प्रोक्ताः-
पञ्चाक्षरादयः पञ्चाक्षरषडक्षराष्टाक्षर- 4082
नवदशाक्षर भेदाः मंत्राः मोक्षाभिवृद्धिकाः-
शांतिपौष्टिकप्रदाः प्रोक्ताः। पञ्चमकाराः- 4083
सकार मंत्राः कथिताः सदाशिवमिदं-
प्रोक्तं महेशं शृणु षण्मुख। हे षडानन- 4084
पूर्वोक्तश्लोकोद्धरण प्रकारेण सदाशिव-
मंत्रं कथितं महेशं शृणु। महेशमंत्रं वक्ष्यते- 4085
महेशं रुद्रमूर्तित्वात् संहारेण समुद्धरेत्।
महेशमिति। महेश्वरतत्त्वं रुद्रमूर्तित्वात् 4086
रुद्रमूर्तिः, सहवर्तित्वात्। ~~रौद्रमंत्राणि~~
संहारक्रमेण समुद्धरेत्। रुद्रमंत्राणि संहार- 4087
क्रमेण समुद्धरेत्। तस्य भेदं त्रिधा ज्ञेयं -
सृष्टिस्थिति लयं तथा। तस्य भेदं रौद्रभेद- 4088
स्य त्रिविधमुच्यते। सृष्टिस्थिति संहारमंत्र-
इति कथ्यते। एतेषु मंत्र भेदेषु सृष्टिमंत्रस्य- 4089

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभेदमुच्यते। भौमौ त्रितयमुद्धृत्य सलि-
लाद्या समन्वितं। भौमौ नवार्णकं विद्यात्- 4090
अंबरे तु षडक्षरं। आधाराद्यैय संयुक्तं-
सृष्टिबीजमिहोच्यते। भूमौ तृतीयमुद्धृत्य- 4091
भौमिवर्गे त्रितयाक्षर मकाराक्षरमुद्धृत्य-
सलिलाद्य समन्वितं। जलवर्गस्यादिम- 4092
वर्णमकारस्य समीपे स्थाप्य भूमौ नवा-
र्णकं विद्यात्। तयोरकारमकारक्षितययोः 4093
अग्रे भूवर्गस्य नवार्णरकाराख्यमुद्धर-
णीयमिति ज्ञातुं शक्यते। अंबरे तु षडक्षरं — 4094
आकारवर्गस्य षड्बीजमेकारमुद्धरेत्।
आधाराद्येय संयुक्तं एतच्चतुरक्षरेऽपि- 4095
ए) बिन्दुयुक्तो भवति। हं मं रं ए इति मंत्रबीज-
मिति ज्ञुद्धाख्य सृष्टिबीजमितिकथ्यते॥ 4096
p.L. 243) पृथिव्यां तु स्वर्वर्ण अ··· यस्स्यात् व्योमांतेन समन्वितं।
शांति तस्योपव·· स्यात्तद्वर्गे तुर्यकं भवेत्॥ 4097
यमाद्य मनिलश्चैव पार्श्विवान्तेन संयुतम्।
व्योमे षष्ठ समाकाराख्यं च क्रमेणोद्धरेत्॥ 4098
व्योमे षड्वर्णकं विदुः। आकाशवर्गस्य-
षष्ठं भूत एकारमुद्धार्य, एतेषां वर्णानां- 4099
बिन्दुयुक्तो भवति। एवमुद्धरणं कृतं चेत्-
हं क्षं रं मं यं एं इत्युक्त षडक्षरो भवति। षड- 4100
क्षरं प्रकीर्तितं एतानि षड्बीजानि संहारमंत्र-
बीजमुच्यते। महेशमेवमाख्यातं शक्ति- 4101
बीजमतः शृणु। महेश मंत्रोक्त्यनंतरं शिवा-
दि मंत्रोपरि शक्ति मंत्राणि श्रूयतां। पञ्चशक्ति॥ 4102
बीजानि निरूप्यते। शक्तिबीजं समुद्धृत्य-
विकृतिवह्नि संयुतं। बिन्दुनाद समायुक्तं- 4103
शिवबीजमिदं परम्। शक्तिबीजं सकार-
मुद्धृत्य विकृतिवह्नि संयुतम्। विकृत्युक्त- 4104
कारं च वह्निरकारं च योजयेत्। एवं योजना-
कृता चेत् स्राविति बीजं स्यात्। बिंदुनाद समा- 4105

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

योगो स्त्रामिति भवति। इदं परं शक्तिबीज-
मेतदुद्धृतं बीजं समस्तशक्त्याश्रय बीजं- 4106
स्यात्। प्रथमा शक्तिरित्युक्ता द्वितीया शक्तिरु-
च्यते। प्रथमा शक्तिरित्युक्ते एतद्बीजं प्रथम- 4107
बीजमित्युक्तं द्वितीयाशक्तिरुच्यते। तदाद्यं-
तु समुद्धृत्य हकारस्य प्रथमं सकारमुद्धृत्य 4108
तेन षष्ठं माया समन्वितं, षष्ठरकाराख्यं-
मायाबीजं ईकाराख्यं च योजयेत्। बिन्दुनाद- 4109
समायुक्तं बिन्दुनादयुक्तं चेत् स्त्रीमिति बीजं-
भवति। द्वितीया शक्तिरेव मुक्ता एतत्स्त्रीमिति 4110
ज द्वितीया शक्तिबीजं स्यात्।
P.2.244) तत्वा वाद्यं - रा - वह्नि बिन्दुनादसमन्वितं॥ 4111
ता) तृतीया शक्तिरित्युक्तं तत्वांद्यांद्यां वरा वह्नि
सकारेण याग्निया ऊकारयुक्तं कार्यकारण- 4112
संयुतम्। स्थितिबीजमिदं प्रोक्तं संहारं चाप्यु-
नोच्यते। प्रथिव्यां तु भवर्गे तृतीयमंत्रावर्णाभि- 4113
धान ह इति व्यञ्जनाक्षराख्यो मांतेन समन्वितं।
आकाश वर्गस्यांतिमभूत अकारेण संयुक्तं- 4114
चेत् हकारो भवति। शक्तिं तस्योपरि न्यस्य-
हकाराख्योपरि शक्तिबिंदुं न्यस्य प्रक्षिपति- 4115
चेत् हमिति स्यात्। तद्वर्गे तुर्यकं तस्मिन्
भूवर्गे च चतुर्थकम्। सकारं हकाराग्रे- 4116
योजयेत्। लयाख्यं लयवर्गस्य आदिबीजं
क्षकारं तयोः पूर्वोक्तयो हकारयोः उपरि- 4117
तृतीयस्स्यात्। अन-- चैव अग्निबीजं रकारं
चतुर्थो वर्णः पार्थिवांतेन संयुतम्। पृथिवी- 4118
वर्गस्यान्तिम वर्णो यकारः। पञ्चमो वर्णः
व्योमे षष्ठं सोमवर्गस्य षष्ठवर्णो एकारः- 4119
षष्ठवर्णो भवति। एते षडक्षरास्संभूय बिंदु-
युक्ता भवंति। इदं बीजं हं सं क्षं रं यं एं इत्युक्त- 4120

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

षडक्षाराश्च क्ष्मिति बीजमित्युच्यते। संहा-
रंचाधुनोच्यते। अधुना इदानीं संहार- 4121
बीजमुच्यते। मवर्गे तृतीयं स्यात् व्योमांतेन
समन्वितं। शिवशक्ति समायुक्तं पृथिव्यादि- 4122
समुद्धरेत्। द्वितीयाद्यं समुद्धृत्य तेजो वै पार्थि-
वांतकम्। व्योमे षड्वर्णकं बिन्दु संहारं चेति 4123
कीर्तितं। महीवर्गे तृतीयं तृतीयाक्षरं ह इति
व्यंजनं व्योमांते अकारेण शिवशक्ति समायुक्तं
एतत् हकारो बिन्दुयुक्तं स्यात्। पृथिव्यादि- 4124
समुद्धरेत्। भूवर्गस्यादिम बीजं क्षकारमु-
द्धरेत्। हकाराग्रे स्थापयेत्। द्वितीयाद्यं - 4125
P. 2. 245) समुद्धृत्य। द्वितीयवर्गस्यमाद्यं मकारम-
क्षकारस्याग्रे योजयेत्। तेजो वै वार्थः। 4126
वान्तकं। अग्निबीजं रकारं भूवर्गस्यांतिति
मारूयं च वह्निरकारं च योजितश्चेत् क्ष्म्रामिति- 4127
बीजं भवति। एतद्बीजं तृतीय शक्ति बीजं
स्यात्। जीवाद्यं वह्नि संयुतम्। कलाद्वादशा- 4128
र्णा) कोपेतं बिन्दुनादसमन्वितं। चतुर्थीशक्ति
रित्युक्तः जीवाद्यं सकाराख्यं वह्निना रकारेण- 4129
कलाद्वादशकं एकारतया चोपेतं संयुक्तं
बिन्दुनाद समन्वितं बिन्दुवृत्तश्च युक्तं चेत्- 4130
स्रैमिति। एतद्बीजं चतुर्थशक्तिबीजं स्यात्-
भूताद्यं वह्नि संयुतं। चतुर्दशकलोपेतं - 4131
बिन्दुनाद समन्वितं। पञ्चमा शक्तिरित्युक्तं-
शिवांगमिति चोद्धृतं। भूताद्यं वह्निसंयुतं - 4132
सकाराख्यं वह्निसंयुतं चेत् चतुर्दशकलो-
पेतमौकारेण संयुतं। बिंदुनादयुक्तं- 4133
चेत् स्रौमिति बीजं स्यात्, एतद्बीजं पञ्चमा-
शक्तिबीजं भवति। शिवांगमिति चोद्धृतं, शिवां- 4134
शक्तिबीजं भवति। शिवांगमिति चोद्धृतं। एतेषां पञ्चशक्तीनां
नानामिव उद्धरणं कृतं। एतेषां पञ्चशक्तीनां-
नामानि व उद्धरणं कृतं। एतेषु पञ्चशक्ति बीजेषु- 4135
उमाशक्त्यादिनेव च।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आदिः उमाशक्ति शक्तिबीजं भवति। उमांबिका-
गणानीश्वरी मनोन्मनीत्यभिधानमूर्तयः ॥ 4136
क्रमेण दशांश संभूत शक्तयः मनोन्मन्याः
क्रमेणैव वंश एव प्रकीर्तितः। मनोन्मनी - 4137
शक्तेः क्रमतः संप्रदायमुच्यते। गणवर्ण
समुद्धृत्य वह्निमायासमन्वितं। बिन्दुनाद- 4138
समायुक्तं गौरीबीजमिदं परम्। ग-वर्गगका
रंसमुद्धृत्य वह्निना रकारेण मायां रंकारेण- 4139
समन्वितं बिन्दुवर्तनेन संयुक्तं चेत्
श्रीमति बीजं भवति। आचार्यभूतं इदं गौरी- 4140
बीजं भवति। अन्येषां चैव शक्तीनां स्वनामा-
द्यक्षरेण स्वनामाद्यक्षरेण तु। कार्यका- 4141
रण संयुक्तं सर्वेषां शक्तिरुच्यते। अन्येषां
शेषभूतानां समस्तशक्तीनां स्वनामधेय- 4142
पूर्वाक्षरेण बिन्दुयुक्त्या तासां नामधेयं-
चतुर्थ्यन्तमुच्चरेत्। एतानि स्वशक्ति 4143
P.2.2.46) बीजानि मन्त्रमेवं समाख्यातं मन्त्रन्यास-
मथ शृणु। मन्त्रन्यासप्रकारं इदानीमुच्यते। 4143
लिंगस्य स्थापने काले तत्वमंत्रांश्च विन्यसेत्।
तत्वानि मंत्रांश्च विन्यसेत्। तत्वांश्च मंत्रां- 4144
श्च न्यासीकुर्यात्। कुंभेषु स्थापित कुंभेषु मंत्रान्-
लिंगे) अन्तर्गतान् कुंभांतर्गतांश्च लिंगवल्लीं 4145
यथा तथा बहिः पूरितान् कुंभबाह्येष्वि(व)
पूरितान् न्यासीकुर्यात् तयोर्योगे क्रियावस्था- 4146
सुप्रतिष्ठिताः। कीर्तिताः तयोर्योगे क्रियावस्था-
तयोः लिंगकुंभयोः योगे संगतौ याक्रिया- 4147
सैव प्रतिष्ठेति कीर्तिता। प्राणप्रकृतियोगं तु-
ज्ञात्वा स्थापनमाचरेत्। प्राणमंत्रमिदं - 4148
प्रोक्तं प्रकृतिर्मुक्तिरुच्यते। प्राणप्रकृतिरिति-
प्राणप्रकृत्योर्योगं ज्ञात्वा स्थापनमाचरेत्॥ 4149
प्राण इत्युक्ते मंत्र इत्यर्थः। प्रकृतिरित्युक्ते
मूर्तिरित्यर्थः। मंत्रमूर्तिसुसंयोगं शिवसांनि- 4150

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्यकारणं। तस्माद्धै मंत्रमूर्तिश्च लिंगमध्ये तु-
विन्यसेत्। मंत्रमूर्तिसुसंयोग मंत्राणां मूर्तीनां च- 4151
संयोगः॥ शिवसान्निध्यकारणं। शिवसन्निधि
कारणस्य कारणं निमित्तं तस्माद्धै तत्कारणं 4152
चैतत्कारणात् मंत्रांश्च मूर्तिश्च लिंगमध्ये-
शिवलिंगमध्ये **विन्यसेत्**। न्यासं कुर्यात्। 4153
मूर्ध्नि प्रविन्यसेत्। शुद्धं मूलं स्यात्सूत्रमुच्यते।
तत्वं तु दाक्षिणे आदौ वामे तु विन्यसेत्॥ 4154
आत्मानं तु विन्यसेत्तु विचक्षणः। शिवलिंगे-
पञ्च प्रासादन्यास प्रकारः कथ्यते। मूर्ध्नीति - 4155
(द्र) शिवलिंगोद्धरणस्य सूत्रसंज्ञाया प्रतिष्ठा
लिंगे च कृत भवलिंगे च न्यसेत्। तस्मान्मूर्ध्नि 4156
शिवलिंगस्य मस्तके शुद्धं इह इति शुद्ध-
प्रासादं न्यसेत्। सूत्रमध्यगे लिंगोद्धर- 4157
P. 2.247) णार्थं पातितसप्तदश सूत्राणां मध्यसूत्रे-
न्याससंज्ञोच्यते। प्रतिष्ठालिंगसमये - 4158
चतुर्विंशद्दंशं भवेल्लिंगतुंगमिति सकला-
धिकारे मध्यसूत्रस्य चतुर्विंशाल्लिंगनि- 4159
र्माणसमये इति रिति लिंगदीर्घं कुर्यादिति-
कल्पितं। तस्मान्मध्यसूत्रे न्याससंज्ञा कल्पि- 4160
ता लिंगद्विपञ्जन्ते चतुष्कोष्ठो नामयो भूतो-
र्ध्वपट्टिकारेखायां उपरिभूताज्यप्रध्वारि- 4161
को रेखास्थाने न मूलं हौमिति कल्पितमूल- 4162
प्रासादं न्यसेत्। दक्षिणो द्विपंक्तिमध्याः मध्य-
स्य दक्षिणस्थाने तत्वं तु तत्प्रासादमहमिति- 4163
कल्पितं न्यसेत्। वामे तु द्विपङ्क्ति मध्यस्य
वामस्थाने आदि आदिप्रासादं हौमिति कल्पितं- 4164
न्यसेत्। सूत्रमूलके ऊर्ध्वपट्टिकायाऽध्यं
प्रध्वारिकायाः मध्यसूत्रमूलेऽस्मानं हंस - 4165
इति कल्पितमात्मप्रासादं न्यसेत्। मन्त्र- 4166
न्यासमिदं प्रोक्तं तत्वन्यासमथोच्यते।
मंत्रन्यासांतरं सदाशिव तत्वन्यासमुच्यते।
कर्मेशं पुरतो न्यसेत्। कर्तुः सव्येतु विन्यसेत्॥ 4167

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ऊर्द्ध्वे तु शिवसादाख्यं पञ्चतत्त्वानि विन्यसेत्।
पुरस्तान्मंत्रन्यासं कृते स्थानेषु तत्त्वन्यास- ॥ 4168
कर्म वक्ष्यति। कर्मेशमिति कर्मसादाख्यं -
सूत्रमूले न्यसेत्। कर्त्रं कर्तृसादाख्यं तत्त्वं- ॥ 4169
सव्यभागे न्यसेत्। मूर्तिसादाख्य तत्त्वं अपरे-
पश्चिमे न्यसेत्। अमूर्ति। अमूर्तिसादाख्य तत्त्वं- ॥ 4170
उत्तरे न्यसेत्। पञ्चमूर्तिमयं देवं सर्वकारणकारणं।
अष्टत्रिंशत्कलोपेतं ध्यात्वा तु सकलं कृतम् ॥ 4171
पञ्चमूर्तिमयं, पञ्चमूर्तीनां स्वरूपं अष्टत्रिंश-
P.2.248) त्कलोपेतं - षाध्यिकाय त्रिंशत्कलया सहितं - ॥ 4172
सकलीकृतं सकलयूतं सर्वकारणकारणं-
समस्तकारणानां बिन्दुमाया प्रधानानां - ॥ 4173
कारणनिमित्तभूतं देवदेवं परमेश्वरं ध्यात्वा
हृदि विचिन्त्य आवाह्य ततो देवं पञ्चाक्षरवि- 4174
धानतः। षडक्षरेण मंत्रेण स्थापयेत्तु विचक्षणः।
विचक्षणः समर्थः। अष्टाक्षरेण मंत्रेण सन्नि- 4175
धीकरणं कुरु। निवेदय नवार्णेन दशबीजेन-
पूजया। पूर्वोक्त सदाशिवामुख्यानुष्ठानं - 4176
षण्मुखाय कल्पितं तत्तत्ध्यानानि पञ्चाक्षर-
विधानतः। मूर्तिमंत्रेण देवमावाह्य लक्ष्य- 4177
मूर्तौ विन्यसेत् षडक्षरमंत्रेण अभिवृद्धि-
करमंत्रेण स्थापयेत्। एवं स्थाप्याष्टाक्षर- 4178
मंत्रेण काम्यमंत्रेण सन्निधीकरणं अभि-
मुखीकरणं कुरु। नवार्णेन शांतिकमंत्रेण - 4179
निवेदयेत्। मनसादीन् निरोधयेत्। दश-
बीजेन दशांतरेण मंत्रेण पुष्टिद मंत्रेण - 4180
पूजां कुरु। हृत्कमलादिषु स्थानेषु भावो-
परीत पुष्पाद्यैः रचया आवहनं नाम प्राप- 4181
कस्य शिवस्य कर्तृलक्ष्य मूर्ताविभिव्यक्ती-
तिच। आत्मनि देव विधारणेन चिदभिवृ- 4182
तिश्च स्थापनं नाम तस्य चित्कले वरणाभाव- 4183
त्वेन, सासिद्धि नाम ऊष्मात्मशिवयोरभि-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न) मुख्यत्वं, संरेशानं नाम, मलनिरोधन-
त्व हास्वस्य आत्मनः शिवे संरोधः, आदित्य- ॥ 4184
संनिधिनि विष्टचंद्र बिंबवत स्थापितमिव
पादं गंधादिकं दद्यात्। ब्रह्मांगैस्सह बुद्धि- ॥ 4185
मान् सकलस्थापनेन काले तद्बीजं हृदि वि-
न्यसेत्। पाद्यमिति बुद्धिमान् शिवशक्ति- ॥ 4186
मुखकृतत्व शिवार्चनाया निरन्त पुरुषः।
p.l. 249) ब्रह्मांगैस्सह ब्रह्मांगमंत्रैस्सह पाद्यं गंधा- ॥ 4187
दिकं दद्यात्। समर्पयेत्। सकलस्थापन-
काले महेश्वरमूर्तिप्रतिष्ठा काले तद्बीजं- ॥ 4188
रौद्रमंत्रबीजं हृदि तां मूर्तीनां हृदि विन्यसेत्।
ह) संहारे संहृति बीजं विन्यसेत्तु विचक्षणः॥ 4189
ताः महेश मूर्तयः, पञ्चविंशति मूर्तिश्च सर्वे-
षामात्मानां सृष्टि स्थिति संहार हेतवो॥ 4190
प्रादुर्भावस्य सृष्टिमूर्ति स्थितिमूर्ति संहार-
मूर्ति रिति त्रिभेदा भवन्ति। तस्मात्कारणात्-॥ 4191
सृष्टिमूर्तौ न्यसेत्। यो मूर्ति सृष्टि करोति-
तस्य मूर्तौ प्रतिष्ठाकाल सृष्टिमंत्रबीजन्यासं-॥ 4192
कुर्यात्। स्थितिमूर्तौ स्थितिकारणे विग्रहे-
स्थिति न्यसेत्। स्थिति मंत्रबीजन्यासं कुर्यात्॥ 4193
संहारे संहारमूर्तौ संहृति न्यसेत्। संहार-
मंत्र बीजं न्यसेत्। विचक्षणः शैवक्रियाकुशल- ॥ 4194
इत्यर्थः। स तु न्यासं कुर्यात्। शक्तीनां स्थापन-
काले तद्बीजं हृदि विन्यसेत्। शक्तीनामिति -॥ 4195
उमादि शक्तीनां प्रतिष्ठाकाले तत्तत्शक्ति-
बीजानि तासां शक्तीनां हृदये न्यासं कुर्यात्। 4196
क्रियाशरीरमित्युक्त मंत्रजीवमिति स्मृतं। 4197
क्रिया मंत्र प्रयोगं हि शिवसान्निध्यकारणं॥
तस्माज्जीवं शरीरं च ज्ञात्वा सर्वं समाचरेत्। 4198
सकल क्रियां कुर्यात्॥ मंत्रभेदमिदं प्रोक्तं-॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रणवं च ततः शृणु। मंत्रभेदं कथितं तदनं-
तरं प्रणवभेदं शृणु। इति षड्ढाख्ये पंचम पटलः॥ 4199
उच्चारशक्ति यमिनश्शिव संगमाय वामादि-
शक्तिसहितं सकलस्य हेतुं-वेदादि जन्म- ॥ 4200
विलयस्थिति भूमिभूतं उच्चारयामि हृदयं-
प्रणवं तदन्तम्॥
p.2.250) अन्यप्रणवभेदं तु प्रवक्ष्यामि समासतः॥ 4201
सर्वपापहरं चैव मुक्तिदं परमं नृणाम्।
अथेत्यनन्तरं प्रणवमिह समासतः शृणु॥ 4202
तत्प्रणवं कीदृशमिति चेत् परमुत्कृष्ट-
नृणामुच्चारणं कृतवताम्। सर्वपापहरं च- ॥ 4203
सकल पापनिर्हरण मुक्तिद मुक्तिप्रदायकं
च भवति। प्रणवं सर्वदेवमयं विदुः॥ 4204
सर्वेषां चैव मंत्राणां प्रणवं प्राणमुच्यते।
प्रणवेति प्रणवः ओंकारः सर्वदेवालयं- ॥ 4205
शिवाक्षरमध्यस्थं भूत्वा सर्वमंत्राणामंतर्व्या-
प्तित्वेन स्थितत्वात् सर्वदेवमयं च सर्वदेवा- ॥ 4206
लयं च सर्वेषां देवानां नामधेयं ~~सर्वस्य~~
स्वस्यापि तस्मात् कारणात् सर्वदेवत्वात् -॥ 4207
स्वरूपश्चेति तदेवेति भावयेत्। सर्वेषां मंत्राणां
प्रणवं प्राणमुच्यते। तत्प्रणवभेदं निरूप्यते॥ 4208
प्रणवं पञ्चभेदं स्यात् तद्भेदं शृणु षण्मुख॥
एवमिति सर्वदेवानां जन्मस्थलत्वात् पञ्चधा-॥ 4209
भिद्यते। साकल्यं शांभं सौख्यं सावश्यं सायुज्यं तथा॥
एते वै पञ्चभेदास्तु पञ्चवक्त्रेषु चोद्धृताः॥ 4210
साकल्यमिति प्रणवं साकल्यादि सायुज्यांतेन-॥
पञ्चविधं प्रणवं भवति। एते पञ्चभेदाः पञ्च-॥ 4211
वक्त्रेषु सदाशिवस्य पञ्चवक्त्रेषु उद्धृताः।
प्रसृताः। अकारं च उकारं च मकारं च त्रिधा-॥ 4212
भवेत्। तृतीयांतगतं नादं चतुर्थं मुक्तिकारणं।
अकारमिति। अकार उकार मकार इति त्रिविधो-॥ 4213

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भवेत्। तृतीयांतर्गतमेतेषां अकारादि-
मंत्राणां अंतर्गतत्वेन वर्तमानमुक्तिकारणं- ॥ 4214
कैवल्यमिति निमित्तभूतानां इदं शुद्धशिवा-
क्षरभूतो हंकारप्रणवचतुर्थाक्षरो भवति -॥ 4215
.. अकारं दक्षिणांगं स्याद्वामांगं स्यादुकारकं।
P. 2. 251) मकारं मध्यदेशं स्यात्तस्मात्त्रिप्रणवात्मकं॥ 4216
हकारस्य मध्ये तु संस्थितं सर्वकारणं -
प्रणवस्वरूपनिरूपयति - अकारमिति॥ 4217
तस्य प्रणवस्य अकारं सव्यभागं स्यादुकारं-
वामभागं स्यात् मकारं मध्यदेशं स्यात्-शिवा- 4218
क्षरस्य मध्यदेशं भवति। अकाराख्यं ब्रह्म-
मकारं) बीजं उकाराख्यं विष्णुबीजं रुद्रबीजं च- 4219
एतान्यक्षरत्रयाणि प्रणवात्मकं प्रणवस्य-
देहभूतं भवेत्। तस्य मध्ये तेषां त्र्यक्षर- 4220
स्वरूपाणां मध्ये सर्वकारणं समस्तानां कारण-
भूतहकारं संस्थितं तिष्ठति-अकारब्रह्मदै- 4221
वत्यमुकारं विष्णुदैवतं। मकारं रुद्रदैवत्यं
ओंकारं तु सदाशिवः। नादं शिवमयं विद्यात्- 4222
पञ्चदेवात्मकं विदुः। अकारमिति। अकार-
उकारमकारपरशिवाधिदेवताः। पञ्चदेवात्मकं- 4223
ह्येतत् पञ्चाक्षरस्य मूलमेतत् स्वायंभुवप्रणव-
पञ्चदेवतास्वरूपमिति अकारोकारसंयोगा- 4224
दोकारस्वरूप-उच्यते। ओमित्येकाक्षरं -
ब्रह्म वदंते सर्वयोगिनः। अकारोकारसंश्ले- 4225
षात् प्रणव उच्यते। ओमित्येकाक्षरं मकारा-
स्यमनुस्वारत्वात् बिन्दुरेव भवति। अकारो- 4226
कारमकाराः। ओंकारहकारयोगे ओमित्येका-
क्षरमेव भवति। ब्रह्म परब्रह्म इति। सर्वयोगि- 4227
नोऽपि वदन्ति। एतत्प्रणवं साकल्यादि लक्षण
युक्तत्वात् साकल्यमेव भवति। साकल्यभेदं- 4228

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निरूपितं । पञ्चमं प्रथमोपेतं तृतीयांतर्गतं परं।
साकल्यमिति विज्ञेयं पूर्ववक्त्रे तु जायते॥ 4229
पञ्चममिति पञ्चमकारमित्यर्थः। प्रथमो-
पेतं प्रथमाभिधानेन अकारेण युक्तं चेत- 4230
ओंकार इति वर्णो भवति। तृतीयांतर्गतं परं
p. 2-242) तृतीयाख्य मकारांतर्गतो भूत्वा हकार 4231
सृष्टिस्थिति संज्ञया अ-उ-म-ओ इति चतु-
रक्षरेण सह वर्तमानो हकाराख्यो शिवबीज - 4232
मेव साकल्यमिति ज्ञेयं, साकल्य प्रणवमेवं-
विज्ञेयं। पूर्ववक्त्रे जायते। एतत्साकल्यं 4233
सदाशिव भट्टारकस्य पूर्ववक्त्रे जातम्।
प्रणव ब्रह्मणः साकल्याभिधानं कृतं शिवस्य 4234
सादाख्य मिति अभिधानवत् तथा निश्चितं +
शांभवे भेद ग्रन्थैः। आदि बीजं चतुर्थान्तं 4235
भांतं भूतांत संयुतम्। चतुर्थस्वर संयुक्तं
शांभवं दक्षिणानने। आदिबीजमित्यकारं च - 4236
243) चतुर्थान्तं उकारं भांतमकारं मकारं च भूतांत-
संयुतं। हकारं चतुर्थ स्वरस्वरसंयुतमीकारं - 4237
च अ इ म हं रं इति उक्त पञ्चाक्षराणि शांभव-
प्रणवम्। दक्षिणवक्त्राज्जातं। सौम्यभेद- 4238
माह- वर्गादि पञ्चमं चैव षष्ठांतं जीवसंयुतं।
तृतीय स्वर संयुक्तं सौख्यं वै पश्चिमानने॥ 4239
वर्गादि अकारं पञ्चमं मकारं षष्ठवर्गस्य
पञ्चमवर्गस्यान्तं मकारं इत्यर्थः॥ हकारं- 4240
च तृतीयस्वर संयुक्तं इत्युकार संयुक्तं च-
भवति। तदा अ उ म ह इ इति वर्णो भवति- 4241
एतदेव सौख्य प्रणवं भवेत्। पश्चिमानने
जातं। सावश्यभेदमाह —अकारं पञ्चमांतं च - 4242
मकारं तत्व बीजकं। एकादशकलोपेतं
सावश्यं सौम्य वक्त्रके। अकारमिति-अ- 4243

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

उकार मकार हकार एकार सावश्य प्रणव-
भेदा, एते सौम्य वक्त्रे जाताः सायुज्य - ॥ 4244
प्रणवमुच्यते। आदि प्रणववर्णाश्च पञ्च-
मांतं षडांतकं। गुह्यं चतुर्दशोपेतं सायु- ॥ 4245
ज्यं चोर्ध्ववक्त्रके। आदिति। अ-उ-म-सै
ह-औ इति वर्णसायुज्य प्रणवभेदाः। एते- ॥ 4246
उर्ध्ववक्त्रे जाताः। एवं प्रकारेण पञ्चप्रासाद-
भेदः भेदमुक्त्वा तेषां भेदानां वर्णाश्च ॥ 4246
ऋषि सनत्कुमारस्तु भूतत्वाधिदेवता-
अत्र संख्यानि च निरूप्यते। ॥ 4247
p. 2·253) साकल्यं रक्तवर्णं स्यात् छंदोनुष्टुप् प्रकीर्तितः।
ऋषि सनत्कुमारस्तु पार्थिवं भूतमुच्यते॥ 4248
तत्वं कर्मेशमित्युक्तं ईशानमधिदैवता।
मंत्राश्च तुर्भिः संयुक्तं सर्वसिद्धिकरं परं ॥ 4249
साकल्यमिति। ईशानमधिदैवतमित्युक्ते-
कर्मेशस्येशान इति पर्याय इति नाम अन्यत् - 4250
स्पष्टम्। शांभवत्वजन प्रख्यं त्रिष्टुप् प्रकीर्तितं।
भारद्वाजो ऋषिर्ज्ञेयः सलिलं भूतमुच्यते॥ 4251
कर्तृतत्वं कर्तृसादं ख्यातं ईश्वरस्त्वधिदैवतं।
पञ्चमात्मासमोपेतं सर्वसिद्धिप्रदायकम्॥ 4252
शांभवमिति। ईश्वरमिति। मूर्तिभेद इत्यर्थः।
अन्यत् स्पष्टं। सौख्यं गोक्षीरवर्णं स्याच्छंदो- 4253
बृहतिरिष्यते। विश्वामित्र ऋषिर्ज्ञेयः तेजो-
त) भूतमिति स्मृतं। समूर्तं तत्वमित्युक्तं ब्रह्मा- 4254
तस्याधिदैवता। चतुर्मात्रासमायुक्तं सर्वसं-
पत्करं परं। सौख्यमिति। ब्रह्मेत्युक्ते मूर्ति- 4255
भेद मध्योक्तो ब्रह्मेशो ज्ञायते। सावश्यं कुंकु-
माभं स्याच्छंदो जगतिरुच्यते। गौतमोऽस्य 4256
ऋषिर्ज्ञेयो मारुतं भूतमुच्यते। अमूर्तं तत्व-
मित्युक्तं ईशस्तस्याधिदैवतम्। पञ्चमात्रास- 4257

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मोपेतं सर्ववश्यकरं परं। आवश्यमिति।
ईशा मूर्तिभूत सदाशिवानंतर पठितं- ॥ 4258
ईश इत्यर्थः। सायुज्यं स्फटिकाभासः
छंदो वै जगती स्मृतं। अगस्त्योस्य ऋषि- ॥ 4259
र्ज्ञेयः व्योम भूतमुदाहृतं। शिवाख्यं तत्व-
मित्युक्तं अधिदेवस्सदाशिवः। पञ्चमात्रा- ॥ 4260
समोपेतं सायुज्य पदमाप्नुयात। सर्वं स्पष्टं ॥
प्रणवं सर्ववर्णानां जीवबीजमुदाहृतं ॥ 4261
बिन्दुनाद प्रकारेण प्रणवाकृतिरुच्यते।
प्रणवमिति प्रोक्त समस्तवर्णानां पूर्वोक्त- 4262
P. 2-254) श्लोक **वर्णानां** प्रणवाग मात्रेषु प्रणवं प्राण
भूतमिति प्रणवाभिधानं श्रूयते। शिवबीज- 4263
मुदाहृतं॥ **शिवाक्षर**मिति ज्ञेयं॥ बिन्दुनाद-
प्रकारेण समस्तवर्णानां तल्लक्षणश्च - 4264
शक्त्यक्षरभूत कारणत्वा शिवशक्तिप्रकारतः
प्रणवाकृतिरुच्यते। प्रणवाकारं कल्पितं॥ 4265
सृष्टिस्थिति निमित्ताय उच्चारणमधोमुखम् ॥
स्वाकल्यादीनि पञ्चैते क्रमेण परिकीर्तिताः॥ 4266
सृष्टिरिति। उद्भूतानां शरीरादीनां स्थिति-
कारणाय अधोमुखं हृदयांतं यावत्ताव- 4267
त्क्रमनाय उच्चारणम्। सर्वमुत्क्षावः ब्रह्मा-
~~ख्य~~ ख्य युक्तं प्रणवोच्चारणं कुर्यात्। साकल्या- 4268
दीनि द्वि पञ्चैते पूर्वोक्त श्लोक साकल्यादि पञ्च-
प्रणवं च क्रमेण परिकीर्तिताः॥ 4269
प्रणव भेदमिदं प्रोक्तं ब्रह्मभेदं ततः शृणु। 4270

— प्रणव भेद पटलः —

येनेदं परयाविभक्त पञ्चाशदब्जं महः
मे) ब्रह्माख्यं निज भूत द्वैतदमितं विद्याधिकं- 4271
प्रजायते। श्रोत्रादि समस्तवर्णजनितं- 4272
वस्त्व ष्ट ब्रह्माधिकं। विश्वोत्पत्ति विनाश-
संस्थिति कृति कृते तस्मै नमो ब्रह्मणे —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अत्र वक्ष्ये विशेषेण ब्रह्मभेदविधिं परं।
अत्र अनंतरं परमुत्कृष्टं ब्रह्मभेदविधि- 4273
ब्रह्मणां भेदविधानं प्रणवभेदानंतरं वक्ष्ये।
बृहत्वात् बृंहणत्वाच्च ब्रह्ममित्यभिधीयते॥ 4274
ब्रह्मत्वमिति विज्ञेयं तद्ब्रह्म पञ्चधा भवेत्।
ब्रह्मादि महत्वात् बृंहणत्वात् परिपूर्ण- 4275
त्वाच्च ब्रह्ममित्यभिधीयते। ब्रह्ममिति
कलितं ब्रह्मत्वमिति कलितं। ब्रह्मत्वमिति- 4276
विज्ञेयं सर्वं कलिपतं ब्रह्मेति श्रुत्वा समस्ता-
नामपि ब्रह्माभिधानं भवति। एवं प्रकारेण 4277
ज्ञातुं शक्यते तद्ब्रह्म पञ्चधा भवेत्। तच्छि-
p. 2. 255) वतत्वमिति परब्रह्मतत्वं पञ्चधा भवेत्। 4278
स्वस्य कालगुणप्रभावेन पञ्चविधो भ-
वति। ते के वा भेदाः? पञ्चब्रह्मप्रकारेण- 4279
पञ्चविंशति भेदकम्। एतैर्भेदैर्यन्ति पञ्च-
विंशति स्तत्वैस्संयुतं। पञ्चब्रह्मेति पञ्चब्रह्म- 4280
प्रकारेण पञ्चविंशति भेदकम्। तद्ब्रह्मैके-
कैकं पञ्चपञ्चभेदेन पञ्चविंशतिर्भवति। 4281
एभिर्भेदैर्युक्तं एतैर्भेदैस्सहविद्यमानं
तत्वयुक्तं सकलतत्वसहितं पञ्चविंशति- 4282
भेदं भवति। इत्येतत्पंचभेदत्वात् पञ्च
ब्रह्ममुदाहृतम्। एवं प्रकारेण तस्मिन् 4283
निष्कलब्रह्मेत्युक्तं। शिवतत्वं पञ्चभेद-
त्वात् सकलमिति लीलामात्रात् पञ्चीकृत- 4284
भेदमात्रत्वात् पञ्चब्रह्ममुदाहृतम्। मूर्ति-
ब्रह्मात्मा पूर्वं तत्वब्रह्म द्वितीयकम्। 4285
भूतब्रह्म तृतीयं स्यात् पिण्डब्रह्म चतुर्थकं।
पञ्च पञ्चकला ब्रह्म पञ्चब्रह्ममुदाहृतम्॥ 4286
सर्वं स्पष्टं। एतेषु पञ्चब्रह्म पञ्चानां लक्षणं।
वक्ष्यतेऽधुना। ब्रह्मा विष्णुश्च रुद्रश्च मूर्ति- 4287

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

.. मूर्तिप्रणवाधिपाः। तस्मात्प्रणवरूपं तु
मुक्तिरूपमुदाहृतं। ब्रह्मविष्णुरुद्राश्च सृष्टि- 4288
स्ते) स्थिति संहार कर्तारस्स्मे। अकारोकारम-
काराणाँ अधिपतयो भवंति। तस्मात्तेनकार- 4289
णेन प्रणवस्वरूप मूर्ति मूर्तिरूपमुदाहृतं।
मूर्तिमयमिति ज्ञायते। साकल्यदिस्तु यत्प- 4290
स्त्रमूर्ति ब्रह्म तदुच्यते। साकल्यादिप्रणवानाँ
शिवतत्वं प्रभुस्स्मृतम्। एतच्छिवमयं बीजं 4291
शिवार्णं चेति कीर्तितं। एतेषाँ चैव तत्वानाँ
एषाँ त्रिवर्णसंभूत समस्ततत्वानाँ शिव- 4292
तत्वबीजमेव एतच्छिवमयं बीजं इदं
शिवस्वरूपं भूतबीजं शिवार्णं चेति कीर्तितं। 4293
.. कारमिति सर्वांगमेषु कथितं। तस्मात्
p.2-256) शुद्धादि चात्मांत परब्रह्म प्रकीर्तितम्। 4294
तस्मादिति, तस्मात्कारणात् शुद्धादि .. त्मांत-
पञ्चप्रासादं च तत्व ब्रह्मेत्युदाहृतम्। 4295
भूतब्रह्मेति रूच्यते। प्रथमं माँसबीजं स्यात्
द्वितीयं मेदसो भवेत्। तृतीयं षष्टभेदं तु चतुर्थं- 4296
सप्तमं तथा। पञ्चमं पञ्चमं विद्यात् पञ्च
भूतिकमुच्यते। माँस बीजं प्रथमं स्यात् 4297
माँसबीजं लकारं प्रथमं भूतबीजं स्यात्
द्वितीये मेदसो भवेत्' द्वितीय भूतबीज - 4298
द्वितीयमेदसो भवेत्' द्वितीयभूतबीजं
वकारमेदसो भवेत्। षष्टभेदं तृतीयकं। 4299
षष्टाभिधान कामेव तृतीय भूतंबीजं भवति।
पञ्चभूतिकमुच्यते। एवं पञ्चभूतिकत्वं 4300
उक्त्वा, माँसं वै पार्थिवं बीजं मेदसो ह्याव
उच्यते' षष्ठं तेजो विनिर्दिष्टं स्यात् सप्तमंदा- 4301
रितात्मकम्। पञ्चमं व्योम बीजं स्यात् भूत-
ब्रह्मं प्रकीर्तितम्। पृथिव्या भूतेषु लकारा- 4302

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यक्षराणि वर्तन्ते। एतद्ब्रह्मसम्भूतं भवति।
पिण्डब्रह्म निरूप्यते। सद्यके प्रकृतौ वर्ण्ये ॥ 4303
चतुर्थी पञ्चकं त्यजेत्। शेषेषु पञ्चवर्णेषु-
पञ्चमं सहयोजयेत्। बिन्दुनादसमायुक्तं ॥ 4304
पञ्चवर्णेष्वनुक्रमात्। प्रकृतौ सद्यके वर्णे
षोडशकलानां मध्ये प्रकृतिह्रस्वस्वराक्षराणि ॥ 4305
भवंति। तेषु तुर्यं ऋकारं च - - - - कारं
च त्यजेत्। त्यक्त्वा शेषेषु पञ्चवर्णेषु ॥ 4306
परिशेषित पञ्चकलासु पञ्चमं सहयोज-
येत्। हकाराख्यं सहयोजयेत्॥ बिन्दु- ॥ 4307
नादसमायुक्तं पञ्चवर्णेष्वनुक्रमात्-
प्रकृति स्वरसंयुक्त हकारेष्वनुक्रमात्॥ 4308
बिन्दुनादं च योजयेत्। एवं योजना कृता-
चेत् हं हि हुं हैं हौं इत्युक्त ब्रह्मबीजमुक्तं - ॥ 4308
स्यात्, एतद्व्यतिरिक्तं तांत्रिकब्रह्म भवति।
P.2.257) वह्नियुक्तं चेत् वैदिकब्रह्म भवति। सद्यो - ॥ 4309
जातं तत्पूर्वं वामदेवं द्वितीयकम्।
उअघोरं तु तृतीयं स्यात् चतुर्थं पुरुषं हि वै॥ 4310
ईशानं पञ्चमं विद्यात् पञ्चनामानि चोच्यते। 4311
एतानि पञ्चबीजानि पञ्चब्रह्माभिधाना-
न्युच्यंते। प्रणवादि चतुर्थ्यन्तं स्वनामपद- 4312
मध्यगं। नमस्कारादि संयुक्तं सद्यादीनि-
नियोजयेत्क्रमात्। सर्वम् स्पष्टम्॥
शिवाणी जीववर्णानां संयोगात्पिण्डमुच्यते॥ 4313
शिवा। णे हकारे जीववर्णानां मकारादि
पञ्चह्रस्वस्वराणां संयोगात् संबन्धात् - ॥ 4314
पिण्डमुच्यते। पिण्डमित्युक्तं भवति। कर्मेशं
पिण्डरूपत्वात्पिण्डब्रह्म मुदाहृतम्। कर्मेश- 4315
तत्त्वपिण्डरूपभूतकारणात् पिण्डब्रह्ममु- 4316.
दाहृतं। पिण्डब्रह्माभिधानं भवति। एवं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पिण्ड ब्रह्मेत्युक्त पञ्चब्रह्म मंत्राणां अष्टत्रिंश-
त्कलाबंध्य विध्या नात्रासौ कला नामेव- ॥ 4317
कला ब्रह्ममित्युच्यते। ईशानं पुरुषं
चैव अघोरं वामदेवकं। सद्योजातं च· ॥ 4318
पञ्चैते कला ब्रह्ममुदाहृतं। एतानि
~~ईशाना~~ प्रत्युत कला ब्रह्मत्वेन ज्ञायते॥ 4319
ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कला।
अघोरस्य कला चाष्टौ वामदेवं त्रयोदश॥ 4320
सद्यस्याष्टकला ज्ञेया अष्टत्रिंशत्कलास्मृताः।
सर्वस्पष्टं। कला ब्रह्म मंत्राणि प्रपंचयिष्यते॥ 4321
ईशानस्सर्वविद्यानां प्रथमं परिकीर्तितं।
ईश्वरस्सर्वभूतानां द्वितीयं परिकीर्तितम्॥ 4322
ब्रह्माधिपतिश्चैव ब्रह्मणोऽधिपतिस्तथा।
ब्रह्मेदिदं द्वितीयं स्यात् शिवोमेऽस्तु चतुर्थकं॥ 4323
ईशानस्सर्वविद्यानां इत्यूर्ध्वे, ईश्वरस्सर्व-
(P.L. 258) भूतानामिति पूर्वे। ब्रह्माधिपतिः ब्रह्मणोऽधि- 4324
पतिः ब्रह्म दक्षिणे तृतीयकम्। शिवोमेऽ-
स्तु वामे चतुर्थकम्। सदाशिवमिति ज्ञेयं पञ्च- 4325
मं तत्वमिति कीर्तितं। इति ईशानरूपाश्च
पञ्च संख्या प्रकीर्तिताः। सदाशिवमिति पदं- 4326
पञ्चमं भवति। ईशानरूपस्य इति पञ्चसंख्याः
प्रकीर्तिताः। तत्पुरुषाय विद्महे प्रथमं परिकी- ॥ 4327
र्तितं। महादेवाय धीमहि तन्नोचेति द्वितीयकं।
रुद्रस्तृतीयमित्युक्तं चतुर्थं तु प्रचोदयात्॥ 4328
एवं पुरुषकलाचैव चत्वारश्चेति कीर्तितं,
तत्पुरुषाय विद्महे महादेवाय धीमहि॥ 4329
तन्नो रुद्रः प्रचोदयात्। दि··· भिन्नपदं-
स्यात्। अघोरेभ्यस्तथा पूर्व अघोरेभ्यश्च- 4330
द्वितीयकम्। घोरघोरतृतीयं स्यात् तरेभ्यश्च-
चतुर्थकम्। सर्वतः पञ्चमं विद्यात् षष्ठं सर्व- 4331

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मुदाहृतं। सर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः
इत्यष्टमघोरस्य प्रथमं वामदेवाय ज्येष्ठाय- ॥ 4332
द्वितीयकं। तृतीयं रुद्राय नमः। कालायेति-
चतुर्थकम्। पञ्चमं काल इत्युक्तं विकरणाय -॥ 4333
नमोऽस्तु षट्सप्तमं बलमित्युताष्टमं विक-
रणाय च। नवमं बलमित्युक्तं दशमं प्रम- ॥ 4334
थनाय च। सर्वभूतदमनाय चैकादशमि
ति स्मृतम्। द्वादशं च मनश्चेति त्रयोदशो- ॥ 4335
न्मथनाय च। एते त्रयोदश कला वामदेवे-
ति कीर्तिताः। वामदेवाय नमः। ज्येष्ठाय- ॥ 4336
नमः। रुद्राय नमः। कालाय नमः। कलाय-
नमः। विकरणाय नमः। बलाय नमः। विक- ॥ 4337
रणाय नमः। बलाय नमः। ~~विकरणाय नमः।~~
प्रमथनाय नमः। सर्वभूतदमनाय नमः॥ 4338
उन्मनाय नमः। एते वामदेव. कला त्रयोदश-
सद्योजातं प्रपद्यामि प्रथमं परिकल्पितं॥ 4339
ग्रं) द्वितीयं सद्योजाताय वै नमश्चेति कीर्तितं॥
द्वितीयं तु भवेच्चैव अभवेति चतुर्थकम्॥ 4340
पञ्चमं नातिभवे षष्ठन्ते ति भजस्व माम्॥
सप्तमं तु भवं विद्यादुद्भवं चाष्टमं भवेत्॥ 4341
एवमष्टकलाप्रोक्तं सद्योजातमुदाहृतम्।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः॥ 4342
भवे भवे नातिभवे भजस्व मां भवाय नमः।
उद्भवाय नमः। सद्योजाताष्टकला प्रोक्तम्॥ 4343
पञ्च ब्रह्माण्य चोच्यते। ईशानादीनि
विद्यांतं अष्टत्रिंशत्कलास्मृतम्। कला- ॥ 4344
ब्रह्ममिति प्रोक्तं पञ्चब्रह्माणि चोच्यते।
एतेषां मूलादीनां ब्रह्मत्वं कथितमिति चेत्- 4345
परब्रह्म इत्युक्त शिवतत्वस्य जंहकारादपि।
कार्यकारणयोरभेदोपचारात् ब्रह्मत्वं भवति॥ 4346

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तद्ब्रह्म भूत हकारस्य कलया द्विगुणवकारणं-
बीजेषु स्वयं जीवरूपतया स्थितः। तस्मात् 4347
पञ्चविधं प्रणवं च ब्रह्म भवति। तत्व-
ब्रह्ममित्युक्ते ईशाद्यात्म प्रासादांत- 4348
पञ्चविध प्रासादस्याभिधानात् तेष्वपि
मकारो वर्तते। तस्मादपि तद्ब्रह्ममिति कथ्यते॥ 4349
पिण्डब्रह्ममिति सद्योजातादीशानांतवर्ति
अकार उकारः ओकारः कथ्यते। तेष्वपि हकारो 4350
व्याप्यन्ते। तस्मात्तदपि पिण्डब्रह्ममिति-
कथ्यते। भूतमित्युक्ते पृथिव्याद्याकाशांतः- 4351
तेषां लयरवहतेष्वपि व्याप्य लां लीं हूं हैं
हं हौं इति स्थितत्वात् भूतब्रह्ममिति कथ्यते॥ 4352
कलाब्रह्ममिति तथैव ज्ञेयं। कर्मसादाख्य-
मिति व्यलिंगयार्थतत्व पञ्चकत्वं पिण्डः इत्युक्ते- 4353
पञ्चब्रह्मणां नाम साध्यकपरे जप्यकारणार्थ-
पञ्च ब्रह्माणि भिन्नानि स्युः। अष्टत्रिंशत्कलो- 4354
पेतं कलाद्यन्तं तत्प्रकीर्तितम्। इत्यन्तक-
लाज्ञानं सूत्रेणापि अं प्रकारेण वक्त्रेणवक्त्र- 4355
त्वं, परिकीर्तितं चित्कार्यं तं विजानीयादि-
P. 2-260) ति शिवभेदाष्टस्य श्लोकार्थेनापि स्वपरा- 4356
शक्ति संभूतो भूत्वा ज्योतिर्देवताधिपतीनां-
समस्तवर्णकलानां स्वमेवाश्रयत्वात् पिण्ड- 4357
ब्रह्म पञ्चकमेव कलाब्रह्म मंत्रक पञ्चक-
मित्युच्यते। पञ्चब्रह्मविभागभूत पंचविंशति- 4358
ब्रह्ममपि कीर्तितं। मूर्तादि च कलांतानां लक्षणं-
वक्ष्यते क्रमात्। मूर्तिब्रह्मादि कलाब्रह्मांतानां-॥ 4359
ब्रह्मणां लक्षणं वर्णरूपक्रमम् वर्ण्यते।
ईशानश्चेश्वरो ब्रह्मा शिवश्चेति सदाशिवः॥ 4360
पञ्च मूर्त्याकृतिर्यस्मात् तस्मात् प्रणवाकृतिः।
पञ्च प्रणवस्वरूपं भवति। सद्यादीनां च- 4361

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पञ्चानां क्रमेण परिलक्ष्यते। सद्योजात-
प्रमुखानां पञ्चमूर्तीनां लक्षणं लक्षितं ॥ 4362
कर्मकर्तृ समूर्तिश्च अमूर्तिश्च शिवं तथा।
पञ्चपादाख्य तत्वानां सद्भावं विन्यसेत्क्रमात्॥ 4363
तद्भावमात्मनादीनि शुद्धांतानि च लक्ष्यते।
कर्मसादाख्य कर्तृसादाख्य मूर्तिसादाख्य- ॥ 4364
शिव सादाख्याभिधानानां पञ्च सादाख्य-
तत्वानां यद्भावमस्ति यत्स्वरूपं भवति। 4365
तद्रूपं स्यादिति मूर्तिषु क्रमेण विन्यसेत्॥
क्रमादात्मादीनि शुद्धांतानि च आत्मपूर्व॥ 4366
शिव शुद्ध प्रासादांतानां पञ्चप्रासादानि-
भाव्यंते। पार्थिवं पीतवर्णं स्यात् शुक्लाभं 4367
ह्याप उच्यते। रक्ताभं तैजसः प्रोक्तं कृष्णाभ्र-
मलिभं विदुः। व्योम धूम्रनिभं विद्यादेव- 4368
भूताकृतिर्भवेत्। गोक्षीरं शंखवर्णाभं-
जटामकुटमण्डितं। चतुर्वक्त्रं चतुर्बाहुं- 4369
नेत्रद्वादशभिर्युतम्। सर्वाभरणसंयुक्तं-
एवं सद्यमुदाहृतम्। जपापुष्पनिभं- 4370
वामं जटामकुटमण्डितम्। चतुर्वक्त्र-
p. 2. 26) समायुक्तं चतुर्भिश्चतुर्दोर्भिः समन्वितम्॥ 4371
नेत्रद्वादश समायुक्तं सर्वावयवसंयुतम्।
रक्तवस्त्रधरं देवं रक्तवस्त्रोत्तरीयकम्॥ 4372
दक्षिणाभय टंकं च वामे वरदशूलधृक्।
रक्तगंधानुलिप्तांगं रक्तमाल्यैरलंकृतम्॥ 4373
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम्।
वामदेवमिति प्रोक्तं सर्ववश्यकरं परम्॥ 4375
भिन्नांजन समप्रख्यं अघोरं रुद्ररूपकं।
चतुर्वक्त्रं चतुर्बाहुं जटामकुटमंडितं॥ 4376
द्वादशाक्षरसमायुक्तं दंष्ट्राकरालमास्यकं।
व्याघ्रचर्मांबरधरं व्याघ्रचर्मोत्तरीयकं॥ 4377

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पादं नूपुरसंयुक्तं सर्वाभरणभूषितम्।
दिव्यगंधानुलिप्तांगं दिव्यपुष्पैरलंकृतं॥ 4378
टंकशूलसमायुक्तं अभयंवरदान्वितम्।
सर्वावयवसंयुक्तं सर्वलक्षणसमन्वितम्॥ 4379
अघोररूपमेवं हि सर्वशत्रुजयं भवेत्।
पुरुषं कुंकुमाभं स्यात् चतुर्वक्त्रं चतुर्भुजं॥ 4380
जटामकुटसंयुक्तं नेत्रद्वादशभिर्युतं॥
सर्वावयवसंयुक्तं पीतांबरधरं परम्॥ 4381
पीतं वस्त्रोत्तरीयं च सर्वाभरणभूषितम्॥
सव्ये तु टंकमभयं शूलं वरदमन्यके॥ 4382
दिव्यगंधानुलिप्तांगं दिव्यपुष्पैरलंकृतं॥
एवं तत्पुरुषं विद्यात् सर्वसिद्धिप्रदायकं॥ 4383
ईशानं स्फटिकाभं स्याज्जटामकुटमण्डितं॥
चतुर्वक्त्रसमायुक्तं द्वादशाक्षसमन्वितम्॥ 4384
चतुर्भुजसमायुक्तं सर्वलक्षणसंयुतम्॥
शुक्लांबरधरं सौम्यं शुक्लवस्त्रोत्तरीयकं॥ 4385
टंकशूलसमायुक्तं अभयं वरदान्वितं।
सर्वावयवसंयुक्तं सर्वाभरणभूषितं॥ 4386
दिव्यपुष्पैरलंकृत्य दिव्यगंधानुलेपितं।
एवं ईशानरूपं तु सद्योमोक्षप्रदायकं॥ 4387
अघोररौद्रमित्युक्तं शेषं सौम्यमुदाहृतं।
P..2.262) समाप्य तु अघोरमेवोग्ररूपं। अन्यत्तु- 4388
एवं सौम्यरूपं। अनंतरं पंचसादाख्यरूपं
निरूपयिष्येऽधुना। सद्यो मूर्तं विजानीयाद- 4389
मूर्तं वामदेवकं। अघोरं कर्तृरूपं स्यात्-
कर्म तत्पुरुषं भवेत्। शिवसादाख्यमीशानं - 4390
पञ्चतत्वात्मकं विदुः। सद्योजातमिति-
पिण्डब्रह्ममूर्ति सादाख्यतत्वं। अघोरमिति- 4391
पिण्डब्रह्मं कर्तृसादाख्य तत्वं तत्पुरुषमिति-
ब्रह्म कर्मसादाख्यरूपं भवति ईशानमिति- 4392

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पिण्डब्रह्म शिव सादाख्य रूपतत्त्वं तत्पुरुष-
सादाख्यरूपं । एवमन्योन्य भेदात् सद्यादि- 4393
पिण्डब्रह्म पंचकं भवति। पञ्चमूर्त्यत्मिकं यत्तत्
पिण्डब्रह्माकृतिर्भवेत् । पिण्डब्रह्ममिति ॥ 4394
सद्यादिरुच्यते। तदेव भवति। एवं पिण्डाकृ-
तिप्रोक्तं कलारूपमिहोच्यते । शंखकुंदेन्दु- ॥ 4395
वर्णं च स्फाटिक क्षीरसन्निभं। ईशानस्य
कलानां तु पञ्चवर्णाः प्रकीर्तिताः। रक्तं काव्यं ॥ 4396
सितपीतं तुर्यं पुरुषकलानुभं। अंजनारुण-
पीतञ्च श्यामं नीलं सितारुणम्। काञ्चनं -॥ 4397
काष्टवर्णानि अघोरस्य कला स्मृतम्। जपा-
पीतांजनश्यामं शुक्लं श्यामांजनारुणम् ॥ 4398
अंजनं स्फटिकं रक्तं नीलं मरतकं तथा॥
इति वामलोचनं तु त्रयोदश निभा स्मृताः॥ 4399
रक्तं सितं तथा नीलं कृष्णं पीतं सकुंकुमम्॥
भिन्नांजनारुणं चैव त्वष्टौ सद्य कला स्मृताः॥ 4400
कलारूपाणि सर्वाणि त्रिणेत्राश्च चतुर्भुजाः॥
अभयं वरदञ्चैव शूलं परशुधारणं ॥ 4401
सर्वलक्षण संयुक्ताः सर्वाभरण भूषिताः॥
तासां कलानां साधारणं तु रूपमुक्तम्॥ 4402
कलारूपेषु सर्वेषु उमाख्याः शक्तयः स्थिताः।
अष्टत्रिंशत्कलानां तु अष्टत्रिंशति शक्तयः॥ 4403
एवं शक्तिसमोपेतं न्यासकालेऽपि विन्यसेत्।
एवं प्रकारेण शक्तिसमोपेतं वामादिशक्ति- 4404
भिश्च अकारादि वर्णैश्च षोडश चंद्रकला-
भिश्च अकारादि वर्णैश्च षोडश चंद्रकला- 4405
द्वादश सौर कला दशवह्निकला ताभिस्स-
ह कला ब्रह्मपंचकन्यास कले सकलीकरण- 4406
(न्या) वेळायां विन्यसेत्। ततः स्थाने अंगुष्ठादि-
(P.L. 263) कनिष्ठांतमंगुलित्रिन्यासं कुर्यात्। मूर्तित्वं
तत्त्वाभूतं पिण्डं चैव कलां तथा। पञ्चब्रह्माणि- 4407

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

चैतानि सर्वकार्येषु योजयेत्। ब्रह्मभेद-
मिदं प्रोक्तं अंगभेदमिदं शृणु। इतिशब्दाल्ये- 4408

ब्रह्मभेदपटलः —

ब्रह्मादिकं विश्वजगत्समूहमंगीकृतत्वात्-
परमेश्वरस्य सर्वाणि चांगानि भवंति। तस्मात्- 4409
अंगेश्वरं तं सततं भजामि॥
अतः परं प्रवक्ष्यामि अंगभेदविधिं परम्॥ 4410
अंगषड्भेदमित्युक्तं तस्मात्षडंगमुच्यते।
अतः परं ब्रह्मभेद पटलस्योपरि परं अंग- 4411
भेदविधिः अधिक्रमार अंगानां भेदविधिं-
प्रकारं कथ्यते। अंगं षड्भेदमित्युक्तं तदं- 4412
गानि षड्विधानि भवंति। षडंगमंगभेदादि-
षड्त्रिंशदिति तानि तु। एभिर्भेदैस्समायुक्त- 4413
अंगं षड्त्रिंश अंगं षड्त्रिंशति क्रमात्।
अन्नभेदानि षड्, तानि एकैकः षड्विधी-
भूत्वा षड्त्रिंशति भवेत्॥ 4414
तेषां तु ग्रहणं वक्ष्ये समासाच्छृणु षण्मुख॥
अंगलक्षणश्रावणार्थं सुब्रह्मण्यमवबोध- ॥ 4415
यति। शिवांगं चैव मूर्तांगं विद्यांगं च तथैव च-
कूटांगं चैव शक्त्यंगं सामान्यांगं तथैव च॥ 4416
एतानि चांगनामानि शिवांगानि षडस्सह।
इत्युक्ते प्रकृत्यक्षरभूत रूप ब्रह्मणांगभूत-॥ 4417
विकृत्यक्षराभिधान दीर्घ इत्यर्थः। नाद-
ब्रह्ममेव सर्वाक्षरेषु व्याप्य शिवांगमित्युच्यते॥ 4418
एतेषां चैवमंगानां शिवांगं पूर्वमुच्यते।
एवमेतेषां चांगानां मध्ये शिवांगं पूर्वमुच्यते॥ 4419
नवार्णीकृतिष्वेषु तुर्यं पञ्चमसप्तमम्॥
...वर्णानि संत्यक्त्वा शेषाक्षरपरवर्णभृत्॥ 4420
कार्यकारणसंयुक्तं सर्वेषां च षडानन।
एषु नवार्णीकृतिषु प्रत्यक्षरनवकेषु॥ 4421

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तुर्यकारं च पञ्चम कृकारं च अष्टमम-
कारंच त्यक्त्वा सन्त्यज्य षड् परवर्ण-॥ 4422
p. 2.264) .. शेषाः आं ईं ऊं णौं- अः इति षड्वर्णाः।
परवर्णयुक् हकारेण संयोज्य कार्यकारण-॥ 4423
युक्तं पृथक् पृथक् कारण युक्तमपि भवति।
एवं योजनं कृताचेत् हृदयाद्य प्रौतषडं- 4424
गानि भवन्ति। अस्त्रव्यतिरिक्तांगानामेव-
बिन्दुयोजन कर्तव्यमित्यत्र प्रायः एतानि- 4425
रेफ) शिवांगानि सुविवर्जितानि चेत्, तंत्रिकांगानि
भवंति। रेफयुक्तानि चेत् वैदिकांगानि भवंति॥ 4426
न्यासत्रितयेऽपि वैदिक तांत्रिकमंत्रयोरभेद-
मेव। प्रथमं हृदयं विद्यात् द्वितीयं तु शिरो भवेत्॥ 4427
तृतीयं तु शिखां विद्यात् चतुर्थं कवचं भवेत्।
पञ्चमं नेत्रयुक्तं च अस्त्रं षष्ठमुदाहृतम्॥ 4428
एतानि शिवांगनामानि कीर्तितानि क्रमा-
द्विदुः। आदौ प्रणवमुच्चार्य शिवार्णं तदनंतरं॥ 4429
अभिधानं च तुर्यन्तं नमस्कारादिभिर्युतः।
प्रथमतः प्रणवं ततः शिवार्णं हकारादि॥ 4430

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

P.L. 20038. (आगमोद्धृत जीर्णोद्धारपटलः) Continued 145 323

अतः परं हृदयादि नाम चतुर्थ्यन्तेन समु-
च्चारणं नमः। तदुपरि नमस्कारादिभिर्नमः॥ 4431
स्वाहा वषट् वौषट् हुं फट् एतैस्संयुतं
सम्यक्युक्तं भवति। एवं हृदयादिमंत्राणि- 4432
ज्ञेयानि। प्रणवोद्धरणं क्रियासारे वक्ष्यति।
चतुर्विंशतिकाबीजं पञ्चविंशतिकं तत॥ 4433
इत्यक्षरं सविसर्गं च हृन्मंत्रे पल्लवं स्मृतं।
ब्रह्मबीज इति ककार इत्यर्थः। प्राणस्य-॥ 4434
सद्यामह्लापः द्वितीयं स्वरसंक्रमात्।
रवे द्वितीयं स्वरं तच्छिरोमंत्रस्य वल्लभम्॥ 4435
प्राणो नाम यकारमेव रवे इत्युक्ते हकारः।
पार्थिवांताक्षरं यस्य तृतीयंचाक्षरं तत॥ 4436
दशांतं व्यञ्जनं तद्वत् शिखामंत्रस्य पल्लवं।
पार्थिवांतं वकारं ततः तृतीयं षकारं दशांत-॥ 4437
व्यंजनमित्यर्थः। चतुर्थान्तस्वरं व्यञ्जन-
बिन्दुनादौ गगनाक्षरे युञ्जीयात्। कवचं - 4438
P.L. 265) मन्त्रपल्लवं परिकीर्तितं। चकृत्वांतमुकारं
गगनाक्षरं भकारं। बीजद्वये शिखायां च- 4439
पल्लवे पूर्वमिक्षारम्। चतुर्दशस्वरोपेतं
नेत्रमस्य पल्लवं शिखायां बीजद्वयं वकार - 4440
षकारे तयोः पूर्वं वकारं तस्मिन् तस्मिन् 4441
चतुर्दशस्वरं। खकारं योजयेत्।
एकविंशति वर्णानां दशांतं व्यंजनं तथा।
एतद्वायुजमंत्रस्य पल्लवं चेति कीर्तितम्॥ 4442
नमोऽन्त हृदयं विद्यात् स्वांतं शिरसो भवेत्।
वषडंतं शिखा ज्ञेया हुंकारं कवचस्य तु॥ 4443
वौषण्णेत्र त्रयांतं स्यात् फट्कारं चास्त्रमंत्रतः।
चास्त्र) वौषण्णे त्र त्रयांतं स्यात् फट्कारं ~~चास्त्र~~ मंत्रतः॥ 4444
एवं शिवांगमित्युक्तं भूतांगानि तथोच्यते॥
पार्थिवं शिवसंयुक्तं द्वितीयं स्वरसंयुतं। 4445
बिन्दुनादसमायुक्तं प्रथमं बीजमुच्यते॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवार्णं हकारं जीवन ·· कारंचतुर्थं स्वर-
मिकारं शिवशक्ति बिन्दुः। एते संभूयमिति- ॥ 4446
बीजं भवति। एवं द्वितीयं बीजं भवति।
पञ्चमं षष्ट संयुक्तं पञ्चमं च कलायुतं ॥ 4447
आधाराधेय संयुक्तं तृतीयं बीजमुच्यते।
पञ्चमं हकारं षष्ठं रेफं पञ्चमांतं कला ऊकारं- 4448
आधाराधेयं बिन्दु एते संभूय-
ह्रूमिति तृतीय बीजं स्यात्॥ भूतांतमनि- 4449
लोपेतं पश्चात्सह कलान्वितम्।
परापरसमायुक्तं चतुर्थं बीजमुच्यते॥ 4450
भूतांतं हकारं पञ्च··· कला ऐकारं परा-
परं बिन्दु एते संभूय ह्रैमिति चतुर्भूत- 4451
···· वायुबीजं स्यात्। तत्वांतं तत्व-
संयुक्तं कलांतेन समन्वितम्। कार्य- ॥ 4452
कारण संयुक्तं पञ्चमम् बीजमुच्यते।
तत्वांतं हकारं तत्वमपि हकारं कलांत- 4453
मौकारं कार्यकारणबिन्दु एते संभूय-
ह्रौमिति पञ्चमं भूतबीजं भवति। शक्त्यंतं- 4454
शिवसंयुक्तं आदिबीजं कलान्वितम्। तयो-
र्मध्यगतं बिन्दु षष्ठमं बीजमुच्यते। 4455
शक्त्यंतमपि शिवमपि हकारमेव आदि-
p.L.266) बीज·· रान्वितं तयोर्हकारयोर्मध्ये यदा- 4456
दिबीजं प्रथमं हकारं तत्कलान्वितं कार-
युक्तं भवति। तयोर्मध्यगतं बिन्दुरितरयोः- 4457
उभय हरयोः मध्ये बिन्दुर्भवति। तदानीं
मं हुं इति वर्णबीजं भवति। पञ्चभिग्रन्थिभिः 4458
युक्तं चैतन्यमंत्रेण चात्मनि। चैतन्यमंत्रेण-
च अस्त्र मंत्रेण च सह- भिग्रन्थिभिः पञ्च- 4459
विध ग्रन्थिभिः सहयुक्तं, भूतांभबीजं आत्म-
निस्थितं ॥ एवंभूतांगमारव्यातं गृढांगानि ततः शृणु ॥ 4460

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं पूर्वोक्ताश्लोकाकारेण भूताङ्गमाख्यातम्।
रुद्रान्तं रुद्रतुर्यं च अन्तकूटाक्षरेण सबिंदु- ॥ 4461
नादसमायुक्तं कूटाङ्गमिदमीरितं। प्रथमस्य-
द्वितीयं तु अवर्गतः। द्वितीय द्वितीयार्णं चतुर्थ- ॥ 4462
तुर्यं च पञ्चमान्तं षष्ठबीजं च रुद्रान्तं द्वादश-
बीजं रुद्रतुर्यं च पञ्चदशाक्षरं चान्तमिति- ॥ 4463
विसर्गश्च कूटाक्षरेण षडङ्गवर्णयोगेन-
बिन्दुयुक्तत्वात् क्षामित्यादि षडङ्गं भवति॥ 4463
एवं कूटाङ्गमित्युक्तं विद्याङ्गानि ततः शृणु॥ 4464
एवं प्रकारेण कूटाङ्गं कल्पितं। ततः तस्यो- ॥
परि विद्याङ्गानि शृणु। इति षडाननमवबो- ॥ 4465
धयति। प्रकारं तु समुद्धृत्य तकारं तु समु-
द्धरेत्। तकारोपेत नकार यकारश्च नमो- ॥ 4466
न्तकम्। एवं विद्याङ्गमाख्यातं तकारेण-
मकारयुत्। नमोन्तन्तु समुद्धृत्य स्वाहान्त-
शिरसा विदुः। शिकारं चैव वकार फट् कं- ॥ 4467
हुंकारमेव च। वषट्कारसमायुक्तं शिखाबीजमु-
p. 2. 267) दाहृतम्। शिकारं चैव वाकारं तकारेण मकारयुक्॥ 4468
तकारं च मकारं च हकारं च समुद्धरेत्।
तकारं च जकारं च अनुस्वारं च सर्वतः॥ 4469
जकारं तु समायुक्तं मकारं च पकारकम्।
रकारं च णकारं च मकारं च समुद्धरेत्॥ 4470
अकारं च शकारं च जकारं च मकारयुक्।
वह्निशेखरसंयुक्तं यकारं तु मकारयुक्॥ 4471
यकारं च ककारं च अनुस्वारसमन्वितं।
ककारं च मकारं च पकारं च शिकारकम्॥ 4472
अनुस्वारसमायुक्तं अकारं च लकारकम्।
मकारं च भकारं च मकारेण समुच्चयं। 4473
अकारं चैव वाकारं हकारं च मकारकम्।
शिकारं च लकारं च मकारं हारमेव च॥ 4474
क्षाकारं च ऋकारं च ककारं च विकारकं।
नकारेण समायुक्तं बन्धशब्दमुदाहृतं॥ 4475

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

148
326

पूर्णं चैव तु पूर्णं च कहा कहा समायुतम्।
कि ... ङ्क्ष्क्ष समायुक्तं सूक्ष्मसूक्ष्म समायुतं॥ 4476
रंकारं च हुकारं च नकारे हारमेव च॥
चकारं च मकारं च उकारं च लृकारकम्॥ 4477
विकारं श्यकारं च विषं चैव रुकारकम्॥
.. फट्कारस्तं भयं चैव स्नांबशब्दस्तथैव च॥ 4478
यकारं चैव हुंकारं फट्कारेण समायुतम्॥
एवं च मारव्यातं सर्वरक्षाकरं भवेत्॥ 4479
इति संक्षेपः॥
पृकारं च स्फुकारं च ऋकारं च खुकारकं॥
रकारं चैव विन्यस्य घोरं चैव तु घोरकम्॥ 4480
तकारं चैव विन्यस्य मकारं चैव विन्यसेत्॥
तकारं च मकारं च उकारं च वकारकं॥ 4481
चटश्चैव चटश्चैव पृचटं पृचटं तथा॥
कहश्चैव कहश्चैव चमश्चैव चमस्तथा॥ 4482
पूतयश्चैव हुं फट् .. कारसमायुतम्॥
स्वरेणैव तु संयुक्तं मंत्रहेतिरुदाहृतम्॥ 4483
एवं विद्यांगमारव्यातं शक्त्यांगानि ततः शृणु।
विद्यांगानीत्यनंतरं शक्त्यंगानि ततः शृणु॥ 4484
इत्यवबोधने॥
आधारशक्तिबीजं बिन्दुनादसमन्वितम्।
शक्ति) प्रथमं चैवमित्युक्तं सामिबीजं प्रथमं शक्तिबीजं॥ 4485
स्यात्। बिन्दुनादसमायुक्तं द्वितीयं बीजमुच्यते।
पीताभमितिकारमित्यर्थः। शक्तिस्सकारम्॥ 4486
बिन्दुनाम अनुस्वारं। एति संभूय शक्तिबीजं*।
स्यात्। उकारं शक्तिबीजं च बिन्दुनादसमन्वितं॥ 4487
तृतीय बीजमित्युक्तं, ऊकार बिन्दु संयोगादू।
ऊमिति तृतीय शक्तिबीजं स्यात्। एकारं शक्ति- 4488
पञ्चमं बीजमारव्यातं सकारं तु तारबिन्दु-
संबंधात् सौमिति पञ्चशक्तिबीजं स्यात् - 4489

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वांतं शक्तिसंयुक्तं वर्णं चैव संयुतम्।
स्वरांतन्नाम्न विसर्गी वर्णसंयुक्तं भूत्वा अ- 4490
कारेण सह वर्तमान सकारयुक्तं चैव स
इति षड् बीजं स्यात्। एते तान्त्रिकाः। तेषु- 4491
रेफयुक्तश्चेत् वैदिकानि भवन्ति। एवं शक्त्यंग-
माख्यातं सामान्यांगम प्रोच्यते। शक्त्यंगा- 4492
क्त्यनंतरं सामान्यांगमुच्यते। आदिवर्गे -
अश्विनौ वेदरसौ भानुमनुस्तथा॥ 4493
षोडशं चेति षड्वर्णाः सामान्यांगं विधीयते।
आदि वर्गे प्रथमवर्गे षोडशकलास्वश्विनौ-॥ 4494
पक्षौ स्वरं वेदं चतुर्थाक्षरं रसः षड् भानुः-
द्वादशं मनुश्चतुर्दशं षोडशं सर्गः। एते- 4495
षड्वर्णाः। सामान्यांगमित्युक्तं समस्तदेवानां-
साधारणमंगः। सर्वयोग्यमित्यर्थः॥ 4496
ब्रह्मा विष्णुश्च रुद्राश्च आदित्येषु ग्रहास्तथा-।
मदनो क्षेत्रविघ्नश्च अष्टमूर्तिवसुस्तथा॥ 4497
विश्वेशाश्च गणेशाश्च लोकपाला युधास्तथा।
सिद्ध विद्याधराश्चैव गंधर्वाप्सरसस्तथा॥ 4498
यक्षा किन्नर भूताश्च ऋषयो खेचरास्तथा।
अन्येषां सर्वदेवानां स्वनामाक्षरं तथा॥ 4499
इन्द्रादि खेचरांतानां देवतानां चान्येषां-
इतरदेवतानां च तत्तन्नामाद्यक्षरेण- 4500
सामान्यांगं योजनीयं। बिंदुनादसमायोगं-
च भवति॥
तेषां अंगानि चोक्तानि तद्बीजं मूलमुच्यते॥ 4501
P.L.269) तत्तद्देवतानामभिधानाद्यक्षरं एव तत्त-
द्देवतानामंगं भवति। तेषां मूलं तु तत्तत्- 4502
देवतानां वर्णपटले बीजत्वेन त्वदुक्त-
तत्तद्देव तेषां मूलमंत्र तत्कर्णं ब्रह्मबीजं- 4503
ककारं भवति। तदेव तस्य मूलं तेन सांग-
संयोगात्। कां कीं क्लीं कैं कौं कः। इतिब्रह्म- 4504

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

150
328

इन्द्रबीजं तस्यापि जां जीं जूं जैं जूं जैं जौं जः,
इति इन्द्रमंत्रं भवति। एवमन्येषामपि ज्ञेयम्॥ 4505
चंद्रबीजं ठकारं मदनबीजं मकारं विश्वेश्वर-
बीजं तत्तद्देवतानां मन्त्रे जपकाले तत्तद्देवतानां॥ 4506
अंगमंत्राख्यां सह न्यासं कुर्यात्। करशुद्धि-
करन्यासांगन्यासं च कुर्यात्॥ ॥ 4507
सामान्यांगमिति प्रोक्तं तेषां वर्णमथोच्यते।
सामान्यांगोक्त्यनंतरं तेषां षड्विंशदंगानां॥ 4508
वर्णं शुद्धश्वेतादिकमुच्यते। हृदयं शुक्ल-
वर्णंस्स्यात् पीतवर्णं शिरस्तथा। शिखा-॥ 4509
रक्तसमं विद्यात् कवचं स्फटिकप्रभं। नेत्रं-
श्याम निभं विद्यात् कृष्णाभं शास्त्रमुच्यते॥ 4510
सर्वं स्पष्टम्। शिवं शिवांगमाख्यातं भूतांगानि-
तथोच्यते। भूतांगं वर्णमुच्यते। पीतं शुक्ला- 4511
रुणं चैव कृष्णं धूम्रं च पावकं। भूतांगानां
तु वर्णानां समासात् कीर्तितानि तु॥ श्वेतरक्तं 4512
तथा नीलं कुंकुमं पीतमञ्जनम्। कुटांगा-
नां तु वर्णानि समासात्कीर्तितानि तु। जपा- 4513
कुसुम कुंदाभं पावकं चेन्द्रनीलकम्।
सिन्धूर हरितालं च विद्यांगानां निभस्तथा॥ 4514
पीतं श्यामं तथा रक्तं कृष्णं मरतकं तथा।
P.L.270) मुदीरितं। एतावत सवर्णानि सामान्यांगमुदीरितं॥ 4515
ध्यानमुच्यते। चतुर्भुजं त्रिणेत्रं च जटामकुट-
मण्डितं। सर्वलक्षणसंयुक्तं सर्वाभरणभूषितं॥ 4516
त्रिशूलमभयं सव्ये कपालं वरदं वामके।
हारकेयूरसंयुक्तं कटकैः कंबलैर्युतम्॥ 4517
हृदयादि वर्मपर्यन्तं स्वरूपं सौम्यमुच्यते।
शेषा रौद्र इति ज्ञेया सर्वेषां रूपमुच्यते॥ 4518
शिवांगैश्च यजेद्देव स्थापनादीनि सर्वशः।
शिवांग मंत्रैर्देवं यजेत्। पूजां कुर्यात्॥ 4519

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थापनादीनि प्रतिष्ठादिकामपि क्रियां शिवां-
गैरेव कुर्यात्। भूतांगेषुच वेवत् ....स- 4520
पादादि भूतशोधनं। अणौ नामानि संयोज्य-
भूतांगेषु समाचरेत्। पञ्चभूतांगसंबन्धमं- 4521
त्रेषु पादादि भूतशोधनम्। प्रपदमुखव्योमांत-
पञ्चभूतशुद्धिं कुर्यात्। अन्यांच भूतांगेषु अणौ- 4522
नामानि संयोज्य भूतशुद्धिकृतमंत्रेषु भूतनामानि-
संयोज्य मंत्रोच्चारणं कुर्यात्। कूटांगं चैव- 4523
विद्यांगं प्रायश्चित्तं च कारयेत्। शक्तीनां-
स्थापनाकाले शक्त्यंगैस्तु समाचरेत्। शक्ति- 4524
स्थापन काले शक्त्यंगैर्न्यासं कुर्यात्। अन्येषां-
सर्वदेवानां सामान्यांगैस्तु योजयेत्। एवं 4525
षडंगमाख्यातं विशेषमथ्थुनोच्यते। एतेषां
षडंगानां मध्ये विशेषमिदानीमुच्यते। केवलं 4526
ज्ञानजं चैव योगजं भूतजं तथा। कामदंच
क्रमेणैव हृदयं पञ्चधा भवेत्। केवलं हृदयं 4527
ज्ञानजं हृदयादि भेदेन पञ्चविधं भवति।
शिवांगं हृदयं यत्तु केवलं समुदाहृतम्॥ 4528
शिवांगं हृदयं यत्तु केवलं हृदय-
यच्छिवांग हृदयमस्ति तदेव केवलहृदय-
मिति कल्पितम्। केवलस्याभावं केवलं सांत- 4529
(P. 2.271) मिति कल्पितम्। केवलस्याभावं केवलं सांत-
यान्त समायुक्तमादिवर्णान्तसंयुतम्।
ज्ञानाद हृदयं बिन्दु समायुक्तपरिकीर्तितं। 4530
सांतमिति हकारंच यांते रेफं च आदिवर्गांत-
मौकारं बिन्द्वनुस्वारं एत ज्ञानात्म हृदयं 4531
ह्रौमिति स्यात्॥ भूतांतमनिलोपेतं तत्वांतं-
स्वरसंयुतम्। शिवशक्ति समोपेतं योगजं- 4532
हृदयं विदुः। भूतांतमिति हकारं अनिलो-
पेतं यकारयुक्तो भूत्वान्तस्वर संयुतम्॥ 4533
अन्यच्चाव्यञ्जनरूपं हकारः। हकारेण युक्तो
भवति। उभयाक्षराभ्यां बिन्दुयोजनंयेत योग- 4534

जहृदयं ~~सर्वकामदं~~ ह्रां हं भवति। भूतज
हृदयं ग्रन्थिन्नास्ति। तत्वांतमानिलांतञ्च- 4535
दशान्तान्तकलान्वितम्। बिन्दुनादसमा-
युक्तं हृदयं सर्वकामदम्। तत्वांतं प्रसिद्धम- 4536
निलांतं रेफं रेफांतं नमोकारं बिन्दुनाबिंदु-
नादमनुस्वारंच संभूय ह्रैमिति कामहृदयं 4537
भवति। हृदयादिनमोन्तं तु सर्वेषां सह योजयेत्।
पूर्वं नमोस्कारांतं सर्वेषां केवल हृदया- 4538
दी) दिनां पश्चानां अपि सह प्रयोगं कुर्यात्।
ईशानं प्रथमं विद्यात् शुक्लवर्णमुदाहृतम्॥ 4539
ईश्वर ज्ञान हृदयं तदा कांचन सन्निभं।
प्रथमं केवल हृदयं ईशानं शुक्लवर्णश्च- 4540
भवति। द्वितीयं ज्ञानहृदयं ईशाख्यं भवति।
तदा कांचन संनिभं। योगजं ब्रह्मरूपं- 4541
स्यात् पीतवर्णं तु निर्दिशेत्। भूतजं चेश
रूपं तु रक्तवर्णमुदाहृतम्। योगजं हृदयं- 4542
ब्रह्मरूपं भवति। भूतजं रूपः। ईशरूपं
भवति। रक्तवर्णं स्यात्। सादाख्यं कामदं- 4543
विद्यात् शुद्धस्फटिक सन्निभम्। यजनं
केवलेनैव स्नापनं ज्ञानजेन तु। प्रोक्षणं 4544
योगजेनैव दीक्षा कर्म तु भूतजा। सर्वकर्म-
P. 2. 272 विशेषेण कामदेनैव कारयेत्। केवलेनैव 4545
केवले हृदयेनैव यजनं कुर्यात्। नान्येन
ज्ञानज हृदयेनैव स्नापनं प्रतिष्ठां कुर्यात्। 4546
नान्येन। योगजेनैव प्रोक्षणं कुर्यात्। नान्येन-
भूतजा हृदय दीक्षा कर्म रूपं भवति। विशेषे- 4547
ण कामदे.. कैस्सर्वकारयेत्। एवं हृदय-
माख्यातं मन्त्रभेदमतः शृणु। एवं प्रकारेण- 4548
हृदयभेदमुक्तं। अनंतरमंत्रभेदमुच्यते।
शिवास्त्रं क्षुरिकास्त्रं च तथा पाशुपतास्त्रकं॥ 4549

व्योमास्त्रं चैव घोरास्त्रं शिवास्त्राद्यघोरास्त्रांते
अस्त्राः पञ्चविद्या भवन्ति। षडक्षरं शिवास्त्रं ॥ 4550
स्यात् क्षुरिकाद्वष्टवर्णकम्। पाशुपदं तु पञ्चार्ण-
व्योमास्त्रं तु दशार्णकम्। अघोरिशद्घोरास्त्र- ॥ 4551
एतत्पञ्चास्त्रमुच्यते। स्पष्टः। एवं पंचास्त्रं कल्पितं।
सर्वकर्मार्हकं विद्यात् पूजकः सर्वकर्मसु॥ 4552
पूजक इति समस्ततत्वमंत्रजन्मस्थाभूत-
महालिंगं लिंगपीठे ब्राह्मा चकः। शुद्धशैवः ॥ 4553
एतत्पञ्चास्त्रमंत्रं सर्वकर्मसु अर्हं विद्यात्।
सर्वक्रियायां योग्यमिति विद्यात्। बुद्ध्यात्॥ 4554
शिवांगानि षडंगानि कीर्तितानि षडानन।
हे षडानन, शिवांगभूत कूटांग विद्यांग- ॥ 4555
शाक्त्यंग सामान्यांगेत्युक्त षडंगानि अपि-
कल्पितानि। अंगं भेदमिति व्याख्यातं। मंत्र- 4556
जातमतः शृणु। अंगभेदमुक्तं। तदनंतरं मंत्र-
जातं वक्ष्यते। इति शुद्धाख्ये अंगभेदं नाम- 4557

— अष्टमः पटलः —

ब्रह्मा विष्णु सुरेन्द्रचंद्ररविभिः सद्भूति- 4558
मद्भिः परैः। देवाद्यैः परमन्त्रविद्भिरपरैः
सद्भक्तिमद्भिर्नृभिः। सद्भिः सत्पवष्टुत्तिभिः 4559
मनुमुनिव्रातैरुपास्यैः महा.. स्त्रीलिंगं शिव-
तत्वं मुख्यनिलयं ह्यस्यं प्रपद्ये श्रिया॥ 4560
अन्यातः संप्रवक्ष्यामि मंत्रजातं ततः शृणु।
णा) हे षण्मुख- अंगभेदनिरूपानंतरं मंत्रजातं - 4561
मंत्रभेदं) प्रवक्ष्यामि शृणु। मंत्राणि जायते यस्मात्
मंत्रजातमिति स्मृतं। तस्मान्मंत्रमयं लिंगं॥ 4562
वक्ष्ये संक्षेपतः शृणु। यस्मात् समस्तप्रपंच
P.2.273) सर्गस्थिति विलयकारणभूत तत्वतः - 4563
मंत्राणि परार्ध्यकोटिभिन्न भेदभिन्नानि-
मंत्राणि जायन्ते। तद्देवतास्वरूपाणि शृत्वा- 4564

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तन्मन्यन्ते तन्मंत्रजातमिति स्मृतम्। सर्वोक्त-
मंत्रकारणभूतं तदेव मंत्रजातमिति ज्ञायते। 4565
तस्मात्कारणात् लिंगमंत्रमयजगज्जन्मादि-
कारणं लिंगं मन्त्रमयमेवस्वरूपं स्यात्। तत् - 4566
संक्षेपत उच्यते। शृणु इत्यवबोधने। सर्व-
लोकहितार्थाय सर्वप्राणिहिताय च। सर्व- 4567
मंत्रप्रसिद्ध्यर्थं भुक्तिमुक्त्यर्थमुच्यते। सर्वेति-
सर्वयोगानां सकलानां हिताय च। सर्वप्राणि- 4568
नां हिताय च। सर्वमंत्रप्रसिद्ध्यर्थं शालि-
पिष्टाक्तसूत्रेण सूत्रपातमाचरेत्। ~~प्राक्~~- 4569
~~सूत्राणि सप्तदश तथा~~ गोमयालेपिते क्षेत्रे-
निम्नोन्नतविवर्जिते। गोमयालेपिते भूमौ- 4570
शालिविप्राङ्मुखास्तथा। प्रागपश्चिमगतानि
सूत्राणि सप्तदश तथैव तत्प्रकारेण दक्षिणो- 4571
निच) त्तरगतानि... निच पङ्क्तयस्स्युः षोडशाख्यःताः)
प्राङ्मुखास्तथा। प्रागपश्चिमगतानि सूत्राणि सप्त- 4572
रेण) दश तथैव तत्। प्रकारो दक्षिणोत्तरगतानि
सूत्राण्यपि सप्तदश। एवं पातित्वा प्रागपश्चिम- 4573
मुखा दक्षिणोत्तरमुखाश्च पङ्क्तयः षोडशास्स्युः।
षडुत्तरशतं भवति। षड्पंचाशत्समाश्रित्य- 4574
कोष्ठानि द्विशतानि च। एवं षोडशपङ्क्तीनि
कोष्ठानि गणनया षड्पञ्चाशदुत्तरद्विशतानि 4575
भवन्ति। पश्चिमादिति पर्यन्तं लिंगार्थं वीथिकां
त्यजेत्। पश्चात्त्वानि चत्वारि वीथ्योः कोष्ठानि- 4576
र्ण) मध्यमे। संरक्ष्य पार्श्वक्षितयो षड्षड्कोष्ठानि-
लोपयेत्। मध्यमे षोडशपङ्क्तिकृतस्थान~~नेन~~ - 4577
न मध्ये वीथ्योश्चत्वारि चत्वारि पदानि स्थाप्य
पश्चात्पार्श्वयोश्चतुष्पदयोः पार्श्वे उभय- 4578

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

155
333

पार्श्वतः षड् षड् पदानि लोपयेत्। तदूर्ध्व-
पङ्क्तिं संरक्ष्य तदूर्ध्वं द्वादशं क्षिपेत्। पार्श्वयो- ॥ 4579
रुभयोस्तस्य द्वे द्वे कोष्ठानि लोपयेत्। तदूर्ध्व
पङ्क्तिं संरक्ष्य तयोर्विलोप्य तयोः पङ्क्त्योरुपरि- ॥ 4580
यत्पङ्क्तिरस्ति तासां रक्ष्य संस्थाप्य तदूर्ध्वे
द्वादशं क्षिपेत्। तस्य संरक्षितं पङ्क्तिरूर्ध्व- ॥ 4581
मुपरि द्वादशपदं संरक्षयेत्। न विलोपयेत्।
तस्य पार्श्वयोरुभयोः द्वे द्वे कोष्ठे च लोपयेत्। 4582
P. 2. 274) ~~तस्य संरक्षित द्वादश~~ कोष्ठपार्श्वक्षितयोः द्वे
द्वे कोष्ठे विलोपयेत्। मार्जयेत्॥ 4583
तदूर्ध्वे दश कोष्ठानि रक्ष्य पार्श्वद्वयं त्यजेत्।
विलोपयेत्तत षड् कोष्ठकं रक्ष्य पार्श्वयोः ॥ 4584
अ) पञ्च पञ्च च। लोपयेत् तु चत्वारि पार्श्वयोः।
ततः षड् कोष्ठकं रक्ष्य तस्य पङ्क्तिपदस्यो- ॥ 4585
परि ऋतुपदं संस्थाप्य पार्श्वयोः तस्य षड्
पदस्य पार्श्वद्वयेऽपि पञ्च पञ्चपदं विलो- 4586
पयेत्। बाण बाणपदं मार्जयेत्। तदूर्ध्वे
चत्वारि पदानि रक्ष्य तस्योर्ध्वे चत्वारि - 4587
पदानि रक्ष्य संस्थाप्य पार्श्वयोस्तस्य चतु-
ष्पदस्योभयपार्श्वयोः षड् षड् कोष्ठानि। 4588
सत्यत्वात्तदूर्ध्वे तद्वदाचरेत्। षड् कोष्ठानि-
विलोप्य तदूर्ध्वे तस्य चतुष्पदस्योपरि - 4589
तद्वच्चैव चतुष्पदं रक्ष्य पार्श्वयोः रसरस-
पदं विलोपयेत्। ततः षड्कोष्ठकं रक्ष्य- 4590
पार्श्वयोः पञ्च विलोपयेत्। तदूर्ध्वे दश-
संरक्ष्य पार्श्वयोः त्रित्रिलोपयेत्। ततः षड् - 4591
कोष्ठकं रक्ष्य तस्य चतुष्पदस्योपरि रस-
कोष्ठे संस्थाप्य पार्श्वयोः तस्य षड्पदस्य - 4592
पार्श्वद्वयेऽपि पञ्च पञ्च बाणपदं विलोपयेत्। 4593
तदूर्ध्वं दशसंरक्ष्य तस्य रसपदस्योपरि

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दशकं पदं संरक्ष्य तस्य दशकपार्श्व-
द्वयेऽपि च त्रित्रि वह्नि वह्नि वह्निपदं विलोप- ॥ 4594
येत्। तदूर्ध्वं द्वादशं रक्षयेत्। द्वे द्वे पार्श्वे च
लोपयेत्। तदूर्ध्वे पङ्क्तिं संरक्ष्य ततो लिंग- ॥ 4595
द्विपङ्क्तितः। तदूर्ध्वे संरक्ष्य तस्य पदस्यो-
परि द्वादशपदं संरक्ष्य द्वे द्वे पार्श्वे च ॥ 4596
लोपयेत्। तस्य द्वादशकोष्टस्य पार्श्व-
द्वितीययोरपि द्वितीयं द. म. विलोपयेत् ॥ 4597
तदूर्ध्वे पङ्क्तिं संरक्ष्य तस्य द्वादशपदस्यो-
परि पङ्क्तिं संरक्ष्य षोडशपदं विलोपयेत् ॥ 4598
(P.2.275) ततो लिंगद्विपङ्क्तितः। तस्य षोडशपदस्यो-
परि लिंगद्विपङ्क्तितः। पक्षपदेन लिंगाकारो- ॥ 4599
भवति। पङ्क्त्योश्चत्वारि चत्वारि कोष्ठानि
मध्ये च रक्षयेत्। षड् षड् कोष्ठानि पङ्क्त्यो- ॥ 4600
श्च पार्श्वयोरुभयोस्त्यजेत्। पङ्क्त्योश्च-
त्वारि कोष्ठानि, उभयोः पङ्क्त्योः चत्वारि - ॥ 4601
चत्वारि तुर्यपदानि ऊर्ध्वे संरक्ष्य तस्य षोड-
शपदस्योपरि संरक्ष्य पार्श्वयोः उभयोः - 4602
चतुष्कोष्ठाकार पङ्क्तिद्वितयोः पार्श्वद्व-
येऽपि षड् षड् कोष्ठानि त्यजेत्। रस रस- 4603
पदानि विलोपयेत्। एवं लिंगं समासाद्य-
ब्रह्मविष्णवीश पीठकं। एवमिति पूर्वोक्त- 4604
प्रकारेणैव लिंगं समासाद्य ब्रह्मावि-
ष्णवीश पीठकम्। लिंगं कृत्वा सृष्टिस्थिति- ॥ 4605
संहारकर्तृ ब्रह्मविष्णुरुद्रात्मकं लिंगमि-
त्युक्ते दुश्चवादो भवति। तस्य परिहारोक्तिः॥ 4606
शिवशक्तिरेव पीठं शिवलिंगं भवति। सृष्टि-
स्थिति संहरण कर्तृ शिव त्रिदेवता शक्ति- 4607
रूप शिवशक्तिरेव पीठिकेत्युक्ते तस्योदाहरणं-
कूर्मेश्वर गीतासु एका सर्पान्तरा शक्ति- 4608

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

करोति। विविधजगत्। आस्थाय ब्रह्मरूपी
मन्मयि त्वमधिष्ठिता। मन्मयि मत्स्वरूपिणि- 4609
अवधिष्ठा माया सर्वाधिष्ठात्री सर्वव्यापिन-
मेका शक्तिः ब्रह्मणो रूपमास्थाय, विधात्री- 4610
रूपमास्थाय विविधजगत् करोति नानास्वरूपं-
प्रपञ्चं सृजति। अन्याच शक्तिः विपुलं स्थापयति- 4611
मे जगत्। भूत्वा नारायणोऽनंतो जगन्नाथो
जगन्मयः। मे विपुलान्या शक्तिः मम पिता- 4612
वा पूर्वेत्यन्या शक्तिश्शिवा जगन्मया विश्व-
रूपी जगन्नाथः जगद्रक्षकः अनंतः नाशरहितः, 4613
यः नारायणो भूत्वा जगत्स्थापयति। विश्वस्य
p.2.276) स्थितिं करोति, तृतीया महती शक्तिः निहन्ति - 4614
सकलजगत्, तामसी मे समाख्याता कालाख्या-
रुद्ररूपिणी। कालाग्निध्यानरूपा मे मम तामसी- 4615
समाख्या तमोगुणसुबन्धिनी कलिता महती
तृतीया शक्तिः। विपुला तृतीया रूपा शक्तिः काला- 4616
ख्या रुद्ररूपिणी। कालाग्निध्यान रुद्ररूपा
सकल जगन्निहन्त्री इत्यादि देवतास्वरूपिणी- 4617
दिव्यशक्तिरेव पीठिका भवतीत्यर्थः। पट्टिका
मजकर्णी च पट्टिकाज्य हे षण्मुख पट्टिकाय- 4618
कण्ठं च कर्णं च पट्टिकां च आज्यप्रधानिका-
वं लिंगपीठे षडंगानि भवंति। कण्ठस्य छत्त- 4619
मिध्यग्निध्यानमस्ति। शिवलिंगस्य यश्चतुःकोष्ठ-
मारभ्योर्ध्वं चतुःकोष्ठपर्यन्तं षडंगानि- 4620
भवन्ति। मन्त्रन्यासस्य क्रमं लिंगे शृणु वत्स-
समासतः। शिवलिंगे मन्त्रन्यासक्रमं वक्ष्ये- 4621
शृणु। मणिपूरकमित्युच्यते। तस्मिन्मणि
पूरकाख्य दशदले डकारपूर्वं फकारांता- 4622
क्षराणि दश विन्यसेत्। ततः तस्य मणिपूर-
कस्योपरि हृदये द्वादशके ऊर्ध्व स्वन्ताख्य-
द्वादशे दले ककारादि ठकारांतं ककारपूर्वं 4623
कोरं द्वादशाक्षराणि विन्यसेत्। पट्यां कर्णे- 4624

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

षोडशके आदिसर्गं न्यसेत्ततः।
आज्ञाय द्विदळे चोर्ध्वं हं क्षं युग्मं न्यसेत्ततः॥ 4625
पट्टिकाभिधामूर्ध्वपट्टिकाभिधान कर्णस्थानस्य-
षोडशदळेषु आदिसर्गं न्यसेत्। आकारा- 4626
द्याकारांतं षोडशाक्षराणि विन्यसेत्। ततः
तस्य कर्णस्थानस्योपरि माज्ञायामाज्ञाभि- 4627
धान द्विदळे द्वयदळे हं कामित्युभयाक्षरे-
विन्यसेत्। उपरि आज्य प्रधारिकाना- 4628
माज्ञा चक्रे चतुष्टयस्य मध्ये द्वितय-
दळे हं क्षं न्यसेत् ततः। एतेषां रुद्रमूर्ति- 4629
बीजानां न्यास कारणात् एकपञ्चाशक्ष-
p.2. 277) णीति रुद्रमूर्ति बीजानि भवन्ति। तस्योदा- 4630
हरणं शारदातिलके, श्रीकण्ठानंत सूक्ष्मौ
च त्रिमूर्तीरमरेश्वरः। अर्घीन्दरश्च - 4631
महासेना षोडश स्वर मूर्तयः। पश्चात्क्रो-
धेश चण्डेश्वर पञ्चान्तिक शिवोत्तमः। 4632
एकैकरुद्र कूर्मैकनेत्राश्चतुराननः॥
अजेशश्च सर्वेशो लांगली दारुकस्तथा॥ 4633
अर्धनारीश्वरस्सोमोकांतश्च बिवांमयी॥
जयाच सुमुखेश्वर्य रेवती माधवी तथा॥ 4634
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोवधारिणी॥
ततश्च सहजं लक्ष्मी व्यापिनी माधवान्विता। 4635
एते रुद्रांग पीठस्थ सिंदूरारुण विग्रहाः॥
रक्तोत्पल कपोलास्यां अलंकृतकरांबुजा। 4636
अत्र शक्ति चक्रा ण्यपि विन्यसेत्। शिवचक्र-
न्यासानंतरं शक्तिचक्रन्यासमपि कुर्यात्। 4637
आधारादि गळांतश्च वर्णानि पूर्वं विन्य-
सेत्। आज्ञायां तु विशेषोऽस्ति शक्तिपक्षे
हळ न्यसेत्। आधारादीति आधारचक्र- 4638
पूर्वगळांतं विशुद्धचक्रपर्यन्तं वर्णानि-
पूर्वविन्यासं कुर्यात्। शिवचक्रन्यासं कुर्यात्। 4639
आज्ञाचक्रे विशेषोऽस्ति तत्र हकारळकार- 4640

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वर्णाणि दैवतं त्रैऽत्र पूर्ववत्परिकल्पयेत्। अन्यो-
रुद्रशक्त्याच्या प्रमाणत्वेन तु न्यासीकृता- ॥ 4641
तद्वन्त्योर्ध्वभागेऽपि विन्यसेत्। एवं षड्चक्र-
माख्यातं मूर्ध्नि मंत्रं न्यसेत्ततः। एवं प्रकारेण- ॥ 4642
षड्कन्यासमुक्तं। इदानीं ऊर्ध्वन्यासमपि
कुर्यात्। नादं लिंगे च विन्यस्य बिन्दुमाज्य- ॥ 4643
प्रधानिके। पद्मादि- पर्यन्तं मकारं विन्य-
सेत्क्रमात्। वृत्ते तु कारकन्यस्त्वा अकारं कमल- ॥ 4644
पट्टिके। नादं लिंगे च विन्यस्य-एकाराख्यं-
आज्यप्रधानोपरि पट्टिकाचतुष्कोण मध्ये न्यसेत्॥ 4645
p. 2.278) बिन्दुमाज्यप्रधारिके। प्रणवौ आज्यप्रधारि-
कायामेव कुर्यात्। पद्मादि कञ्जपर्यन्तं अकारं ॥ 4646
विन्यसेत्। ऊर्ध्वपट्टिकामारभ्य ऊर्ध्वकञ्ज-
पर्यन्तं मकाराक्षरन्यासं कुर्यात्। वृत्ते तु वृत्त- ॥ 4647
स्थाने उकारन्यस्त्वा उकारं न्यासं कुर्यात्।
अकारं कमलपट्टिके। अकाराख्या मध्य: ॥ 4648
कञ्जेऽप्यध: पट्टीयाञ्च विन्यसेत्। एवं
प्रकारेण - ओं. उ. अ इत्युक्त सूक्ष्मपञ्चाक्षर- ॥ 4649
न्यासमुच्यते। शृणु॥ नकारादि यकारान्तं-
पञ्चार्णं तत्र विन्यसेत्। नकारमकारशिकार- ॥ 4650
वकार यकाराभिधानानि पञ्चाक्षराण्याधार-
स्वाधिष्ठान मणिपूरक विशुद्धीयुक्त पञ्चचक्रेषु- ॥ 4651
विन्यसेत्। पञ्चाक्षरमिदं प्रोक्तं इदं स्थूलपञ्चा-
क्षरमुक्तं। षडक्षरमथोच्यते। अनान्तरं षड- 4652
क्षर न्यासमपि वक्ष्यते। तारं लिंगे प्रविन्य-
न्यस्य पट्टिकायां नकारकम्। मकारमूर्ध्व- 4653
कञ्जे तु शकारं वृत्तमध्यके। अध: कंजे वकारं-
अध: पट्यां यकारमपि विन्यसेत्। एवं षड- 4654
क्षरं प्रोक्तं, एवं प्रकारेण षडक्षरन्यासं प्रोक्तं।
एतानि पञ्चाक्षराणि उक्तानि मंत्राणि दैवागम- 4655
पुराणेषु सर्वत्र प्रसिद्धत्वात्, एत: दीक्षावीर-
शैवानां दीक्षात्वात् एतद्वीरशैवबि..रत्वात्. 4656

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अत्र शुद्धाख्ये परमेश्वरेण उक्तं हरस्यैवांतं
पक्षस्वरोपेतं उक्तं पञ्चाक्षरं स्मृतम्। हुन्मंत्र- 4657
पल्लवांतनम इत्यक्षरद्वयं। मंत्रोद्धारणकाले-
हृदमित्यते। तस्मान्नम इत्यक्षरद्वयम्। परं 4658
स कारस्योपरि विद्यमानं शिकारं च सूक्ष्मरुद्रा-
भिध्यान स्वरसहितं भवति। -- नन्तान्वितल- 4659
P.L. 279) कारेम कारस्यान्तीरभूतो वकारः अनंताभिध्याने-
हकारेण युक्तो भवेत्। तदानीं भवेतिवर्णो 4660
भवति। मरुद्वायुबीजयकारान्तिमवर्णो-
भवेत्। एवमुद्धारणं चेत् नमवायेति भवति॥ 4661
ता.. द्वयो य षडक्षरः। एतत्पञ्चाक्षरं प्रणवेन-
युक्तं चेत् षडक्षरं भवति। जगत्यां भुवना- 4662
ध्वानं पदाध्वानं च पङ्कजे। वर्णाध्वानं च-
वृक्षे तु कलाध्वानं च पङ्कजे। तत्वाध्वानं 4663
पट्टिकायां मन्त्राध्वानं प्रध्यारिके। एवं षड-
ध्वगं न्यस्त्वा सर्वात्मकं शिवं जगत्यां भुव- 4664
नाध्वानं पृथिवीस्थान भूताया स्थाने भुवना-
ध्वानं च पंकजे। पदाध्वानमध्यः कञ्जे पदा- 4665
ध्वानं वृक्षे वर्णाध्वानं प्रभाभिध्याने मणिपूर-
कस्थाने वर्णाध्वानं च पङ्कजे। तत्वाध्वानं च 4666
पट्टिकायां, तत्वाध्वानं च प्रध्यारिकायां मंत्रा-
ध्वानं चान्य प्रध्यारिकायां च न्यस्त्वा न्यासी- 4667
कुर्यात्। सर्वमंत्रात्मकं शिवं समस्तमंत्रमय-
मेव शिवलिंगमिति ज्ञापयेत्। सप्तकोटिमहा॥ 4668
मंत्रैः मण्डितं लिंगमुच्यते। ज्ञात्वा समर्चयेत्।
.... लिंगात् ... अमंत्रितं लिंगमित्युक्तं॥ 4669
मंत्रतः शिवं सप्तकोटि महामंत्रस्वरूपमिति-
ज्ञात्वा समर्चयेत् ... कुर्यात्। तत् शिव- 4670
ल माहात्म्य ज्ञान भावेन केवल पूजया निष्फ-
लमेव भवति। कामिकाद्यष्टाविंशति तंत्रेषु- 4671
मंत्रजातानि प्रोक्तानि। तत् सर्वं न्यासं कुर्यात्।
तस्मात्सर्वप्रयत्नेन मंत्रजातमिदं मतम्॥ 4672

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तेन कारणेन समस्तप्रयत्नेनापि इदं मन्त्र-
p.2.280) जातं तमिति तमिष्टं अतिबाल्यं - बाल्यंच - 4673
कौमारंच त्रिकोणकम्। पावनं चैव जातीनां
प्रकृतिर्विकृतिस्तु वा। संकीर्णं ब्राह्मणो वैश्य - 4674
शूद्रजाति प्रकीर्तिताः। स्त्रीपुंनपुंसकं जातिश्च-
सफलस्यान्मोसनम्। शुद्धमिश्रं तु संकीर्णं- 4675
मम रूपमन्यश्रुणु। वाग्भवमेव च। पार्श्वे-
रूपमेवं तु वा सवाहनमुच्यते। अतिबाला- 4676
न्ति संकीर्णो तवासवा भवन्ति। अनेकपङ्क्ति-
भवति। एतदेकोनविंशत्यत्रिध्यानानिस्पष्टं- 4677
व्याक्रियते। शुद्धं मकारसंयुक्तं अतिबालं
प्रकीर्तितम्। अष्टबीजसमायुक्तं सबालंचेति- 4678
कीर्तितं। शुद्धप्रसाद अकारयुक्तं चेत् अति-
बालसंज्ञं भवति। अष्टबीजयुक्तं मंत्रसबाल- 4679
संज्ञं भवति। पंचबीजेन संयुक्तं कौमारमिति-
कीर्तितम्। यौवनं चैव सर्वेषां मंत्रजातं 4680
प्रकीर्तितम्। पञ्चाक्षरेण समं मंत्रं कौमार-
संज्ञं भवति। जातीनां मंत्रजातमपि यौवनं - 4681
भवेत्। एकाक्षरं ब्रह्मणो जातं ब्राह्मं ब्राह्मण-
मंत्रं, पञ्चाक्षरमेव क्षत्रियमंत्रं, षडक्षरमेव- 4682
वैश्यमंत्रं शूद्रमष्टाक्षरं। एवं क्रमेण गुणितं-
चतुर्थान्तं प्रकीर्तितं। एतत्प्रकारेण गुणितं - 4683
चेत् चतुर्थान्तं चतुरः चतुरः, स्वाहाकारो-
भवेन्नारी नमोऽन्तं पुरुषाकृतिः। फट्- 4684
कारं च वषट्कारं नपुंसकमिति स्मृतम्।
स्रो स्वाहा इति। पल्लवांतं भवेन्मंत्र स्त्रीरूपं - 4685
भवेत्। यस्य मंत्रस्यान्तं नम इति पल्लवं
भवेत्। यस्य मंत्रस्य फट्कारं च वषट्कारं च - 4686
यत्र वर्तते तन्नपुंसकं भवेत्। विप्रः स्वाहांत-
कं प्रोक्तं नृपवैश्यादि संयुतं। इन्द्रादियमस्थानं - 4687

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मंत्र जातं प्रकीर्तितं। तन्मन्त्रं च नृपवैश्यशूद्र-
युक्। ब्रह्मणः मंत्रं च इन्द्रादीनां शायस्थानं ॥ 4688
P 2.281) शुद्धमेकाक्षरं प्रोक्तं वेदाक्षरमिश्र... भवेत्।
संकीर्णं बहुधा वर्णं त्रिविधं मंत्रमुच्यते ॥ 4689
एकाक्षरं मंत्रमेव शुद्धं चतुरक्षरमन्त्रमेव-
मिश्रकं भवेत्। बहुवर्णं संकीर्णमिति तंत्र- ॥ 4690
त्रिविधं कथ्यते। मंत्रादौ शिरं प्रोक्तं मंत्रो-
र्ध्वे वदनं मतम्। मंत्रबाह्ये च बाहू च तत्- ॥ 4691
स्यादक्षरसंयुतम्। मन्त्रादि मंत्रस्य प्रथमं।
शिरो मंत्रस्योर्ध्वप्रदेशं वदनं स्यात्। मंत्रबा- ॥ 4692
ह्यमेव उभयपार्श्वं मन्त्रस्याधारमेवाधारं-
पार्श्वे तु चक्षुश्श्रोत्रे च तयोर्मध्ये तु नासिका- ॥ 4693
तस्याप्यूर्ध्वे ललाटं च बिन्दु मस्तकमुच्यते।
पार्श्वेति, मन्त्रस्योभय पार्श्वे चक्षुश्श्रोत्रं चतु- ॥ 4694
ष्टयानां मध्ये नासिका भवति। तस्याप्यूर्ध्वे न-
सीयमप्युपरि ललाटं भवेत्। बिन्दुरेव मस्तकं- ॥ 4695
भवति। नादजिह्वा समाख्यातं शब्दं शब्दमिति
स्मृतं। ओष्ठं शब्देन भिन्नस्य द... धारस- ॥ 4696
मन्वितम्। नादमिति मंत्रनादमेव रसना- ।
तदुच्चरित ध्वनिरेव ध्वनिरिति शब्दः ॥ 4697
शब्दानां भिन्नत्वं ओष्ठं भवति। प्रणवांत-
समाख्या... मंत्रान्ते च प्रतिष्ठितं। मंत्ररूप- ॥ 4698
मिदं प्रोक्तं मंत्रवासं तथोच्यते। प्रणवांते-
रितं मंत्रस्वरूपं प्रणवाग्रे च मन्त्रांताभिधा- ॥ 4699
पल्लवस्य पृष्ठे च वर्तते। मन्त्रावासमिदानीं
वक्ष्यते। मंत्राणां प्रकृतिर्वासो वाहनं विकृतिः ॥ 4700
तथा। प्रकृतिर्वर्णभावं च वर्णानां वास- ॥ 4701
जिह्वया। मंत्राणामिति मंत्रवासं प्रकृतिः ।
प्रकृत्यक्षरमेव वाहनं प्रकृतिवर्णभावं च ॥ 4702
वासभूत प्रकृतिरेव वर्णो भवति। वर्णानां वर्ण- ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नां वर्णत्विमेवजिह्वामिति मंत्रवास: प्रकृति: -
भवति। जिह्वा स्थाने तु वासं च क्रास्यानाँ वृद्धि- ॥ 4703
वाहनं। ब्रह्मणो हृदयमेवासं हृदयं · · वाहनं-
पिण्डा तु वसते नाड्या नाडीनां वायुवाहनम् ॥ 4704
P. 2. 282) वायुवासं च शक्तीनां · · · · सं च वै शिवम्।
शिववासं च सर्वेषां मंत्रवासं प्रकीर्तितम् ॥ 4705
स्पष्टोऽएवं प्रकारेण · · · · · मंत्रवाहन
मुच्यते। लिंगे च प्रतिमां कुंभे वास्तौ वह्नौ च -॥ 4706
मूलके। अन्ये कुंभे च · · · युक्तमंत्रस्य वाहन-
· · · लिंगे च शिवलिंगे च स्थण्डिलोद्धरणलिंगे- ॥ 4707
च प्रतिमेरु मे रुद्रमूर्तिप्रतिमास्वपि कुंभे-
प्रतिष्ठा काल स्थापित कलशे च वास्तौ च - 4708
वह्नौ कुण्डलगताग्नौ च मूलके, मूलस्थाने-
ऽपि वास्येऽन्ये च कुंभे मंत्राणामाश्रय भूते- 4709
अन्ये शेषदीक्षा प्रोक्षण काले च स्थापित-
कुंभे च युक्तमंत्रस्या वाहनं, एवं नवदशा - 4710
प्रोक्तं मंत्रजातस्य लक्षणम्। मन्त्रजमिदं
प्रोक्तं। हरि: ओं नन्दननाम संवत्सरं- 4711
श्रावण मास षड्विंशदिनं स्थिरवारे शुभ-
दिने देवशिखामणिना लिखितं वातुळ 4712
शुद्धारव्य ग्रन्थं स्व हस्त लिखितम्- 4713
शुभमस्तु

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.